विद्यामन्दिरपत्रिका

# सारस्वती

VOL. II ISSN 2321 - 9072

विद्यामन्दिरपत्रिका

# सारस्वती

संस्कृतविभागीयगवेषणापत्रिका

मुख्यसम्पादकः – **अञ्जनदासः**

**रामकृष्णमिशन्विद्यामन्दिरम्**

बेलुडमठः, हावडा

**प्रकाशकः –**

स्वामी शास्त्रज्ञानन्दः

अध्यक्षः, रामकृष्णमिशन्विद्यामन्दिरम्

बेलुडमठः, हावडा – ७११२०२

जालपूटः – www.vidyamandira.ac.in

इ-पत्रसंकेतः – vidyamandira@gmail.com

दूरभाषः – ०३३ २६५४-९१८१

**प्राप्तिस्थानम् –**

विक्रय-विभागः,

रामकृष्णमिशन्विद्यामन्दिरम्, बेलुडमठः

**द्वितीयसंस्करणम्** – २८मार्च्, २०१८

ISSN 2321-9072

विनिमयः – **२५०** रूप्यकाणि

**मुद्रकः –**

सौमेन ट्रेडार्स् सिण्डिकेट, ९/३, के. पि. कुमार ष्ट्रीट

बालि, हावडा - ७११२०२

दूरभाषः - ०३३ २६५४-३५३६

**प्रच्छदभावना –** श्रीयुक्तः नीलाद्रिशेखरचक्रवर्ती

VOL. II ISSN 2321 - 9072

VIDYĀMANDIRAPATRIKĀ

# SĀRASVATĪ

RESEARCH JOURNAL OF THE DEPARTMENT OF SANSKRIT

(UGC Approved Peer-Reviewed Research Journal)

Chief Editor – **Anjan Das**

**RAMAKRISHNA MISSION VIDYAMANDIRA**

BELUR MATH, HOWRAH

**सम्पादकमण्डली**

ड. अञ्जनदासः(मुख्यसम्पादकः)

ड. सत्यव्रतपाहाडी

ड. हरेकृष्णपट्टजोषी

अध्यापकः दुर्गाशंकरचक्रवर्ती

# अध्यक्षसन्देशः

महान् अयमानन्दस्य विषयो यत् संस्कृतविभागेन '*विद्यामन्दिरपत्रिका सारस्वती*' इति गवेषणापत्रिकाया द्वितीयसंस्करणं प्रकाश्यते। अस्याः पत्रिकाया भावोऽतीव गम्भीरः, परन्तु भाषा सुखपाठ्या। लेखकाश्च स्वस्वक्षेत्रे सुप्रसिद्धाः। अत एव इयम् पत्रिका अवश्यं पाठकैः गवेषकैश्च आदृता भविष्यतीति मे दृढो विश्वास इति भगवतः समीपे प्रार्थये।

(स्वामी शास्त्रज्ञानन्दः)
अध्यक्षो रामकृष्णमिशन्-विद्यामन्दिरस्य

# सम्पादकीयम्

प्राचीनकालवदर्वाचीनकालेऽपि संस्कृतसाहित्यगगने नैका गवेषणापत्रिका विराजन्ते, तासु गवेषणापत्रिकासु 'सारस्वती' इति गवेषणापत्रिका स्वगुणैः प्रतिभाति। प्रत्येकं वर्ष इवास्मिन् वर्षेऽपि कतिपयानां गवेषकपरायणानां शोधपत्रैः समुल्लसिता भवति पत्रिकेयम्। अत्र पत्रिकायां येषां गवेषकपरायणानां शोधपत्राणि सन्ति, तानि खलु पत्राणि नानातथ्यसमन्वितानि भावगाम्भीर्यपूर्णानि च। अपि च, ते गवेषका हि स्वस्वक्षेत्रे लब्धप्रतिष्ठाः। अत एव तेषां पत्रैः अनुसन्धित्सूनां पाठकानां नूतनं वस्तूत्प्रेक्षितं भविष्यतीति मम विश्वासः।

किञ्च, पत्रिकायाः मुद्रणाशुद्धिशोधनकर्मणि प्रच्छद-भावनारूपकर्मणि च सर्वात्मना साहाय्यं कृतवन्तो अस्मन्महा-विद्यालयस्य प्रियतमाग्रजपादा नीलाद्रिशेखरचक्रवर्तिनः। ते हि धन्यवादार्हाः।

अन्ते च सर्वनिमित्तभूतमवतारवरिष्ठं भगवन्तं रामकृष्णं सर्वतोभद्राय सम्प्रार्थ्य पत्रिकामिमां विदुषां करकमलेषु उपायनीकुर्वतः।

दिनाङ्कः – १५/०३/२०१८ विदुषां वशंवदस्य

वेलुडमठः अञ्जनदासस्य

# विषयानुक्रमणिका

१. मनः – दर्शने दृश्यकाव्ये च ११

*ड. अन्नदाशङ्करपाहाडी*

२. नव्यमतानुसारं शाब्दबोधस्य प्रमितित्वपर्यालोचनम् ४७

*ड. श्यामापदकरः*

३. भ्रमविषये संशयविषये च नैयायिकमतसमीक्षा ७५

*ड. तपनशंकरभट्टाचार्य्यः*

४. असिद्धवदात्राभात् इत्यधिकारसूत्रविमर्शः ९७

*ड. हरेकृष्णपट्टजोषी*

५. शरणागति: नि:श्रेयसोपायने सरलसरणि: १३१

*ड. सेख-साबिर-आलि:*

६. शाम्बपुराणे अलंकारविमर्शः – एका समीक्षा १७२

*ड. शिउलिवसुः*

७. अभिधावृत्तिमातृकायामभिधाशक्तेर्विचारः १८८

*ड. शुभ्रजित्सेनः*

८. “अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्”

इत्यत्र ‘यथार्थ’पदविवेकः २२८

*ड. अञ्जनदासः*

९. वैयाकरणदिशा कर्तृस्वरूपविमर्श: २४५

*चिरञ्जित् घोष:*

१०. वेदान्तव्याख्याने प्रणववादस्याभिनवत्वम् २७१

*सेविकानागः*

११. मृच्छकटिके प्रयुक्तायाः प्राकृतभाषायाः समीक्षा २९०

*प्रदीपकर:*

११. अतिशयोक्त्यलंकारस्य स्वरूपानुसन्धानम् ३२९

*सन्दीपजाना*

१२. नैषधचरिते शकुनशास्त्रप्रयोगः–एकं संक्षिप्ताध्ययनम् ३४४

*सुकन्याभट्टाचार्यः*

१३. गौरीधर्मपालदेव्या मन्त्रानुवादः - समीक्षा एका ३६०

*उज्ज्वलकर्मकारः*

१४. पाणिनीयव्याकरणे कर्मकारकस्य अभिहितत्वम् ३७५

*जयन्तसरकारः*

# मनः – दर्शने दृश्यकाव्ये च

**ड. अन्नदाशङ्करपाहाडी**
भूतपूर्व-अध्यापकः दाँतनभट्टरमहाविद्यालयस्य

(***निबन्धनिर्यासः*** -
परमं विस्मयविषयीभूतं खलु मानवमनः। प्राचीनानां मते मनस्यवगाहनमाकाशचुम्बनमिव असाध्यमसम्भवञ्च। सन्ति चास्य मनसः पर्यायाः सचेतनाचेतनावचेतनादयो बहव इति मन्यते आधुनिकमनोविज्ञानशास्त्रम्। एवम्भूतस्य चिररहस्याधारभूतस्य मनसो वृत्ति-वृत्तान्तादीन्नवगन्तुं देवाऽपि न समर्थाः, कुतो मनुष्याः? तदेव मनो निबन्धस्यास्य प्रतिपाद्यम्- यत्र दर्शनशास्त्रसम्मतस्य दृश्यकाव्यसम्मतस्य च मनसः समासेन परिचयप्रदानप्रयासः कृतो निबन्धकारेण।)

आख्यानेनानेनारभ्यते अयं निबन्धः। कश्चन विज्ञानसाधको बहूनि वत्सराणि निविडनिष्ठया गवेषणादिकार्यं सम्पाद्य स्वकीये वीक्षणागारे प्राणसृजनप्रयासे सफलः सञ्जातः। स्वाविष्कारेण नितरां हर्षोत्फुल्लः स खलु परीक्षितुं स्वकृतिं काञ्चन रम्यां रमणीमूर्त्तिं निर्माय तां प्राणैः स्वसृष्टैः संयोजयामास।

सञ्जीवितया सप्राणवत्या तया अनिन्द्यसुन्दर्य्या युवत्या साकं ततः स विज्ञानतपस्वी नृत्यगीतादिनानाप्रमोदकर्मभिः बहुकालं व्यतीत्य श्रान्तोऽभूत्। किन्तु न जाता तदापि क्लान्तियुक्ता कामिनी सा। पुनः कियत्कालमित्थं नीत्वा नितरां श्रान्तो बभूव विज्ञानसाधकः सः। ययाचे च प्रमोदकर्मभ्यो विरामम्। परन्तु न विरराम सा रामा। अतीव क्लान्तियुक्तो विस्मितश्चासौ विज्ञानतपस्वी तदा पप्रच्छ ताम्- किं कदापि क्लमं नानुभवसि त्वम्? किं त्वं मनोहीना? स्मितं कृत्वा उक्तवती सा- नानुभवामि क्लमं कदाप्यहम्। नापि जानामि कीदृशः सः। नितान्तमाश्चर्यान्वितो जातस्तदासौ विज्ञानसाधकः तद्वचनमाकर्ण्य। श्रमः सञ्जायते जनेषु अतिरिक्तकर्मकलापैरिति तु स्वाभाविक एव। तन्निर्मातुः विस्मयमवलोक्य प्राह सा अक्लमवती युवतिः- कथमहं श्रमेण क्लमेन वा व्याकुला भवामि? नाहं मनोवत्याः कस्या मातुश्चोदराज्जाता, जाता त्वहं वीक्षणागारे यन्त्रजठरान्मनोहीनात्। मनोहीना यन्त्रमयी, यन्त्रमानवी तेनाहं सर्वथा। कथं मत्तो मनोवत्त्वमाकाङ्खते भवान्?

आख्यानादस्माज् ज्ञायते यन् मानवानामेव मन अस्ति, न मानवेतरेषाम्। मनुष्यो मनोवानिति सत्यम्, किन्तु मनुष्यशरीरे कुत्रापि मनो द्रष्टुं न शक्नुमो वयम्। आम्नातमृक्परिशिष्टे- 'चक्षुश्च श्रोत्रं च मनश्च वाक् च प्राणापानौ देह इदं शरीरम्।'[1] यर्जुवेदीये शिवसङ्कल्पसूक्ते

प्रार्थना श्रुयते यद् यन्मनः प्राणिदेहे तिष्ठति तन्मनो मे कल्याणकरसङ्कल्पेन युक्तं स्यात्- 'यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु।'[2] उक्तञ्च पुनस्तत्र यद् दूरङ्गममिदं मनः खलु ज्योतिषां ज्योतिः।[3] ऋग्वेदेऽपि श्रुयते- 'मनो जविष्ठम्।'[4] न केवलं ज्योतिषां ज्योतिरुत्तमं जविष्ठं वा मनो हि मानवानां बन्धनमुक्त्योः कारणम्। कथितं ब्रह्मविन्दूपनिषदि- 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः।'[5] मैत्रायनी-उपनिषद्यपि प्राप्यते-

'मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्।।'[6]

इदं मनश्चित्तम्-अन्तरकरणम्-बुद्धिः-मानसम्-हृदयम् इति नामभिर्बहुभिर्व्यपदिश्यते। अन्यमनस्क आसमिति न श्रुतं किं त्वयोदितमित्यादिव्यवहाराज् ज्ञायते यन्मनो विना किमपि ज्ञानमसम्भवमेव। बृहदारण्यकोपनिषदि जनकयाज्ञ-वल्क्यसंवादे कीर्त्तितमिदं यन् मन एव ब्रह्म। मनोहीनस्य न किमपि सिध्यति। मन एव आनन्दम्। मनसा हि जनः कामयते पत्नीं, तस्याञ्च जायते अनुरूपः पुत्रः। स एव पुत्र आनन्दः। यः खलु जनो ब्रह्म इति बुद्ध्या मन उपासते न मनस्तं परित्यजति। सर्वे खलु प्राणिनः मनःसमीपं गच्छन्ति। श्रूयते- 'अमनसो हि किं स्यात्?... मनसा वै सम्राट् स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै। ...नैनं मनो

जहाति सर्वाण्येनं भूतान्यभिक्षयन्ति।'[7] मनसा संयुक्त आत्मा एव इन्द्रियद्वारेण विषयान् जानातीति प्रसिद्धिः। वात्स्यायनेन उक्तं यद् घ्राणादिभिरिन्द्रियैः सह गन्धादीनां विषयाणां युगपत् सन्निकर्षादपि गन्धशब्दादीनां नानाविधविषयाणां युगपदेव ज्ञानं न भवति। एतस्मादेवानुमीयते यत् तैरिन्द्रियैः सह संयोगिसहकारिनिमित्तमेकमस्ति यत्तु न व्यापकं द्रव्यम्। एतदेव इन्द्रियैः सह युक्तं चेत्तदैव ज्ञानं भवति, तदभावे तु न।[8] भगवता प्रशस्तपादाचार्येण वैशेषिकभाष्ये विवृतं यद् आत्मेन्द्रियार्थसान्निध्याज् ज्ञानसुखादीनि अपूर्ववर्त्तीन्यपि समुत्पद्यन्ते इत्यनेन करणान्तरमेकमनुमीयते। अपि च, श्रोत्रादीनां बहिरिन्द्रियाणां व्यापाराभावादपि स्मृतिजननात् सुखाद्यान्तरग्राह्यपदार्थानां सत्ताच्च तत्तु करणम्-अन्तःकरणम्-अन्तरिन्द्रियमिति व्यपदिश्यते।[9] आचार्यशङ्करेणापि भणितं यद् आत्मोपाधिस्वरूपम् इदमन्तःकरणं मनो–बुद्धि-विज्ञान-चित्तेत्यादिभिः शब्दैः अभिधीयते। क्वचिच्च वृत्तिभेदात् संशयादिवृत्तिविशिष्टम् अन्तःकरणं मनः, निश्चयादि-वृत्तिविशिष्टं तु बुद्धिरिति संज्ञया व्यपदिश्यते तत्। अत अवश्यस्वीकार्यमन्तःकरणम्। तदनङ्गीकरणात् सर्वदा विषयोपलब्धेरथवा विषयानुपलब्धेरापत्तिः स्यात्। अतो यस्यावधानाद् विषयोपलब्धिरनवधानाच्च विषयानुपलब्धि-र्जायते तदेव मन इति निर्विवादमेव।[10]

न्यायवैशेषिकनये मनः खलु अनुपरिमाणविशिष्टं द्रव्यम्। मनश्चेद्व्यापि तदा इन्द्रियैर्विविधैः सह तत् संयुक्तं भवेत्। तादृशान् मनसो युगपदेव विविधानि ज्ञानानि समुत्पद्यन्ते। न तु तद् भवति। पिष्टकादिभक्षणकाले युगपद्रूपरसगन्धादीनां प्रतीतिस्तु युगपत् सूच्या शतपत्रवेधनवद् द्रुतक्रमवशादथवा अलातचक्रदर्शनवद् द्रुतसञ्चारवशादेव भवति। विषय इन्द्रियेण सह, इन्द्रियं मनसा सह, मनश्च आत्मना सह संयुज्यते। तस्माज् ज्ञानं भवति। करणत्वान् मनो न कर्ता। अतो ज्ञानेच्छाप्रयत्नादीनां न खल्वाश्रयो मनः। आत्मनः अनेकत्वान् मनोऽपि अनेकम्। संख्याद्यष्टसामान्यगुणा मनसि समवायसम्बन्धेन तिष्टन्ति। विशेषगुणस्यानाश्रयत्वात् मनो न भूतं वहिरिन्द्रिय-ग्राह्यविशेषगुणवत्त्वं हि भूतमिति तल्लक्षणात्। चक्षुरादीनीन्द्रियाणि केवलं स्वीयमेकं विषयं गृह्ननन्ति मनस्तु सर्वं विषयं गृह्नाति इति विवेकः। सुखदुःखादी-नामान्तरपदार्थानां प्रत्यक्षे मनस्तु करणमेव, वाह्यरूपादिप्रत्यक्षे तु तदेव सहकारिकारणम्।

सांख्ये चक्षुरादीनि पञ्चज्ञानेन्द्रियाणि वागादीनि पञ्चकर्मेन्द्रियाणि मिलित्वा दश वाह्येन्द्रियाणि। अन्तरिन्द्रियाणि च त्रीणि- मनोबुद्ध्यहङ्कारा इति। एतानि त्रयोदशकरणानि सांख्ये स्वीक्रियन्ते। अतो मनस्तु बुद्धेः पृथक्। वुद्धिः करणमपि कर्तृत्वमधिकरोति। मनस्तु सततं

करणं अर्थात् इन्द्रियम्। प्रकृतेः प्रधानाद्वा बुद्धिरुत्पद्यते, बुद्धेरहङ्कारः अहङ्कारान् मनो दशेन्द्रियाणि च ज्ञानकर्मादीनि समुत्पद्यन्ते। कर्मेन्द्रियाणां ज्ञानेन्द्रियाणाञ्च कार्यसहायकत्वान् मन उभयात्मकम् इन्द्रियम्। तदुक्तं सांख्यकारिकायाम्- 'उभयात्मकं मनः'[11] मनसि अधिष्ठितानि हि चक्षुरादीनि वागादीनि चेन्दियाणि स्वेषां कार्याणि सम्पादयन्ति। एतेषु बुद्ध्यहङ्कारमनःसु निश्चय अध्यवसायो वा बुद्धेर्व्यापारो लक्षणं वा भवति। अयञ्च ममानुकूलः प्रतिकूलो वेति अभिमानम् अहङ्कारस्य लक्षणम्। मनसो लक्षणन्तु सङ्कल्पवत्त्वम्- 'सङ्कल्पकमिन्द्रियं च साधर्म्यात्।'[12] सामान्यरूपेण विशेषरूपेण च वस्तुधारणा एव सङ्कल्पना इति। एतेषां त्रयाणामन्तरिन्द्रियाणां व्यापारस्तत्रभवता वाचस्पतिमिश्रेण सांख्यतत्त्वकौमुद्यां विवृतः। आदाविन्द्रियेण घटादिविषयाणामालोचनमिति निर्विकल्पकवृत्तिविशेष उत्पद्यते। ततो मनसा अयं घटेति सङ्कल्पः सविकल्पकवृत्ति र्वा भवति। तत अयं ममानुकूलः प्रतिकूलो वेत्यभिमानं भवति,ततश्च इदं मम ग्राह्यं त्याज्यं वेत्यध्यवसायो निश्चयो वा भवति। सांख्यप्रवचनभाष्यकृता विज्ञानभिक्षुणा तु इन्द्रियैरेव निर्विकल्पक-सविकल्पकश्चेति वृत्तिद्वयस्योत्पत्तिर्भवतीत्यङ्गीक्रियते। एतेषु साक्षात् पुरुषार्थसाधकत्वात् प्रधानपुरुषयोश्च भेदप्रतिपादकत्वाद् बुद्धिरेव प्रधानम्-

'सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम्।।'[13]

ज्ञानसुखधर्माधर्मादीनि च बुद्धेरेव धर्मभूतानि। प्रकृतिसम्भवाद् बुद्धिः परिच्छिन्ना अनित्या च। अहङ्कारोत्पन्नं मन अपि परिच्छिन्नं भवति। सांख्ये तु मनस अणुत्वमप्यङ्गीकृतम्। अतो मनो मध्यमपरिमाणविशिष्टं भवति। बुद्धिर्यद्यपि अन्तःकरणं स्तथापि ज्ञानकृत्या-दीनामाश्रयत्वात् पुरुषस्य सर्वार्थसाधकत्वाच्च कर्ता भवति। इयं बुद्धिः स्वयमचेतनात्मकापि चेतनपुरुषसंयोगा-च्चेतनधर्मविशिष्टेति प्रतीयते। अतः सांख्ये बुद्धेर्मनसश्च जडत्वं परिच्छिन्नत्वमनित्यत्वञ्च सिद्धमेव। तयोर्मनस्तु सङ्कल्प-विकल्पादिव्यापारान् निष्पादयति बुद्धिस्तु ज्ञान-कृति-धर्माधर्मसंस्कारादीनामाश्रयरूपेण चिच्छयायोगात् कर्तृत्व-पदमधिकरोति।

समानतन्त्रत्वाद् यद्यपि सांख्ययोगयो र्मध्ये विमतिविशेषो नास्ति तथापि पातञ्जले बुद्धेश्चित्तस्य वा विभुत्वमङ्गीक्रियते। गगनादिवद्व्यापित्वाभावाच्चित्तस्य गगनादिविषयग्राहित्वमसम्भवम्। चित्तव्यापित्वमृते योगिनो युगपदेव बहुविषयकं ज्ञानं न सम्भवति। अतश्चित्तस्य बुद्धेर्वा विभुत्वं सिध्यति। ननु प्रधानादुत्पन्ना बुद्धिः कथं पुरुषवद्विभुर्भवेदिति चेदुच्यते कार्यत्वात् बुद्धिः परिच्छिन्नापि आकाशवद्व्यापिनी भवति। वस्तुतस्तु योगिनां युगपदेव

सर्वविषयसाक्षात्कारत्वात्तेषामत्तःकरणं नाणुत्वं भजते। नापीदं चित्तं मध्यमपरिमाणविशिष्टमपि भवेत् प्रलयकाले ध्वंसत्वाददृष्टादीनामाधारतया तस्याविद्यमानत्वात्। चित्त-वृत्तेर्निरोधस्तावद् योग इति कथितः पातञ्जले। चित्तवृत्तेर्निरोध इत्यत्र चित्तशब्देन मनोबुद्ध्यहङ्कार इति त्रिविधेषु अन्तःकरणेषु बुद्धिरेव प्रधाना, सा एव ग्राह्या। तत्र चित्तस्य विषयाकारपरिणाम एव चित्तवृत्तिशब्देनोच्यते। चक्षुरादिभ्यो नवद्वारेभ्यो मनो निरुध्यते। यमनियमादीनां नियतानुशीलनेन क्रमेण तन्मनः समाधिमार्गमधिरोहति। कुमारसम्भवे हिमालये अकालवसन्तागमनवर्णनावसरे महायोगिनो महेश्वरस्य तादृशी मूर्त्तिः कविना चित्रिता-

‘मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम्।।’[14]

असौ महेशः समाधिना निवर्तितसञ्चारं मन हृदयाधिष्ठाने संस्थाप्य अविनाशिनमात्मानमात्मनि प्रत्यक्षीकृतवान्। वशिष्टेन हृदयलक्षणमुक्तम्-‘यतो निर्याति विषयान् यस्मिंश्चैव प्रलीयते। हृदयं तद्विजानीयान्मनसः स्थितिकारणम्।’

मीमांसाशास्त्रे गुरुमते मनस्तु अणुपरिमाणं द्रव्यं सुखदुःखादिप्रत्यक्षाणां करणरूपान्तरिन्द्रियमिति स्वीकृत-मस्ति। प्राभाकरीया मीमांसका अपि नैयायिका इव ज्ञानमात्रं प्रति आत्ममनःसंयोगः कारणमिति मन्यन्ते।

सुखदुःखाद्यात्मविशेषगुणा मानसप्रत्यक्षवेद्या अपि ज्ञानं न तादृशं मानसप्रत्यक्षवेद्यं भवति। ज्ञातृ-ज्ञान-ज्ञेयमिति त्रिपुटिप्रकाशनपरत्वात् ज्ञानमात्रं स्वप्रकाशं भवति। उक्तञ्च मीमांसकप्रवरेण शालिकनाथेन प्रकरणपञ्जिकायाम्-सर्वेषामात्मविशेषगुणानामुत्पत्तिरेव मनसः सत्तास्वीकारे प्रमाणम्। बुद्धि-सुख-दुःखेच्छाद्वेषप्रयत्नादृष्टसंस्कारादीनां नवगुणानामुत्पत्तिरात्ममनसंयोगेनैव सम्पद्यते।[15] मन अस्ति, तदपि अणुपरिमाणविशिष्टं द्रव्यमिति विषयः प्राभाकरविजयनामके ग्रन्थे नन्दीश्वरेण प्रतिपादितः।[16] बुद्ध्यादयः पदार्था जन्याः। आत्मनि ते समवायिकारणरूपेण सन्ति। अतः कोऽपि द्रव्यान्तरसंयोग एव तस्य असमवायिकारणत्वेन स्वीकर्तव्यः। तद् द्रव्यान्तरमेव मनःशव्देनाभिधीयते। तन् मनो नित्यमिति स्वीकार्यम्,अन्यथा तस्यापि कारणान्तरापत्तिः स्यात्। नित्यद्रव्यमणु विभु वा भवति। मनसो विभुत्वं तु न युज्यते आत्ममनःसंयोगाभावात्।

भाट्टमीमांसकास्तु सुखदुःखादिसाक्षात्कारकरणमन्त-रिन्द्रियं मन इति मन्यन्ते। उक्तं कुमारिलभट्टेन- मनस इन्द्रियत्वात् सुखादीनां प्रत्यक्षज्ञानं भवति। मनसा सह संयुक्त आत्मा तांस्तु गुणान् जानन्ति।[17] भाट्टनये मनसो नाणुत्वमपि तु विभुत्वं स्वीकृतमस्ति। स्पर्शयोग्यत्वात् मन अपि आत्माकाशकालादिवद्विभु-इत्यनेनानुमानेन मनसो विभु-

त्वमतो निष्क्रियत्वमपि सिध्यति। मनसो विभुत्वाङ्गीकारात्तस्येन्द्रियत्वं न सिध्यतीति चेदुच्यते कर्णशङ्कुल्यवच्छिन्नाकाशोऽपि यथा श्रोत्रेन्द्रियं भवति तथैव देहावच्छिन्नं विभु मनोऽपि इन्द्रियं भवति। भणितं भट्टनारायणेन- मनो विभु परन्तु देहे एव तत् कार्यावहं भवेत्। शरीरावच्छिन्नस्य मनसो इन्द्रियत्वेऽपि रूपादिप्रत्यक्षे तत् चक्षुरादीनां बहिरिन्दियाणामधीनतया कार्यं सम्पादयति।[18] आत्मा इव मनश्चेद्विभु भवेत्तर्हि कर्मजन्यत्वात् आत्ममनःसंयोगो न सम्भवेत् इत्याशङ्कायामुच्यते भाट्टैर्जन्यसंयोग एव कर्मजन्यो भवति। आत्ममनःसंयोगस्तु नित्यः, न स कदापि कर्मजन्यो भवेत्। अतः आत्ममनसोः विभुत्वात्तयोः संयोगो युक्तियुक्तः। आत्मनः प्रत्यक्षं तु संयोगसम्बन्धात् मनसा एव सम्पद्यते। इदन्तु अवधेयं यद् विभु अपि मनःकरणत्वात् कर्त्तुरात्मनो विलक्षणं भवति।

उपनिषत्सु अद्वैतवेदान्तदर्शने च मनसो जन्यत्वं मध्यमपरिमाणविशिष्टत्वञ्च स्वीकृतमस्ति। तत्र मनसः करणत्वं कर्तृत्वञ्चापि सिद्धमेव। आम्नातञ्च बृहदारण्यकोपनिषदि- 'अन्यत्रमना अभूवं नादर्शनमन्यत्रमना नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति।'[19] आत्मस्वरूपप्रतिपादनावसरे ऐतरेयोपनिषदि निगदितं यद् येन जना रूपं पश्यन्ति, शब्दं शृण्वन्ति, गन्धं गृह्नन्ति,वाचं वदन्ति, रसमास्वादयन्ति न स आत्मा। चक्षुरादीनां

दर्शनादिव्यापाराः खलु आत्ममनसंयोगादेव सम्पद्यन्ते। मनस्तु तावद् हृदयमन्तःकरणञ्च। तदेतदन्तःकरणं चतुर्विधं मनोवुद्ध्यहङ्कारचित्तभेदात्। तेषान्तु अन्तःकरणानां प्रज्ञानादयः षोडशप्रकारा वृत्तयः सन्ति। सर्वास्ता वृत्तयः प्रज्ञानस्य नामधेयानि। प्रज्ञानमेव व्रह्म आत्मा। आम्नातमैतरेयोपनिषदि- 'यदेतद् हृदयं मनश्चैतत्, संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिः धृतिर्मतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति। सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति।'[20] एतेषामर्थास्तु शङ्करेण भाष्ये विवृताः- संज्ञानम्- चेतनभावः। आज्ञानम्- प्रभुभावः। विज्ञानम्- कलादिविशेषज्ञानम्। प्रज्ञानम्- प्राज्ञता, तात्कालिकी प्रतिभा च। मेधा- ग्रन्थधारणसामर्थ्यम्। दृष्टिः- इन्द्रियद्वारेण विषयोपलब्धिः। धृतिः-धारणशक्तिः, येन अवसन्ने शरीरे इन्द्रियाणामुत्थानं भवति स मनोधर्म एव धृतिः। मतिः- मननम्। मनीषा- मननस्वातन्त्र्यम्। जूतिः- चित्तावसादभावः, योगादिजनितं दुःखं वा। स्मृतिः- स्मरणम। सङ्कल्पः- नीलपीतादिरूपेण वस्तुवोधः। क्रतुः-अध्यवसायो निश्चयो वा। असुः- प्राणवृत्तिः, जीवनप्रयत्नः। कामः- विषयभोगाभिलाषः। वशः- स्त्रीसङ्गाभिलाषः, स्पर्शादीनां भोगाभिलाषो वा।

तत्र मनः सूक्ष्मदेहान्तर्गतसूक्ष्मभौतिकपदार्थत्वेन गृहीतमस्ति। स्थूलदेहाश्रितत्वात स्थूलशरीरेण सह मनसो

निविडः सम्बन्धोऽस्ति। अन्नादिभोज्यवस्तूनां सूक्ष्मतमभागेन यथा स्थूलदेहस्य पुष्टिर्भवति तथैव मनसोऽपि पुष्टिर्जायते। छान्दोग्योपनिषदि निगदितं यद् गृहीतमन्नं त्रेधा परिणमति-तेषु यः स्थूलतमो भागः स विष्ठा भवति, यो मध्यमभागः स मांसं भवति यश्चानिष्ठो भागः सूक्ष्मतमभागः स मनो भवति- 'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति, यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः।'[21]

मनसः सद्भावमङ्गीकुर्वता तत्रभवताचार्येण शङ्करेण विवृतं यद् आत्मन उपाधिभूतं तदन्तःकरणं मनो-बुद्धिविज्ञानचित्तादिभिर्विविधैर्नामाभिर्व्यपदिश्यते। क्वचिद्वा संशयादिवृत्तिविशिष्टं मनो निश्चयादिवृत्तिविशिष्टा च बुद्धिरित्यपि कथ्यते। अत अवश्यस्वीकार्यमिदं मनः। अनङ्गीकृते त्वन्तःकरणात्मके मनसि नित्योपलब्धेः नित्यानुपलब्धेर्वा आपत्तिः स्यात्। यत उपलब्धि-साधनानामात्मेन्द्रियविषयाणां सन्निहितत्वात् सदैव विषयोपलब्धेरापत्तिर्भवेत्। किञ्च, कारणसन्निधानादपि फलाभावे विषयानुपलब्धिः प्रसज्येत। न त्वेवंविधा सततविषयोपलब्धिः सततविषयानुपलब्धिर्वा दृश्यते। अतो यस्य सन्निधानाद् विषयोपलब्धिरसन्निधानाच्च विषयानु-पलब्धिर्जायते तदेव मनः। भामतीभाष्येऽपि अस्य मनस अन्तरिन्द्रियत्वमङ्गीकृतम्। उक्तञ्च विद्यारण्य-स्वामि-महाभागेन-

'मनो दशोन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम्।
तच्चान्तःकरणं वाह्येष्वस्वातन्त्र्याद्विनेन्द्रियैः।।'[22]

वृत्तिभेदाद्व्यापारभेदाद्वा एतदन्तःकरणं मनोबुद्धिचित्ता-हङ्कारादिभिर्नामभिः कथ्यते इति पूर्वमुक्तम्। तेषु संशयसङ्कल्पकारि भवति मनः। निश्चयकारिणी खलु बुद्धिः। स्मरणकारि चित्तम्। अहं ममेत्यभिमानकारी चाहङ्कार इति विवेकः।

बौद्धनये मन इति द्रव्यं द्वादशायतनेष्वन्यतममिति परिगण्यते। तत्र ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं मनो बुद्धिश्च मिलित्वा द्वादशायतनं भवति। बौद्धास्तु एवं मन्यन्ते यन्मनो न भौतिकं द्रव्यं नाप्यतिरिक्तं किञ्चित् तत्त्वम्। इदं तु विज्ञानपरिणामविशेषमिति। उक्तञ्च दार्शनिकप्रवरेण वसुबन्धुना-विज्ञानषट्केषु अतीतानन्तरविज्ञानमेव मनः।[23] तत्र षड्-विज्ञानं नाम- चक्षुर्विज्ञानम्-श्रोत्रविज्ञानम्-रसनविज्ञानम्-घ्राणविज्ञानम्-स्पर्शनविज्ञानम्-मनोविज्ञानं च इति। अतो बौद्धनये मनः खलु विज्ञानस्यावस्थान्तरमात्रम्। विज्ञानस्य क्षणिकत्वान्मनोऽपि क्षणिकम्। तत्र चक्षुरादिविज्ञानपञ्चकस्याश्रयत्वात् चक्षुरादीनि पञ्च आयतनानि(इन्द्रियाणि) सन्ति। एतानि चक्षुरादीनीन्द्रियाणि वर्तमानविषयग्राहीनि भवन्ति, केवलं मनः अतीतानगतविषयग्राहि। चक्षुरादीनि रूपादिनिर्दिष्ट-

विषयग्राहकानि मनस्तु अनियतविषयग्राहकमिति तेषां विवेकः।[24]

जैनदर्शने मनः करणमपि अनिन्द्रियम् अर्थात् ईषदिन्द्रियं भवति। इन्द्रियादीनां रूपादिविशेषविषय-ग्रहणसामर्थ्यात् मनसस्तु सकलविषयग्रहणसामर्थ्याच्च तस्य अनिन्द्रियत्वं सिध्यति। अनिन्द्रियमपि मनः अन्तःकरणम्। उक्तञ्च तत्त्वार्थवृत्तिग्रन्थे[25] - न इन्द्रियम्, अत अनिन्द्रियम्। अनेन मनसः इन्द्रियत्वं प्रतिषिध्यते। तेन मनः कर्त्तुरात्मनः करणमिति ज्ञातव्यम्। बाह्येन्द्रियैरगृह्यमानत्वान्मनसः अन्तःकरणत्वं सिध्यति। तत्र बाह्यविषयाणां प्रत्यक्षमुभयजन्यं भवति – इन्द्रियजन्यम् अनिन्द्रियजन्यं च। तत्र मनोजन्यं ज्ञानसुखादीनां यन्मानसप्रत्यक्षं तदेव अनिन्द्रियजन्यं भवति। आत्मनः प्रत्यक्षमपि मानसप्रत्यक्षम्। अतः अनिन्द्रियजन्यम्। वस्तुतस्तु बहिरिन्द्रियजन्यं प्रत्यक्षं विना सर्वं लौकिकं ज्ञानम् अतिन्द्रियजन्यं मानसं वा भवति। अतः स्मृत्यादिसंवेदनमपि मानसज्ञानं भवति।[26] जैननये मनस्तु द्विविधं भवति। द्रव्यमनः भावमनश्चेति। द्रव्यमनः पुद्गलारब्धमर्थात् जडपरमाणुजन्यम्। गुणदोषविचारस्मरणप्रणिधानादिष्वभि-मुखरूपेण स्थितस्यात्मनः अनुग्राहकाः केचन पुद्गला मनो-रूपेण परिणम्यन्ते; तेन द्रव्यमनः पौद्गलिकमित्युच्यते। इदन्तु द्रव्यमन अन्तःकरणत्वेन व्यवह्रियते। ज्ञानसुखादिप्रत्यक्षस्य कारणं भवतीदमन्तःकरणरूपम् द्रव्यमनः। जैनदर्शने अस्य

द्रव्यमनसः मध्यमपरिमाणवत्त्वमनित्यत्त्वञ्च प्रसिद्धमस्ति। अर्थग्रहणशक्तिस्वरूपं यन्मनस्तत्तु भावमन इति कथ्यते। जाड्यरहितमिदं भावमनः चेतनपर्यायभुक्तं भवति। अतो मोक्षदशायां द्रव्यमनसः अभावेऽपि आत्मना सह अस्य भावमनसः अवस्थानादात्मनो ज्ञानप्रवाहः अव्याहतरूपेण प्रचलति।

चार्वाकदर्शने देहातिरिक्तस्यात्मनः सद्भावः सर्वथा अस्वीकृतः। चार्वाकाः शरीरे चैतनस्याधिष्ठानमङ्गीकुर्वन्ति, किन्तु शरीरनाशात्तस्य चैतन्यस्यापि नाशो भवति इत्यतो न तच्चैतन्यं मनःपदवाच्यं भवति। नापि बुद्ध्यादीन्य-न्तःकरणानि तैः प्रतिपाद्यविषयत्वेन परिगणितानि।

शाक्तदर्शने कथितं यदात्मा एव मनः। उक्तञ्च - आत्मा वै मनः, मनस्तु नान्यत् किञ्चित्। मनः खलु चलमानं चैतन्यम्, आत्मा तु निश्चलमिति। स्फूर्तिहेतोः सावरणविनाशो नाम चैतन्यस्य चलनम्। ज्ञानविषये मनः करणं भवति, न कर्ता। आत्मा चेन्मनोरहितस्तर्हि अचेतनादात्मनः पार्थक्यं न तस्य केनाप्युपायेन निष्पन्नं भवेत्।[27] अत्र मनः आत्मनः अवस्थाविशेषो ज्ञानकरणञ्चेति स्वीकृतमस्ति। चिदात्मनः अवस्थाविशेषो मनः दशाभेदाद्विधा विभज्यते – प्रकाशः, अमर्शो विमर्शो वा। बाह्यार्थेषु मनसो विश्रान्तिरेव प्रकाशः। स्वात्मनि तदर्थविचारः विमर्शः। वस्तुनो भेदाप्रतीतिवशात्

प्रकाशो निर्विकल्पः, शब्दसम्भेदात् मिश्रणाद्वा विमर्शः सविकल्पकः।[28] उक्तञ्च शाक्तदर्शने – यदा मनो वेद्यविनिर्मुक्तं भवति तदा वित्तिस्वरूपत्वं (चैतन्यस्वरूपत्वं) भजते।[29]

प्रत्यभिज्ञेति काश्मीरीयशैवदर्शने चितेः (चैतन्यस्य) अवस्थाविशेष एव चित्तं मनो वेति कथ्यते। क्षेमराजेनोक्तं यत् यदि चितिश्चेतनपदात्तथा चैतन्यस्वरूपादवरूढं स्खलितं वा सत् चेत्यविषयेन संकोचदशां प्राप्नोति तदा तदेव चित्तमित्युच्यते।[30] योगवाशिष्ठरामायणे[31] मनसो लक्षणप्रसङ्गे भणितं यत् सर्वव्यापी नित्योदितमहावपुः अर्थात् स्वप्रकाशचैतन्यात्मकः आत्मा यदा मननशक्तिमधिकरोति तदा स एव मन इति कथ्यते।

दर्शने मनः प्रतिपाद्यविषयेषु अन्यतमं, साहित्ये तु तत्प्रधानविषयत्वेन प्रतिपाद्यते। मानवमनस्तत्त्वचित्रणमेव भवति साहित्यस्य मुख्यो विषयः। मनुष्याणां सुखदुःखादयो ये खलु भावाः सन्ति तेषां रम्योपाख्यानद्वारेण निपुणतया वर्णनमेव क्रियते साहित्ये। साहित्यं मुख्यतया मनोविषयकमित्यत्र नास्ति केषामपि काचन विप्रतिपत्तिः। प्राचीनभारतीयवाङ्मये साहित्यं साधारणतया काव्यनाम्ना कथितमासीत्। काव्यस्यापि विभागाः श्रव्यदृश्यादय आसन्। यद्यपि साधारणतया काव्ये मन एव प्रसरति तथापि विशेषेण

दृश्यकाव्येषु मानवमनोवृत्तेर्विचित्रा वर्णना प्राप्यते। तदिदं मनः काव्ये चेतश्चित्तम्- हृदयं- मानसमित्यादिभिः बहुभिः नामभिर्व्यपदिश्यते।

अश्वघोषप्रणीते बुद्धचरितमहाकाव्ये जराग्रस्तं पीडितञ्च मनुष्यादिकमालोक्य राजकुमारस्य सिद्धार्थस्य मनसि संसारविरागवासना समुदिता। तदा सिद्धार्थस्य मनसि संसारं प्रत्यासक्तिं जनयितुं ये खलूपायाः पित्रा शुद्धोदनेनावलम्बितास्ते सर्वे विफलत्वं गताः। सिद्धार्थस्य मनः परिव्राजकत्वं ग्रहीतुं समुद्यतं संसारपाशं छित्त्वा। एषा एव मनसो विचित्रा गतिः। सौन्दरनन्देऽपि पत्नीप्रेमपरिपूरितचित्तो नन्दः सङ्कल्पदार्ढ्यात् तं प्रेमपाशं छित्त्वा मुक्त्यै मनो निवेशयामास। स्नेहाद्दौर्बल्यादनुरागाद्वा सङ्कल्पान्न विरराम असौ नन्दः - 'क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ?'[32] को वा जानाति मनस ईदृशीं क्रियाम् !

प्रतिमानाटके भासेन कैकेयीचरित्रे मनसो विचित्राः कृतयः प्रदर्शिताः। जगज्जानाति यत् कैकेयी स्वपुत्राय भरताय दशरथाद् राज्यभारं निनाय शोकाहतमपि तमवज्ञाय। एतदर्थं सर्वे तु तामपवदन्ति। किन्तु कैकेयी स्वस्वामिन-मृषेरभिशापात् शीघ्रं मोक्तुं, तस्य मनोवेदनाञ्च अपनोत्तुं विचष्टे। उक्तवती कैकेयी- 'जात! एतन्निमित्तमपराधे मां निक्षिप्य पुत्रको रामो वनं प्रेषितः,न खलु राज्यलोभेन।

अपरिहरणीयो महर्षिशापः पुत्रविप्रवासं विना न भवति।’[33] अनेन आपातक्रुरकर्मणा स्वपुत्रादपि दारुणमवमाननं त्वया सोढम्। शल्यं खलु निदारुणं हृदये वहन्ती सा सर्वेषां जुगुप्सापात्री जाता। ‘माताप्यमाता’ आसीत् सा भरतस्य, प्रकृतं ज्ञात्वा तु तस्यै जनन्यै प्रणतिं निवेदयामास असौ रामानुजः।

स्वप्नवासवदत्तानाटकस्य वासवदत्तायामपि परिलक्ष्यते सुतीव्रं मानसिकद्वन्द्वम्। आवन्तिका वेषधारिणी उदयनमहिषी वासवदत्ता पद्मावत्याः गृहमधितिष्ठति। अवगतवती सा यत् पद्मावत्या सह तस्याः भर्त्तुरुदयनस्य परिणयो भविष्यतीति। चेटी वासवदत्तायै निवेदितवती यद् उदयन-पद्मावत्योः विवाहार्थं वासवदत्तया एव माल्यं ग्रथनीयम्। विज्ञापयति चेटी- ‘अस्माकं भट्टिनी भणति- महाकुलप्रसूता स्निग्धा निपुणेति इमां तावत् कौतुकमालिकां गुम्फत्वार्या।’[34] स्वीयपत्या सह नार्यन्तरस्य विवाहमाल्यं त्वयैव गुम्फनीयमिति दुःखदायकमेतत् कार्यम्। अत्यसहनीया मनोव्यथेयम्। दारुणमनोवेदनाहता वासवदत्ता केवलमिदमुवाच रहसि दीर्घं निःश्वस्य- ‘अहो अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः।’[35] तद्विरहपर्युत्सुकस्य उदयनस्य कृते वासवदत्ताया गाढोद्वेगो लक्ष्यते। पद्मावती विरहपीडितस्य तस्य विश्रामस्थानभूता भवत्विति कामयतेतरां सा। दैहिकसौन्दर्यदृष्ट्या वासवदत्ता नूनं

लावण्यवती; हृद्गतसम्पद्दृष्ट्या तु सा लावण्यवतीषु श्रेष्ठतमेति प्रतीयते। दारुणमनोद्वन्द्वेन उदयनोऽपि विदीर्णहृदयो जातः। पद्मावतीं परिणीतवान् वत्सराजः। वासवदत्तां तु न कथमपि विस्मर्त्तुं शशाक सः। अनेन पद्मावत्या मनोविकारः सम्भवेत्। जानन्नपि एतत् सर्वमुदयनो न समर्थो वासवदत्तां विस्मर्त्तुम्,नापि तस्य हृदयं तस्यां पद्मावत्यां स्निह्यति सम्पूर्णतया। दारुणः खल्वेष चित्तदाहः। विदूषकमुद्दिश्य भणति वत्सराजः-

'पद्मावती वहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति।।'[36]

अतीव मधुरा तावद्वासवदत्तायाः स्मृतिस्तस्मिन्। सततं वासवदत्तागतमानसत्वादसौ स्वप्ने तामावन्तिकामवलोक्य व्याकुलः सञ्जातः समुद्रगृहे। आलापोऽपि अभूत् तया सहोदयनस्य स्वप्ने। स्वप्नदर्शनात् कथनाच्चोच्छ्वसितमानसो वत्सराजः कामयते यत् यदि सः स्वप्नः स्यात्तर्हि मास्तु तत्र जागरणं कदापि, भ्रान्तिश्चेदेषा भ्रान्तिरस्तु सा चिराय-

'यदि तावदयं स्वप्नो धन्यमप्रतिवोधनम्।
अथायं विभ्रमो वा स्याद्विभ्रमो ह्यस्तु मे चिरम्।।'[37]

पञ्चरात्रनामके समवकारे महाभारतीयदुर्योधनस्य हृदयपरिवर्तनमस्माभिः प्रत्यक्षीक्रियते। दुर्योधनेन यज्ञः समायोजितः। दीक्षितो दुर्योधनः स्वगुरवे द्रोणाय दक्षिणां

दातुमैच्छत्। आदौ दक्षिणां ग्रहीतुं नेच्छन्नपि भीष्मेण प्रतिवोधितो द्रोणो दक्षिणारूपेण दुर्योधनाय पाण्डवेभ्यो राज्यार्धप्रत्यर्पणात्मकं दानं ययाचे। मातुलेन शकुनिना वारितोऽपि दुर्योधनस्तां दक्षिणां दातुमङ्गीचकार। शकुनिना तु तत्र शर्तः कश्चनारोपितः- 'यदि पञ्चरात्रेण पाण्डवानां प्रवृत्तिरुपनेतव्या राज्यस्यार्धं प्रदास्यति किल।'[38] पुनरपि भीष्मेण प्रतिवोधितो द्रोणो दत्तकालेन पाण्डवानां वृत्तमानेतुं प्रतिशुश्राव। इत्यवसरे दूतः समायातः। ज्ञातं तन्मुखात् यत् विराटराज्ये अज्ञातकुलशीलेन शत्रुणा कीचकादयो भ्रातरः सर्वे हताः। श्रुत्वा तु दूतवार्तां सर्वम् अवगतवान् भीष्मः। तदा दुर्योधनमुवाच भीष्मो यदामन्त्रितोऽपि विराटराजो यज्ञे नायातः। अनेन तेन दुर्योधनः अवमानितः। अतो भीष्मस्योपदेशानुसारतः स्थिरीकृतमिदं यत् विराटराजस्य गोधनमपहर्त्तव्यमिति। युद्धं संघटितम्। विराटराजात्मजोत्तरो वृहन्नलां पुरस्कृत्य सारथीकृत्य च कौरवैः सह भीषणं युद्धं चकार। तस्मिन् युद्धे कौरवाः पराभूताः। कौरवपक्षीयो योद्धा अर्जुनतनयः अभिमन्युः केनापि बलशालिना पुरुषेण गृहीतः इत्यनेन भीष्णद्रोणौ तं बलशालिनं पुरुषं भीमसेनमिति निश्चित्य सूतेन समानीते वाणे अर्जुनस्य नामाक्षराण्यनुवाच्य च दक्षिणादानार्थं दुर्योधनाय ययाचाते। क्षणे तस्मिन् चोत्तरा-अभिमन्योर्विवाहवृत्तान्तमादाय विराटराजतनय उत्तरः समुपस्थितः। समुद्घोषितश्च दुर्योधनेन तदा –

'वाढं दत्तं मया राज्यं पाण्डवेभ्यो यथापुरम्।
मृतेऽपि हि नराः सर्वे सत्ये तिष्ठन्ति तिष्ठति।।'[39]

ईदृशी मानसिकी स्थितिः यदि दुर्योधनस्य महाभारते प्रदर्शितासीत्तर्हि प्रभूतलोकक्षयकरो भारतयुद्धो न संघटितः स्यात्। नायमस्माकं चिरज्ञातदुर्योधन, अयन्तु सुयोधन इति प्रतीयते।

ऊरुभङ्गेऽपि महाभारतीयो दुर्योधनः कविना सुयोधनीकृतः। भारतयुद्धस्यान्तिमदशायां भीम-दुर्योधनयोर्मध्ये गदायुद्धं संवृत्तम्। दुर्योधनस्य भीमप्रहारेण भीमसेनो भूमौ निपपात। आशङ्कते तदा भीमसेनो दुर्योधनात् पुनः प्रहारम्। तदवस्थं भीमसेनमवलोक्य हसन्नवदद् दुर्योधनः- 'न तु भीम! दीनं वीरो निहन्ति समरेषु भयं त्यजेति'[40] इति। नाघातः कृतः दुर्योधनेन निपतिते भीमसेने। भीमसेनेन पुनः न सा युद्धनीतिः पालिता। उल्लङ्घ्य गदायुद्धरीतिं भीमसेनेन दुर्योधनस्याधोदेशे प्रचण्डः प्रहारः कृतः। तेन दुर्योधनो भूमौ पपात। प्रतीयते यच्चित्तवित्तेन ऋद्धतरः खलु दुर्योधनो हीनतरश्च भीमसेनः। भूमौ निपतितस्य दुर्योधनस्याङ्कमुपवेष्टुमिच्छति तदा तदात्मजो बालको दुर्जयः। दारुणमनोव्यथाविद्धः पिता दुर्योधनस्तं वारयति। जिज्ञासते दुर्जयो जनकम् - 'अङ्क

उपवेशं किं निमित्तं त्वं वारयसि?' आह च शोकातुरो दुर्योधनस्तं –

'त्यक्त्वा परिचितं पुत्र! यत्र तत्र त्वयास्यताम्।
अद्य प्रभृति नास्तीदं पूर्वभुक्तं तवासनम्।।'[41] इति।

पराभूतं परमस्नेहास्पदं पुत्रं द्रष्टुमागतो जनको धृतराष्ट्रः, समागता जननी गान्धारी, समागतञ्च दुर्योधनस्य पत्नीद्वयम्। दुर्योधनं तदवस्थं दृष्ट्वा वदति धृतराष्ट्रः – कथमहं शोकान्मुक्तो भविष्यामि? मम तु सर्वमवसितम् –

'यस्य वीर्यबलोत्सिक्तं संयुगाध्वरदीक्षितम्।
पूर्वं भ्रातृशतं नष्टं त्वय्येकस्मिन् हते हतम्।।'[42] इति।

ज्येष्ठपुत्रं तं मरणोन्मुखमालोक्य भृशं विललाप गान्धारी। विलपन्तीं जननीं प्रबोधवाक्येन परितुष्य प्राह दुर्योधनो यद् यदि पुण्यं किञ्चिदहं कृतवान् तर्हि जननान्तरे त्वमेव मे माता भूयाः-

'नमस्कृत्य वदामि त्वां यदि पुण्यं मया कृतम्।
अन्यास्यामपि जात्यां मे त्वमेव जननी भव।।'[43] इति।

दृश्यते यत् मानवचरित्ररचनाचतुरेण महाकविना भासेन महाकाव्यद्वयस्य स्वनिर्वाचितेषु चरित्रेषु मानसिकद्वन्द्व-

संघातादीनां विचित्राः क्रियाः प्रदर्शयता तेषां तासाञ्च चित्तैश्वर्यप्रतिपादनेन ते ताश्च किञ्चित् पृथक्तया चित्रिताः।

शाकुन्तले नायकनायिकयोरन्योन्यं हृदयनिवेदनं मुख्यविषयत्वं भजते। राजा दुष्यन्तो मृगयार्थमागत्य तपोवनकन्यायाः हृदयमहरत्। न तस्मिन् मनोवृत्तिनियन्त्रणं कथमपि पदं करोति। प्रथमाङ्कस्यान्ते आतिथ्यं सम्पाद्य उटजं प्रति गच्छन्तीं मुनितनयामुद्दिश्य असंस्थितचित्तो राजा वदति –

'गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य।।'[44] इति।

शकुन्तला अपि न सम्यक् सर्वं विचार्य दुष्यन्ते हृदयं दत्तवती। पतिगतभावनाभारावनतहृदया सा स्वकर्तव्यमपि विसस्मार। अतो दुर्वाससः शापेन तस्यां दुर्भाग्यमापतितम्। पञ्चमाङ्के शकुन्तलायाः प्रत्याख्यानदृश्ये दुष्यन्तस्य मानसिकद्वन्द्वं सुतीक्ष्णं सञ्जातम्। शापप्रभावाद्विस्मृतिमापन्नो राजा शकुन्तलां पत्नीत्वेन ग्रहीतुं न शक्नोति, नापि मोक्तुं क्षमते-

'इदमुपनतमेवं रूपमक्लिष्टकान्तिः
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन्।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम्।।'[45] इति।

विक्रमोर्वशीयनाटके ऊशीनरीनिबन्धचित्तोऽपि पुरुरवा ऊर्वश्यां प्रेमासक्तोऽभवत्। अत्रापि मनोगतद्वन्द्वेन दीर्णः पुरुरवा। मालविकाग्निमित्रनाटके नासीत् महिषीद्वयस्य प्रेम्नि काऽप्यपूर्णता तथापि मालविकामुकुललोलुपतया राजा अग्निमित्रः स्वकृतहृदयशल्येन नितरां विद्ध आसीत्। अग्निमित्रो मन्यते यन्नार्यस्तु चतुरा भवन्ति। अत इरावती तस्य मुखमवलोक्य इमं तु विषयं ज्ञातुं शक्नुयात् यद् राजा अपि अन्यनारीसंक्रान्तहृदयः सञ्जातः। वदति राजा विदूषकमुद्दिश्य - 'वयस्य! निसर्गनिपुणाः स्त्रियः। कथं मामन्य-संक्रान्तहृदयमुपलालयन्तमपि ते सखी न लक्षयिष्यति?'[46] इति। ज्ञायते अस्मात् यन्मनुष्य-हृदयकथाकोविदा भवन्ति कवयः।

संस्कृतसाहित्ये उत्तररामचरितमेकमपूर्वमप्रतिमं मनस्तत्त्वमूलकं नाटकम्। सीतायाः पातिव्रत्ये नास्ति कोऽपि संशयलेशो रामचन्द्रस्य। तस्यां तु भृशं स्निह्यति रामस्य मानसम्। सा खलु जानकी रामस्य द्वितीयहृदयमासीत्। लोकापवादविद्धो रामभद्रः राजकर्तव्यतया प्राणेभ्योऽपि प्रियां तां गृहतः परित्यक्तवान्, न तु मनसो जहौ सीतां कदापि सः - 'कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहीसुता मनस्तः।'[47] इति। अनेन क्रूरकर्मणा तस्मिंस्तु रामभद्रे सर्वेषामपवादो पुञ्जीकृतः। रामस्य एषा खलु मनोवेदना सामाजिकानामश्मतुल्यहृदयमपि दलति –

‘दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते
वहति विकलः कायो मोहनं न मुञ्चति चेतनाम्।
ज्वलयति तनुमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्।।’[48]

निष्कारणपरित्यागयातनया विदीर्णहृदयापि सीता पत्नीवियोगवेदनाविधुरं रामचन्द्रं विलपन्तमालोक्य नितरां सन्तप्ता जाता। सीतायाः मनोव्यथा प्राकाश्यं लेभे तटिन्यास्तमसाया वचसि –

‘तटस्थं नैराश्यादपि च कलुषं विप्रियवशा-
द्वियोगे दीर्घेऽस्मिञ् झटिति घटनात् स्तम्भितमिव।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव।।’[49] इति।

कौशल्या वधूं सीतां पुत्रीमिति मन्यते। सीताहीनामयोध्यां गन्तुं न तस्यां मनः कथमपि प्रसरति। सीतारहितस्य रामस्यापि दशां स्मरन्ती सा हृदयशल्येन गाढेन बिद्धा। स्वकर्तव्यमपि स्थिरीकर्तुं न शशाक रामजननी। आह- ‘जाते जानकि! किं करोमि? दृढवज्रलेपप्रतिबद्धनिश्चलं हतजीवितं मां मन्दभागिनीं न परित्यजति।’[50] इति। लवेन रामचन्द्रस्य अश्वो बद्धः। अतः अश्वरक्षकमुख्येन लक्ष्मणात्मजेन इक्ष्वाकुवंशीयेन चन्द्रकेतुना सह तस्य संग्रामः संवृत्तः। वीरस्तु वीरान्तरमभ्यसूयति इति प्रसिद्धेयं प्रथा क्षत्रियसमाजे। नेदं

केवलं क्षत्रियप्रशस्तं कर्म, अपि तु एष एव मानवमनोधर्मश्चिरन्तनः। उक्तञ्च रामचन्द्रेण –

> 'न तेजस्तेज्सवी प्रसूतमपरेषां विषहते
> सत्यस्य स्वोभावः प्रकृतिनियतत्वादकृतकः।
> मयूखैरश्रान्तं तपति यदि देवो दिनकरः
> किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति।।'[51]

मातृस्नेहः संसारेऽस्मिन् अपूर्वः कोऽपि पदार्थः। कन्यायाः सीतायाः मनोदुःखेन जननी धरित्र्यपि संविग्ना। तथापि मातृस्नेहः सर्वसन्तापहारकः। लघुकर्त्तुं समर्थः सः सर्वं दुःखभारम्। मानसमोहग्रन्थिरयं खलु जीवसाधारणः। कथितञ्च देव्या भागीरथ्या- 'सर्वसाधारणो ह्येष मनसो मोहग्रन्थिश्चेतनावतामुपप्लवः संसारतन्तुः।'[52]

विचारयामस्तावदधुना महावीरचरितकथाम्। शिवशिष्यः परशुरामः स्वभावकोपन ऋषिः। श्रुतं तेन यद्दशरथतनयेन रामचन्द्रेण हरधनु भग्नः। रावणस्य मन्त्री माल्यवान् परशुरामस्य क्रोधोद्दीपनार्थं तं ज्ञापयामास यदनेन कर्मणा रामेण भगवतः शङ्करस्यावमाननं कृतम्। अनेन उद्रिक्तक्रोधः परशुरामो रामेण सह युद्धं कर्तुं मिथिलामागतः। रामस्य सौम्यगम्भीरां मधुराकृतिञ्चालोक्य अश्मसदृशहृदयः परशुरामोऽपि प्रसन्नोऽभूत्। रम्योऽयं रामस्तेन हन्तव्येति

मनोद्वन्द्वेन विक्षतहृदयः सञ्जात असौ परशुरामः। धिक्कृतं तेन तदा स्वमनसि वीरस्य निर्घृणमाचरणम्-

'चञ्चत् पञ्चशिखण्डमण्डनमसौ मुग्धप्रगल्भं शिशु-
र्गम्भीरं च मनोहरं च सहजश्रीलक्ष्मरूपं दधत्।
द्राग्दृष्टेऽपि हरत्ययं मम मनः सौन्दर्यसारश्रिया
हन्तव्यस्तु तथापि नाम धिगहो वीरव्रतक्रुरताम्।।'[53]

मृच्छकटिकप्रकरणे नायकचारुदत्तस्य हृदये सामाजिकनैतिकसंघातयोरपूर्वं चित्रं चित्रितमस्ति। अधुना विगतविभवोऽपि सद्गुणभूषितश्चारुदत्तः पतिव्रताया पत्न्या धूतायाः प्रेम्ना परिपूर्णहृदयः प्रसन्नहृदयश्चासीत्। पुत्रवतश्चारुदत्तस्य हृदयं तथापि गणिकायां वसन्तसेनायां रेमे। वित्तवती प्रधाना नगरनटी नगरजनकामनीया सा स्वपरिचयदानावसरे चारुदत्तात्मजं रोहसेनमाह- 'ते पितुर्गुणनिर्जिता दासी।'[54] चारुदत्तः पतिव्रतां तां धूतामवज्ञाय कथं वसन्तसेनां परिणेष्यति? कथं वा वसन्तसेना सामाजिकीं मर्यादामगणयित्वा, सम्पत्स्पृहां वर्जयित्वा, शकारादीननायासेनावज्ञाय, मृत्युभयं विहाय च गत्तवित्तमपि सकलगुणाश्रयभूतं पूतचित्तं चारुदत्तं पतित्वेन समालिङ्गति? अहो दुरवगाहा विधातुः प्रवृत्तिः! तथापि तयोर्मेलनमभूत्। अहो विचित्रो मानवमनोभावः! तथापि वसन्तसेनया समुज्झिता वाराङ्गनावृत्तिः। चारुदत्तस्य प्रेमपीयूषवर्षैः

सुम्नाता शकारावग्रहपीडिता वसन्तसेना। अनेन लब्धं च नवजन्म तया चारुदत्तानुरक्तया वारवनितया।

मुद्राराक्षसे मुख्यं पात्रद्वयमस्माकं नयनपथं पान्थायते- चाणक्यो नन्दामात्यो राक्षसश्च। चन्द्रगुप्तस्य गुरुश्चाणक्यः सर्वं वित्तमाप्तुं सकलराजकीयक्षमतामधिकर्त्तुं समर्थोऽपि कुटिरवासाय साधारणजीवनयापनाय च रोचते। अतिसाधारणमासीदस्य धनहीनस्य ब्राह्मणस्य वासगृहम्। राजमन्त्रिणश्चाणक्यस्य ध्वस्तप्रायं कुटिरमालोक्य विस्मयविमूढो जातः कञ्चुकी- 'अहो राजाधिराजमन्त्रिणो विभूतिः। तथाहि-

उपलशकलमेतद् भेदकं गोमयानां
वटुभिरुपहतानां वर्हिषांस्तूपमेतत्।
शरणमपि समिद्भिः शुष्यमाणाभिराभि
विनमितपटलान्तं दृश्यते जीर्णमेतत्।'[55]

सांसारिकदृष्ट्या रिक्तोऽपि चाणक्यः स्वाभिमान-सम्पदा समृद्धः। धीभूषणभूषितोऽयं दरिद्रो ब्राह्मणो न कदाप्यात्मार्थं यतमान आसीत्,नन्दकुलतरोरुन्मूलनं कृत्वा चन्द्रगुप्ताय निष्कण्टकराज्यप्रतिष्ठा तस्य प्रधानं लक्ष्यम् । वहिः दृढमनोवृत्तिसम्पन्नोऽपि चाणक्य हृदयेन असङ्गः। एष तस्य मानससंघातः। नन्दामात्यस्य राक्षसस्य

प्रभुभक्तिर्प्रगाढा। नन्दराज्यरक्षणार्थं तेन उपाया बह्वो गृहीतास्तथापि न तद्रक्षितुं समर्थोऽभवत् सः। या नीतिः राक्षसेन शत्रुविनाशाय प्रयुक्ता सा मित्रविनाशाय प्रवृत्ता इति प्रतीयते। किमधिकम्, प्रियमित्रं चन्दनदासं रक्षितुमपि स असमर्थः। तेनास्थिरमना किंकर्तव्यविमूढश्च जातो राक्षसः-तत् किमिदानीं मन्दभाग्यः करवाणि?

'किं गच्छामि तपोवनं न तपसा शाम्येत् सवैरं मनः
किं भर्तॄननुयामि जीवति रिपौ स्त्रीणामियं योग्यता।
किंवा खड्गसखः पताम्यरिवले नेदं न युक्तं भवेत्
चेतश्चन्दनदासमोक्षरभसं रुन्ध्यात् कृतघ्नं न चेत्।'[56]

तस्य मनसि समुदितः संशयः-किं तपोवनं यामि? न,प्रतिहिंसापूर्णं मे हृदयम्, तत्र न शान्तिमधिगमिष्यति। किं प्रभुं मरणेनानुगच्छामि?न,रिपौ जीवति सा खलु चेष्टा स्त्रीसम्मता भवेत्। तर्हि किं कृपाणहस्तः सन् शत्रुसैन्यमध्ये प्रविशामि? इदमेव सङ्गतमभविषद् यदि चन्दनदासस्य मुक्त्यै व्यग्रं मे कृतघ्नं मनो न रुन्ध्यात्। अस्मात् प्रतीयते यदस्य मानसिकी स्थितिरस्थिरत्वं भजते एव।

प्रवोधचन्द्रोदयनाटके मन एव पात्रत्वेनोपस्थापितम्। दार्शनिकभावसमृद्धेऽस्मिन् दृश्यकाव्ये न केवलं मन अपि तु

नैके भावाः पात्रीकृताः, यथा - अहङ्कार-क्रोध-महामोह-विवेक-वैराग्य-दम्भ-मति-रति–हिंसा-शान्ति-श्रद्धा-करुणा-सङ्कल्पादयः। मनोऽत्र आत्मनः पुत्रः। मनसः पत्नीद्वयमस्ति प्रवृत्तिर्निवृत्तिश्च। मनसो मन्त्रिणा संकल्पेन ज्ञापितं यत् प्रवृत्तिः खलु उपरता। लोभ-काम-तृष्णा-क्रोधदयोऽपि पञ्चत्वं गताः। तदा पत्नीविरहविधुरं मन अनले प्राणान् प्रदातुमैच्छत्। विष्णुभक्त्या प्रेषिता देवी सरस्वती मनः प्रवोधयति-

'विलुम्पिता विवेकितां यदि च मोहमुन्मूलय-
त्यहो ग्रसति जीवितं प्रसभमेव शोकज्वरः।'[57]

कथयति मनः-मनसः शासनं कठिनमेव कर्म। शासितेऽपि मनसि विपर्यस्तं भवति तत् – 'एवमेव भगवत्येतद्दुर्वारं नु चेतः।' यतः-

'अप्येतद्वारितं चिन्तासन्तानैरभिभूयते।
मुहुर्वाताहतैर्विम्बभ्रमच्छेदैरिवैन्दवम्।।'[58]

प्राकृतजनवदाचरत्यत्र मनः। पुत्रस्य वैराग्यस्य सम्भाषणेनालिङ्गनेन च परमां प्रीतिमवाप मनः। तन्मनः प्रवृत्त्या सह गार्हस्थ्यधर्ममाचरितवत्। जन्मनः परमेव वैराग्येन मनस्त्यक्तम्। अद्यापगते मोहावरणे वैराग्योदयस्तु

ध्रुव एव, अतो वैराग्यः प्रत्यागतः। रम्येयं कविकल्पना। मायापाशतो मुक्तेरुपायं ज्ञातुं ययाचे मनः सरस्वतीम्-

‘निरन्तराभ्यासदृढीकृतस्य
सस्नेहसूत्रग्रथितस्य जन्तोः।
जानासि किञ्चिद् भगवत्युपायं
ममत्वपाशस्य यतो विमोक्षः।।’59

सरस्वत्या त्वेवं विधानं कृतम्- उपरतायां प्रवृत्तिपत्न्यां ततः प्रभृति निवृत्तिरेव मनसः सहधर्मिनीत्वं सम्पादयिष्यतीति। वहिर्गन्तुकामो मनः शासनीय-इत्युपदिदेश मनसे सरस्वती। संयते च मनसि, गृहीते च तूष्णीम्भावे आत्मा खलु प्रतिभाति सहजतया –

‘तूष्णीमवलम्बसे चेत् कथमपि
वितता व९स संहृत्यवृत्ती
र्भात्यादर्शे प्रसन्ने रविरिव
सहजानन्दसान्द्र-स्तदात्मा।’60

पञ्चाननतर्करत्नप्रणीते अमरमङ्गलनाटके वारा-ङ्गनाकन्यापि वीरा वारवनितावागुराछेदनकारिणीव प्रतिभाति। नाटके सा राठोरराजस्य राजसिंहस्य तनया इत्यभिहिता। प्रतापतनय अमरसिंहो येन केनाप्युपायेन

व्यसनासक्तः करणीय- एतदर्थमन्तःपुरे उदयपुरस्य वाराङ्गनाया नियोगः कृतः मोगलसेनाध्यक्षेण मानसिंहेन। तत्र राजदम्पत्योस्तु सान्त्ववचनै मधुराचरणादिभिश्च वाराङ्गनाया वीराया भावविकारो जातः। मात्रा पुनः पुनः प्ररोचिताऽपि सा अमरसिंहमपकर्त्तुमात्मानं न कथमपि नियोजितवती। इत्थं रुपोपजीविनी वीरा अरुपोपजीविनी-रमणीरुपेण प्रेममयीरमणीरुपेण परिणता। अमरसिंहस्य पत्न्या देव्या प्रेमतन्त्रे दीक्षिता सा प्राह-

> ‘प्रेम्नः सुखं येन जनेन लब्धं
> न तस्य शारीरसुखेऽभिलाषः।
> सुधारसास्वादनतर्पिताय
> न रोचते पंकिलवारिधारा।।’[61]

अतीव द्वन्द्वदीर्णमासीद् वीराया मानसम्। एकतो वृत्तिभारः, अन्यतः प्रवृत्तिभारः। एकतो नियोगकर्त्तु र्मातुश्च कर्तव्यपालनोपदेशः, अन्यतः स्वहृदयवासनापूरणप्रयासश्च। देवीं सर्वं विवृत्य वीरा तस्माद् गुरुभारादात्मानं मोक्तुमिच्छति। विषमा परिणतिः सञ्जायते चेत्तेन इति मत्वा मनोभावः मनसि एव संस्थापितवती सा। नितरां दुर्वहः सञ्जातोऽयं मानसिकः संघातो वीरायाः। आह वीरा-‘भर्त्री जानाति भर्त्तुः कारणतः रोदिमि, न पुनर्जानाति पापकारिणी

अहम् असदृशी भर्त्तुरिति। असहनीयमिदानीं संवृत्तम्। तत् सर्वं प्रकाशयामि, अथवा तिष्ठत्विदानीमवसरं पालयामि।’[62]

दर्शनशास्त्रे मनसः स्वरुपव्यापारादिकं, साहित्ये विशेषतः दृश्यकाव्ये च मनसो लीलावैचित्र्यादि-कमस्माभिर्यथासामर्थ्यं समासेन विवृतमस्मिन् निबन्धे। यथात्र सर्वो दर्शनशास्त्रसम्मतसिद्धान्तो नालोचितस्तथैव न सर्वाणि च दृश्यकाव्यानि विषयत्वेन परिगृहीतानि। तथापि सत्यमिदं यदेकेनैव तन्तुना दर्शनं काव्यञ्च ग्रथ्नाति मनः। अतो दर्शनकाव्ययोः कदापि कोऽपि कलहो नास्ति।

## तथ्यसूत्राणि –

1. ऋक्परिशिष्टः- चतुर्थाष्टकस्य सप्तमाध्याये विंशतिवर्गानन्तरवर्त्तिनी ऋक्।
2. यजुर्वेदसंहिता-३४.२.
3. तत्रैव-३४.१.
4. ऋक्संहिता-६.९.५.
5. ब्रह्मबिन्दूपनिषत् २.
6. मैत्रायणी उपनिषत् ४.३.११
7. बृहदारण्यकोपनिषत् ४.१.६
8. न्यायसूत्रभाष्यम् १.१.१६

9. प्रशस्तपादभाष्यम्, पृ. २१३-१८ (वाराणसी सं. विश्वविद्यलय-संस्करणम्)

10. ब्रह्मसूत्रभाष्यम् २.३.३२

11. सांख्यकारिका, ईश्वरकृष्णप्रणीता, कारिका- २७

12. तदेव, कारिका-२७

13. तदेव, कारिका-३७

14. कुमारसम्भवम् ३.५०

15. प्रकरणपञ्चिका-पृ.१४९ (चौखम्बासंस्कृत सिरिज्)

16. नन्दीश्वर-प्राभाकरविजयः, पृ.७ (संस्कृतसाहित्यपरिषद्, कलिकाता)

17. श्लोकवार्तिकम्-४.८३

18. मानमेयोदयः, पृ. ४ (त्रिवान्द्रम् संस्कृत सिरिज्)

19. बृहदारण्यकोपनिषत् १.५.३

20. ऐतरेयोपनिषत् ३.१.२

21. छान्दोग्योपनिषत् ६.५.१

22. पञ्चदशी २.१२

23. अभिधर्मकोशः १.१७

24. तदेव १.४३, ४४, ४८

25. भास्करनन्दी- तत्त्वार्थवृत्तिः- १.१५

26. प्रमेयरत्नमाला (पृ. ७३) –अनन्तवीर्य (चौखम्बा संस्कृत सिरिज्)

27. त्रिपुरारहस्यतन्त्रम् १८.११७,४७. (सरस्वतीभवन, वाराणसी)

28. तदेव- १६.६४-६६

29. तदेव १८.४

30. प्रत्यभिज्ञाहृदयम् पृ. १३ (चौखम्बा संस्कृत सिरिज्)

31. योगवाशिष्ठरामायणम्- उत्पत्तिप्रकरणम्- १००.१४

32. कुमारसम्भवम् ५.५

33. प्रतिमानाटकम्, षष्ठाङ्कः

34. स्वप्नवासवदत्तम्, तृतीयाङ्कः

35. तदेव, तृतीयाङ्कः

36. तदेव, ४.४

37. तदेव, ५.९

38. पञ्चरात्रम्, प्रथमाङ्कः

39. तदेव, ३.२५

40. ऊरुभङ्गम्, श्लोकः-१२

41. ऊरुभङ्गम्, श्लोकः -४४

42. तदेव श्लोकः ४६

43. तदेव श्लोकः -५०

44. अभिज्ञानशकुन्तलम् १.३१

45. तदेव, ५.१९

46. मालविकाग्निमित्रम्, तृतीयाङ्कः

47. रघुवंशम्, १४.८४

48. उत्तररामचरितम् ३.३१

49. तदेव, ३.१३

50. तदेव, चतुर्थाङ्कः

51. तदेव, ६.१४

52. तदेव, सप्तमाङ्कः

53. महावीरचरितम् २.३२

54. मृच्छकटिकम्, षष्ठाङ्कः

55. मुद्राराक्षसम्, ३.१५

56. तदेव, ५.२४

57. प्रबोधचन्द्रोदयम्- ५.१२

58. तदेव, ५.३०

59. तदेव, ५.२६

60. तदेव, ५.३३

61. पञ्चाननतर्करत्नः-अमरमङ्गलम्, ८.४ (श्री श्रीजीवन्यायतीर्थ ओ अन्नदाशङ्करपाहाडी सम्पादित, संस्कृत बुक् डिपो, कोलकाता)

62. तदेव, द्वितीयाङ्कः

# नव्यमतानुसारं शाब्दबोधस्य प्रमितित्वपर्यालोचनम्

**ड. श्यामापदकरः**
संस्कृतविभागः सीतारामवैदिकमहाविद्यालयस्य

न्यायमतानुसारेण शाब्दबोधः स्वतन्त्रप्रमितिर्भवति। यतः न्यायदर्शने “प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि”[१] इति सूत्रं महर्षिणा निगदितमतस्तन्मतानुसारेण शब्दप्रमाण-जनितः शाब्दबोधः स्वतन्त्रप्रमितित्वं भजते। वस्तुतो न्यायमतानुसारेण चतुर्विधप्रमाणजनिताश्चतुर्विधा एव प्रमितयो जायन्ते इति। पत्रमिदं न प्रेक्षावतां विदुषां कृते रचितं भवति, परन्तु ये खलु पिपठिषवच्छात्रा भवन्ति तेषां कृते एव। सरलभाषामाश्रित्य इयं रचना भविष्यतीति मे विश्वासः।

महर्षिगौतमनये शाब्दबोधस्य करणं ज्ञायमानः शब्दः। कः शब्दः प्रमाणं भवतीति जिज्ञासा निरसनाय उक्तं “आप्तोपदेशः शब्दः”[२] इति। वस्तुतस्तु शाब्दबोधनामकप्रमायाः करणं भवति ज्ञायमान आप्तोपदिष्टशब्द इति। शब्दस्तु न्यायमते आकाशसमवेतो गुणपदार्थः। तथा च उक्तं- “सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते”[३]। स हि शब्दः द्विविधः ध्वन्यात्मको वर्णात्मकश्च। ध्वन्यात्मकशब्दस्य प्रत्यक्षं भवति

श्रोत्रेन्द्रियेण। वर्णात्मको यः शब्दः कस्यापि अर्थस्य बोधको भवति तदेव पदसंज्ञकं भवति। अत एव व्याकरणमतानुसारं सुप्तिङ्न्तं पदमिति पदसंज्ञा विहाय 'शक्तं पदम्'[४] इति नैयायिकैः पदसंज्ञा कृता। पदमपि शाब्दबोधस्य करणं भवितुं नार्हतीति पदज्ञानमेव शाब्दबोधस्य करणं भवति। अत एवोक्तं भाषापरिच्छेदे विश्वनाथेन "पदज्ञानन्तु करणमित्यादि"[५]। तत्र शब्दज्ञानविषयीभूतो यः शब्दः पदं वा, तस्मिन् पदे वृत्तिनामकः सम्बन्धः कल्प्यते। सा वृत्तिः सङ्केतो लक्षणा चेति द्विविधा भवति। "सङ्केतो लक्षणा चार्थे पदवृत्तिः"[६] सोऽयं सङ्केत आजानिक आधुनिकभेदेन द्विविधो भवति। आजानिकसङ्केतो नित्य इति भवति अस्य नाम शक्तिः। आधुनिकसङ्केतस्तु परिभाषा इत्युच्यते[७] एवं तादृशशक्तिनामकवृत्तिविशिष्टं पदं शक्तमित्युच्यते। परिभाषानामकवृत्तिविशिष्टं पदं पारिभाषिकमिति कथ्यते च। यस्मिन् पदे शक्यसम्बन्धस्वरूपालक्षणानामकसम्बन्धस्यास्तित्वं वृत्तित्वं वा कल्प्यते तत्पदं लाक्षणिकमित्युच्यते। वस्तुतस्तु सङ्केतो लक्षणा चोभयं सम्बन्धपदार्थः, यः पद-पदार्थयोर्मध्ये कल्प्यते। ईदृशसम्बन्धस्य अनुयोगि भवति पदं, प्रतियोगी भवति अर्थः। वस्तुतः सम्भूयसम्बन्धस्तु पदानुयोगिकार्थप्रतियोगिको भवतीति। वृत्तिमत्पदज्ञानं तु 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवति' नियमवलेन अर्थस्य स्मारकं भवति। स्मारकं नाम स्मरणजनकमिति। अत एव यदा कस्यापि

वृत्तिमत्पदस्य ज्ञानं भवति तदा उपर्युक्तनियमवलेन तस्यार्थस्य स्मरणं भवति। अर्थस्मरणं तु व्यापाररूपेण शाब्दबोधस्य कारणं भवति। अत एव उक्तं शक्ति-लक्षणान्यतरसहकारिकारणसहकृतपदज्ञानजन्यपदार्थस्मरणं पदार्थोपस्थितिर्वा शाब्दबोधात्मकप्रमारूपकार्यस्य व्यापार-रूपेण साक्षात्कारणरूपेण वा परिगणिता भवति। न केवलं पदज्ञानजन्यं पदार्थस्मरणं भवितुमर्हति। यावन्नेदं पदं वृत्तिमद्रूपेण ज्ञानस्य विषयीभूतं भवति। एतस्मात् कारणात् मुक्तावल्यामुक्तं "तत्रापि वृत्त्या पदजन्यत्वं बोध्यम्"[८] इति। पदार्थस्मरणमात्रस्य व्यापारवत्त्वस्वीकारे 'गौरस्ति' इत्यादिवाक्यज्ञानानन्तरं यदि अश्वादिप्रत्यक्षानुकूल-सामग्रीसमाजाय अश्वस्य स्मरणं ज्ञानं वा स्यात्तदा तादृशसामग्र्या अश्वस्य उपस्थितित्वात् "अस्तितावान् गौरश्वश्च" इत्याकारकशाब्दबोधस्यापत्तिः स्यात्। अत एव शाब्दबोधे वृत्तिमत्पदज्ञानजन्यपदार्थस्मरणं व्यापार इति अवश्यमेव विवक्षितव्यम्। पदस्य विशेषरूपेण यदि वृत्तिमत्त्वशब्दस्य निवेशनं न स्यात्तदा 'एकसम्बन्धि-ज्ञानमपरसम्बन्धिस्मारकं भवति' इति रीत्या घटादिशब्दस्य ज्ञानमपि समवायसम्बन्धेन एकसम्बन्धिज्ञानं भवति। यतः शब्दः आकाशसमवेतः गुणपदार्थः। शब्दस्तु समावायानु-योगित्वरूपेण एकसम्बन्धी भवति। तेन ज्ञानेन अपरसम्बन्धिन आकाशस्य स्मरणं भवति, ततः 'घटोऽस्ति' इति वाक्यात् घटपटज्ञानादाकाशस्योपस्थित्या 'अस्तितावान्

आकाशः' इति बोधापत्तिः स्यात्। यद्विषयकोपस्थिति-स्तद्विषयक एव बोधो जायते इति भावः।

अत एव शाब्दबोधानुकूलपद-पदार्थयोः सम्बन्धः न्यायमते वृत्तिरित्युच्यते। सा वृत्तिः द्विविधा, शक्तिर्लक्षणा च। शक्तिस्तु 'इदं पदमिममर्थं बोधयतु', "अस्माच्छब्दादयमर्थो बोधव्य" इत्याकारिका पदविशेष्यिका अर्थविशेष्यिका चेति गदाधरभट्टाचार्येण स्वीकृता, केचित्तु 'अस्माच्छब्दादमुकार्थविषयकबोधो भवतु' इति बोधविशेष्यिका इच्छा अपि शक्तिरूपेण परिगणिता भवतीति वदन्ति। प्राचीनास्तु एवम्भूता ईश्वरेच्छा एव शक्तिरस्ति स्वीकुर्वन्ति। ईश्वरेच्छायाः शक्तित्वस्वीकारे ईश्वरानङ्गीकर्तॄणां मीमांसकानां शाब्दबोधानुपपत्तिरिति इच्छाभागे ईश्वरीयत्वमनिवेश्य केवलं तादृशेच्छा एव शक्तिरिति नवीना वदन्ति। ईशरेच्छा, भवतु वा अस्मदीयेच्छा शक्तिस्तथापि ईश्वरेच्छा परमात्मनि समवायसम्बन्धेन तिष्ठति, अस्मदीयेच्छा तु जीवात्मनि तिष्ठतीति एतदर्थविषयकबोधजनकात्वावच्छिन्नप्रकारता-निरूपितविशेष्यतासम्बन्धेन सेच्छापदे, एवं वृत्तिमत्तत्पद-ज्ञानजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविषयता-सम्बन्धेन सेच्छा अर्थे तिष्ठतीति पदं शक्तं, अर्थश्च शक्यो भवतीति भावः। अत एव ईश्वरेच्छायाः शक्तित्वस्वीकारपक्षेऽपि ईश्वरेच्छाया एकत्वे नित्यत्वे

सर्वविषयकत्वेऽपि एवं विषयतासम्बन्धेन सर्वविषयकत्वेऽपि उपर्युक्तसम्बन्धस्वीकारादेव घटादिपदानां शक्यः न पटादिर्भवितुमर्हति, यतः घटादिपदज्ञानजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानामकसम्बन्धः घट-पदार्थे एव स्थातुं शक्यते न तु पटादिपदार्थे इति। अतः शाब्दबोधनामकप्रमां प्रति पदज्ञानं साक्षात्कारणम्, वृत्तिमत्पदज्ञानजन्यपदार्थस्मरणमपि साक्षात्कारणम्, शक्तिलक्षणादिकं सहकारिकारणम्। अत एव भाषापरिच्छेदे उक्तं कारिकायां पदज्ञानन्तु करणमित्यादि[९]। एवमपि शाब्दबोधं प्रति आकांक्षाज्ञानं, योग्यताज्ञानं, आसत्तिज्ञानं, तात्पर्यज्ञानमपि कारणं भवति[१०]। आकांक्षा का इति जिज्ञासानिरसनायोक्तं यत्पदेन विना यस्याननुभावकता भवेत् साकांक्षा। तथापि आकांक्षायाः स्वरूपविषये वैमत्यमस्ति। केचित्तु यस्मात्वर्णात् परं यो वर्णः, यस्मात् पदात्परं वा यत्पदं शाब्दानुभवस्य जनकं भवितुं नार्हति पूर्वापरवर्णेन सह पूर्वापरपदेन सह वा तत्तद्वर्णानां तत्तत् पदानां वाकांक्षा अस्तीति वदन्ति।

अत एव व्युत्क्रमप्रयुक्तवर्णानां पदानां च न साकांक्षत्वमिति। योग्यता तु प्राचां मते बाधशून्यतारूपा। नवीनास्तु एकपदार्थेन सह अपरपदार्थस्य सम्बन्धित्वमेव योग्यत्वम्। येन पदार्थेन सह यस्य पदार्थस्य सम्बन्धः

स्थापितो न भवति तत्र बाधोऽस्तीति कल्प्यते न तत्र शाब्दबोधोत्पत्तिर्भवति।

आसत्तिस्तु पदार्थानामविलम्बेनोपस्थितिरियं सन्निधिरित्यपि कथ्यते। केचित्तु पदसमूहानामवि-लम्बेनोच्चारणमासत्तिरिति वदन्ति। अन्वयबोधं प्रति अपरं कारणं तार्पर्यज्ञानम्, वक्तुरिच्छा एव तात्पर्यम्। कस्यामिच्छायां वक्त्रा वाक्यं प्रयुज्यते तदपि ज्ञातव्यमन्यथा यथार्थानुभवो न भवितुमर्हति श्रोतुः। आचार्योदयनेन, माणिकारेण, बर्द्धमानोपाध्यायेन च शाब्दबुद्धौ तात्पर्यज्ञानस्य कारणत्वमङ्गीकृतम्। जगदीशतर्कालंकारेण तात्पर्यज्ञानस्य कारणत्वं न स्वीकृतम्। शब्दशक्तिप्रकाशिकायां तेन तात्पर्यग्राहकप्रकरणज्ञानस्य कारणत्वमन्वयबुद्धौ स्वीकृत्य तात्पर्यज्ञानस्य कारणत्वं निराकृतम्।

कार्यकारणभावाङ्गीकर्तृभिः सर्वैरेव कारणवैजात्यात् कार्यस्य वैजात्यं स्वीकृतम्। उपर्युक्तानां कारणानामालोचनायां परिदृश्यते यत्, एतानि कारणानि न प्रत्यक्षानुमित्युपमित्यादीनामौपयिकानि भवन्ति। अत एव एतस्मात् कारणकूटात् यत् कार्यमुत्पद्यते तत् प्रत्यक्षादिविलक्षणमेव भवितव्यमित्यभिप्रेत्य जगदीश-तर्कालंकारेण शब्दशक्तिप्रकाशिकायामुक्तं “साकांक्षाशब्दैर्यो बोधस्तदर्थान्वयगोचरः। सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा॥[११] इति। आकांक्षायोग्यतासत्तिविशिष्टपदसमूहा-

त्मकज्ञानजन्यतत्तत्पादानमर्थस्मरणं कृत्वा तत्तदर्थं तयोः सम्बन्धं च विषयीकृत्य यो बोधो भवति, स बोधः तादृशपदसमूहात्मकज्ञानजन्योपस्थापितार्थमात्रं विषयीकृत्य जायते इति नायं बोधः प्रत्यक्षः, न वा अनुमितिरिति सरलार्थः। एतेन प्रमाणद्वयमङ्गीकर्तृणां बौद्धानां वैशेषिकानां मतं यथा निराकृतं भवति तथैव प्रत्यक्षैकमात्रप्रमाणवादिनां लौकायतिकचार्वाकानां मतमपि निरस्तं भवतीति सूचितम्। चार्वाकानां मते प्रत्यक्षमात्रप्रमाणस्वीकरणे व्यवहारविलोपो भवतीति ये पोषयन्ति तत्तु न समीचीनम्। प्रत्यक्षसिद्धपदार्थानां बोधकं शब्दमादाय न व्यवहार-विलोपापत्तिः। अदृष्टधर्माधर्मपरलोकपरमात्मादिप्रत्यक्षा-योग्यपदार्थबोधकशब्दस्य व्यवहारः चार्वाकैः नाङ्गीक्रियते। अत एव प्रत्यक्षायोग्यधर्माधर्मात्मादिविशेषपदार्थबोधक-शब्दस्य व्यवहारो लौकायतिकमते व्यर्थ इति। वस्तुतस्तु शब्दस्तु प्रत्यक्षसिद्धपदार्थमान्तस्यानुवादक इति। यदि च शब्दः स्वीयार्थानुभवस्य जनको भवेत्, तर्हि स औपनायिकप्रत्यक्षानुभवस्य जनको भवेत्। चार्वाकानामत्रायं अभिप्रायो भवितव्यः- यथा नैयायिकैः शाब्दानुभवस्थले आदौ वृत्तिमत्पदज्ञानं, ततः तादृशपदज्ञानजन्यपदार्थस्मरणं क्रियते, ततः बोधः क्रियते, लौकायतिकमते तथैवादौ पदज्ञानं, ततः पदार्थस्मरणमपि भवति, स्मरणमिदं ज्ञानलक्षस्य सन्निकर्षमुद्रया सन्निकृष्टविषयं, इन्द्रियसंयुक्तमनः संयुक्तात्मसमवेत(स्मरण)विषयत्वसम्बन्धेन स्मरणकर्तुः

प्रत्यक्षं कारयति इत्यर्थः। प्रत्यक्षमिदमलौकिकमेव वक्तव्यम्। अत्र पदार्थस्मरणमेवं 'ज्ञानलक्षणसन्निकर्षः' अयं सन्निकर्षः 'उपनय' इति संज्ञया अपि भूषितो भवति। अतएव उपनयसन्निकर्षजन्यं यज्ज्ञानं तदौपनायिकमेव भविष्यतीति ग्रन्थकारस्याशयः। अतएवोक्तं जगदीशेन-"अथ शब्दो यदि स्वार्थस्यानुभवे भवेद्धेदुः प्रात्यक्षिक एवोपनायिके" इति।[१२]

अतएवानुपस्थतित्वेऽपि विषये अतीतेऽनागतेऽपि वा विषये प्रत्यक्षयोग्यतत्तद्विषयबोधकपदप्रयोगस्थले चार्वाकानां तत्तद्विषयकालैकिकप्रत्यक्षमेव जायते न तु शाब्दबोध इति। सुतरां शब्दप्रयोगस्थले तत्तच्छब्दप्रतिपाद्यपदार्थानां प्रत्यक्षत्वसम्भवे तेषां पदार्थानां शाब्दबुद्धित्वकल्पनं निर्युक्तिकं गौरवं चेति चार्वाकादीनां अभिप्रायः। यद्यपि चार्वाकैः अलौकिकं प्रत्यक्षं, अलौकिकसन्निकर्षः न स्वीक्रियते। तथापि यथोपयुक्तवाक्यप्रयोगस्थले चार्वाकानां बोघो यथा जायते, तथैव तादृशबोघजन्या प्रवृत्तिनिवृत्तिरपि दृश्यते जायते इति दर्शनात् तेषां बोघरुपकार्यं(अलौकिकं) प्रति तदनुकूलम् अलौकिकसन्निकर्षं स्वीकृत्य तस्य कार्यस्य व्याख्या करणीया अनन्यगतिकत्वादित्यभिमानः नैयायिकानाम्।

जगदीशैः कथ्यते यदि बोघोऽयं प्रत्यक्षः स्यात् तर्हि प्रत्यक्षं प्रति शाब्दसामग्र्या अप्रयोजकत्वात् आकांक्षासक्तियोग्यतादीनां शाब्दसामग्रीसमाजानां तत्त उपयोगाभावात्, शाब्दस्थले तु आकांक्षादीनां

कारणत्वमवश्याभ्युपेतव्यमन्यथा निराकाक्षशब्दसमुहादपि विशिष्टवैशिष्ट्यबोघात्मकशाब्दबैधापत्तिः स्यात्। साकांक्ष-वाक्यान्तर्गतानि यानि शाब्दबोधस्य कारणानि, तानि तु न औपनायिकप्रत्यक्षे प्रयोजकानि। अतएव नैयायिकै यत्त शाब्दबोधत्वं स्वीक्रियते तत्त लोकायतिकै यदि प्रत्यक्षत्वं स्वीक्रियते तर्हि आकांक्षायोग्यतादिशुन्यवाक्यादपि चार्वाकानां लौकायतिकानां प्रत्यक्षत्वं भवेदेव। नैयायिकैस्तु निराकांक्षवाक्यात् योग्यतारहिताद् वा वाक्यात् शाब्दबोधो न स्वीक्रियते। वस्तुतस्तु शाब्दबोधात् प्राक् अलौकिकप्रत्यक्षसामग्रीभिन्नसामग्र्याः समवधानवशात् शाब्दबोधरूपा स्वतन्त्रप्रमितिः भवतीति नैयायिका वदन्ति। यतस्तत्र या सामग्री दृश्यते, सा तु शाब्दबोधानुकूला भवतीति।

नायं बोधः अनुमित्यात्मकः। वैशेषिकानां मते आर्हतानां च मते शाब्दबोधो न स्वतन्त्रप्रमितिः परन्तु अनुमितिरेव। जगदीशेन संक्षोपेण उक्तं नायं बोधोऽनुमितिः, अयं बोधो यदि अनुमितिः स्यात्तदा उक्तबोधात् पूर्वं लिंगज्ञानं, व्याप्तिज्ञानं, पक्षधर्मता ज्ञानं चावश्यमपेक्षितं स्यात्। शाब्दबोधस्थले तु शाब्दबोधात् पूर्वं अनुमितिकारणानामभावात् नायं बोधो अनुमितिः। परन्तु शाब्दबोध एव।

उक्तबोधात् पूर्वं नियतशब्दस्य ज्ञानमपेक्षितं भवति, एवं उक्तशब्दज्ञानजन्यपदार्थस्मरणेन सह अन्वयबोधस्य अन्वयव्यतिरेकौ स्तः। येन सह यस्यान्वयव्यतिरेकौ विद्येते तेन सह तस्य कार्यकारणभावोऽस्ति इति स्वीकृतो भवति। केवलपदज्ञानजन्यविशकलितपदार्थानां स्मरणं स्मरणजन्य-विशकलिततत्तत्पदार्थानां बोधो नान्वयबोधः। परन्तु निरूप्यनिरूपकभावापन्नोपस्थितपदार्थानां परस्परसम्बन्धं विषयीकृत्य यो विशिष्टवैशिष्ट्यावगाहिबोधः स एवान्वयबोधः शाब्दबोधो वेति। उक्तविशिष्टान्वयबुद्धिं प्रति किं प्रमाणम्? अन्वयबुद्धिं प्रति प्रमाणं तावदनुव्यवसायः। 'गौरस्ति' इति वाक्यज्ञानान्तरं "अस्तितावान् गौ"रित्याकारको बोधो भवति। उक्तबोधानन्तरं 'अस्तित्वेन गौः श्रुतः, अस्तित्वेन गां शृणोमि', इत्याकारको विशिष्टबोधोऽनुव्यवसायो वा जायते। अयं अनुव्यवसाय एव पूर्वोक्तबुद्धेः शाब्दत्वजातीयत्वं प्रमाणीकरोति। तादृशवाक्यज्ञानान्तरं जायमानबोधं विषयीकृत्य कदापि अस्तित्वेन गां पश्यामि, अस्तित्वेन गौः दृष्टः, अथवा अस्तित्वेन गामनुमिनोमि, अस्तित्वेन गौरनुमित इत्यादि अनुव्यवसायस्य तत्राभावात् पूर्वोक्तबुद्धेः प्रत्यक्षानु-मित्यादिवैलक्षण्यं सिद्धतीति भावः।

केचित्तु निरुक्तबोधं स्मृतिरूपेण वर्णयन्ति, तेषां मते पूर्वानुभूतपदार्थस्मरणं विना यथा शाब्दबोधो नोत्पद्यते, तथैव वृत्तिमत्पदज्ञानरूपोद्बोधकेन उद्बुद्धसंस्कारात् 'गौरस्ति' इत्यदिस्थले अस्तित्वप्रकारकगोविशेष्यको यो बोधो जायते स बोधो भवति स्मृतिरिति। एतेन शाब्दत्वरूपं वैजात्यं शाब्दबुद्धौ कल्पनमपेक्ष्य निरुक्तबोधे स्मृतित्व-कल्पनमेव युक्तं लाघवम् चेति।

एतेषां मतं न समीचीनं मन्यते तर्कालंकारपादैः। अतः तेन निगदितं शब्दशक्तिप्रकाशिकायां – "न चासौ स्मृतिः, समानाकारसंस्काराप्रभवत्वात्"[१३] ।

स्मृतिस्तु संस्कारमात्रजन्यं ज्ञानम्। 'गौरस्ति' इत्यादिस्थले गोविशोष्यकास्तित्वप्रकारकस्मृतेः पूर्वं समानाकारसंस्कारस्य अर्थात् गोविशेष्यकास्तित्वप्रकारकसंस्कारस्यास्तित्वमवशेयं स्वीकार्यम्। किन्तु अन्वयबोधस्थले विशकलिततत्तत्पदार्थ-विषयकसंस्कारस्यास्तित्वस्वीकृतेऽपि विशेष्यविशेषणभाव-रहितानां तत्तत्पदार्थानां संस्कारः सम्भवति, न तु समानविशेष्यताप्रकारतापन्नपदार्थानां संस्कारः। एतस्मात् कारणात् वाक्यार्थबोधो न स्मृतिरिति।

प्रत्यक्षैकमात्रप्रमाणवादिनां मते वाक्यार्थबोधो प्रत्यक्ष एव, इत्यपि न समीचीनम्। वाक्यर्थबोधोस्थले प्रायशः वास्तविकतत्तत्पदार्थानां उपस्थित्यभावात् तैः सह इन्द्रियार्थसन्निकर्षो न घटते। अतः नायं बोधो लौकिकप्रत्यक्षान्तर्गतो भवितुमर्हति, नाप्यलौकिकप्रत्यक्षः। यतः अलौकिकप्रत्यक्षं प्रति अलौकिकस्त्रिविधः सन्निकर्षः स्वीकृतः। स सन्निकर्षः सामान्यलक्षणज्ञानलक्षणयोगजश्च। सामान्यलक्षणसन्निकर्षजनितप्रत्यक्षे लौकिकसन्निकर्षघटित-लौकिकप्रत्यक्षसामग्री उपेक्षिता भवति, एवं सामान्य-लक्षणसन्निकर्षजन्यप्रत्यक्षे सामान्यस्य यावदाश्रयो विषयो भवति। किन्तु शाब्दबोधस्थले 'गौरस्ति' इत्यादिस्थलीयबोधे गोव्यक्तिविशेषमात्रमेव विषयो भवति न तु गोत्वाश्रययावद्व्यक्तिरिति। एवमपि शाब्दबोधात् प्राक् लौकिकप्रत्यक्षसामग्री चक्षुःसन्निकर्षादिर्नोपेक्षिता भवति। एवं शाब्दबोधः योगजसन्निकर्षजन्यो न भवति अलौकिक-प्रत्यक्षविशेषोऽपि। निरुक्तबोधात् प्राक् अतीन्दियपदार्थ-प्रत्यक्षानुकूलो यौगिकसन्निकर्षोऽपि न सम्भवति। अतएव यैः शाब्दबोधः प्रत्यक्षविशेष एव इति कथ्यते, तेषां मते अयं बोधो ज्ञानलक्षणसन्निकर्षजनितालौकिकप्रत्यक्षरूपेण स्वीका-र्यः गत्यन्तराभावात्। चार्वाकादीनां लौकायतिकानां मते यदि इयं वस्तुस्थितिर्भवेत् तदा जगदीशैः कथितम् - शब्देन

शब्दज्ञानेन वोपस्थितोऽर्थः यथा शाब्दस्य विषयो भवति, यं बोधं लौकायतिकाश्चार्वाकाः अलौकिकप्रत्यक्षरूपेण अभिहितवन्तः, तस्मिन् स्थले प्रकारान्तरेण उपस्थितस्यापि अर्थस्य उपनयनमर्यादया शाब्दबोधविषयतापत्तिः समागच्छति। अर्थात् अनुमानादिसामग्रीवशात् शब्दाभि-हितार्थातिरिक्तार्थस्यापि तद्बोधविषयतायां अन्तर्भावापत्तिः स्यात्।

इयमापत्तिरिष्टापि न भवितुमर्हति अनुभवस्य विरोधात्। यदि अत्रानुभवविरोधो न स्वीक्रियते, अर्थात् प्रकारान्तरेण उपस्थितस्य अर्थस्य स्मृतस्यार्थस्य ज्ञानलक्षणसन्निकर्ष पुरष्कारेण तदनुबोधविषयतयापि भासते इति स्वीक्रियते तर्हि प्रकारान्तरेणोपस्थितपदार्थान्तरं विषयीकृत्य यो बोधो जातः, तं वोधं विषयीकृत्यानु-व्यवसायापत्तेः। अर्थात् "गौरस्ति" इति वाक्यात् "शुक्ला पुष्टा गौरस्तितावान्" इत्यादिवोधं विषयीकृत्य अस्तित्वेन शुक्लां पुष्टां गां पश्यामीति अनुव्यवसायस्यापत्तिः स्यात्। शाब्दबोधस्य प्रत्यक्षत्ववादिनो यदि निरुक्तशाब्दानु-व्यवसायापत्तिवारणाय व्यवसायानुव्यवसाययोर्मध्ये स्वतन्त्र-कार्यकारणभावं प्रस्तौन्ति – अर्थात् "अस्तित्वेन गां शाब्दयामि" इत्यकारकानुव्यवसायं प्रति तत्तदर्थबोधक-

साकांक्षपदज्ञानजन्यतत्तत्पदार्थविषयकशाब्दबोधत्वेन शाब्द-बोधो विषयविद्यया कारणमित्युच्यते तर्हि शाब्दानुव्यवसाय शाब्दवोधयोर्मध्ये एवम्भूतकार्यकारणभावरचनायां गौरवो भवति। शाब्दानुव्यवसायं प्रति विषयविद्यया शाब्दत्वरूपेण शाब्दस्य कारणत्वं स्वीकृतं भवति। इदानीं तु प्रकारान्तरेण उपस्थितपदार्थस्य शाब्दान्तर्भावस्य बहिःकरणाय साकांक्षपदजन्यतत्तदर्थविषयकशाब्दत्वेन कारणत्वकल्पनायां शरीरकृतं महागौरवं समापतति। अतएव ईदृशं महागौरवं परिहृत्य अस्वीकृत्य शाब्दबोधस्य प्रमित्यन्तरकल्पनमेव साधु इति।

नन्वेवं स्वीकृतेऽपि गौरवग्रस्तकार्यकारणभावे "फलमुखगौरवस्य अकिञ्चित्करत्वादिति न्यायेन विप्रतिपन्नैर्यदि निरुक्तकार्यकारणभावस्वीकारो न दोषावह इति कथ्यते भवति हि शाब्दबोधः प्रत्यक्षविशेषः न तु स्वतन्त्रप्रमितिः। तर्हि तर्कालङ्कारैर्जगदीशैः कथितं उक्तकार्यकारणभावकल्पनायां व्यतिरेकव्यभिचारो भवति। "इतरबाधलब्धस्य छिद्रेतरत्वादेरपदार्थस्याप्यावगाहित्वेन शाब्दमतेरनुव्यवसीयमानत्वात्"[१४] अत्रायमभिप्रायस्तर्का-लङ्कारस्य "पर्वतो वह्निमान्" इत्यनुमित्युत्पत्त्या-व्यवहितपूर्वक्षणे तृतीयलिङ्गपरामर्शदशायां यदीतरबाधो वर्तते अर्थात् वह्निव्याप्य धूमवान् पर्वतः

पर्वतीयेतरवह्न्यभाववांश्च इति ज्ञानं वर्तते तर्हि तत्र शुद्धपर्वतत्वावच्छिन्ने शुद्धवह्नित्वावच्छिन्नविधेयकानुमितिर्न जायते परन्तु शुद्धपर्वतत्वावच्छिन्नविषेष्यक-पर्वतीयत्ववह्नित्वैतद्धर्मदयावच्छिन्नविधेयकानुमितिर्जायते। यथा, “पर्वतः पर्वतीयवह्निमान्” इत्यनुमितिर्भवति यथा, तथैव अन्वयबोधस्थलेऽपि शाब्दबुद्धेश्चरमकारणसमवधान-दशायां इतरबाधसत्त्वे विशिष्टशाब्दबोधो भवतीति। यथा ‘घटे न जलमाहर’ इत्यादौ साकांक्षपदज्ञान-जन्यपदार्थोपस्थितिदशायां ‘सच्छिद्रो घटो जलाहरणायोग्यः’ इति योग्यताभावनिश्चयः स्यात् तर्हि तत्र शुद्धघट-करणकजलकर्मकानयनानुकुलकृतिरित्यादिशाब्दमनुत्पत्तावपि ‘च्छिद्रेतरघटकरणक-जलकर्मकाहरणानुकूलकृतिमान्’ इत्या-कारकशाब्दबोधो जायते। एवं तादृशं शब्दबोधं विषयीकृत्य तदनुव्यवसायोऽपि जायते। उक्तस्थले पूर्वोक्तसाकांक्षपद-ज्ञानजन्यपदार्थोपस्थितिमात्रप्रयुक्तशाब्दबोधाभावेऽपि अर्थात् कारणाभावेऽपि अनुव्यवसायरूपकार्योत्पत्तिर्घटते इति भवति हि व्यतिरेकव्यभिचार इति।

यदि इतरबाधसमवधाने नायं शाब्दबोधो जायते। परन्तु यत्र ‘छिद्रेतरेण घटेन जलमाहर’ इति वाक्यज्ञानात् यथाविधि पदार्थानामुपस्थितिर्जायते तत्रैव च्छिद्रेतर-घटकरणकेत्यादि शाब्दबुद्धिर्घटते। अत एव केवल-साकांक्षपदज्ञानजन्योपस्थितपदार्थमात्रमेव शाब्दबोधस्य

मानसोपनीतप्रत्यक्षस्य वा विषयो भवति नान्यः। एतेन 'घटेन जलमाहर' इत्यादौ पदार्थोपस्थितिसमवधानयोग्यता-निश्चयाभावदशायां छिद्रेतरघटकरणकेत्यादिशाब्दबुद्धिः तदवलम्ब्य तदनुव्यवसायो जायते इति निरस्तम्। अत एव यदि प्रत्यक्षप्रमाणवादिभिः अन्वयबोधः औपनायिक-प्रत्यक्षविशेष एवेति कथ्यते तर्हि सिद्धान्तिभिरुच्यते- "गवादा अस्तित्वादेरिव अस्तित्वादौ गवादेर्भानप्रसङ्गस्य तावताप्यनुद्धाराच्च"[१५]।

सिद्धान्तिभिः कथ्यते – शाब्दबुद्धौ विशेषणयोर्नियमोऽस्ति। गौरस्तीत्यादिस्थले सर्वदैव गोविशेष्यकास्तित्वप्रकारकशाब्दबोधो भवति। किन्तु औपनायिकप्रत्यक्षे विशेष्यविशेषणायोर्वैपरीत्यभावः सर्व-वादिसिद्धः, यथा सुरभि चन्दनम् इति उपनीतज्ञानं भवति तथैव चन्दने सौरभमिति उपनीतभानमपि जायते। शाब्दबोधीयविशेष्यताप्रकारताया वैपरीत्यभानसकल-जनाननुमततया 'गौरस्ति' इत्यादिवाक्यस्थलीयबोधो भवति प्रत्यक्षविलक्षणाबोध इति स्वीकार्यः। अन्यथा स बोधो 'गवि अस्तित्वमित्वादि' अस्तित्वविशेष्यकोऽपि स्यादित्यर्थः।

इदानीं वैशेषिकानां शाब्दबोधस्यानुमितित्वकल्पनमपि न सम्भवतीत्यभिप्रेत्य जगदीशैरुक्तं - "अतएवासौ

नानुमितिरपि, पूर्वपरामृष्टस्य वस्तुमात्रस्यैवासति बाधके शाब्दधीविषयतापत्तेः”[१६]।

अत्रायमभिप्रायः– पदज्ञानजन्योपस्थिताः समूहाः पदार्थाः शाब्दबोधस्य विषया भवन्ति। सोऽयं शाब्दबोधो यदि अनुमितिः स्यात्, तर्हि शाब्दबोधाव्यवहित-प्राक्क्षणावच्छेदेन अनुमितेश्चरमकारणपरामर्शस्यापि स्वत्वं स्वीकर्तव्यमेवं परामर्शान्तःपातिपक्षसाध्यहेतुव्याप्त्यादि-पदार्थानामपि तर्हि शाब्दबुद्धौ अन्तर्भावः स्यात् पक्षसाध्यहेतुव्याप्तिपदार्थानां वृत्यनुपस्थितत्वेऽपि शाब्द-बोधस्य विषयास्ते भवन्तु इत्यापत्तिः। एवं परामर्शस्य तादृशशाब्दबोधाव्यवहितप्राक्क्षणावच्छेदेन चरमकारणरूपेण परिगणयितुमुक्तम् ‘असतिबाधके’ इति। तथा च तादृशक्षणे अर्थात् शाब्दबोधाव्यवहितप्राक्क्षणे वृत्तिमत्पदज्ञानजन्य-पदार्थानामुपस्थितिसहितबाधाभावः, परामर्शः, सिद्ध्यभाव-रूपापक्षता यत्र विद्यते एकैवक्षणे, तत्र परक्षणे शाब्दबोधे ‘साध्यव्याप्यहेतुमान् पक्षः’ इति परामर्शविषयीभूत-पक्षविषयस्य साध्यविषयस्य, व्याप्तिविषयस्य हेतुविषयस्य च पदज्ञानजन्योपस्थित्यभावेऽपि शाब्दबोधस्यान्तर्भावा-पत्तिः[१७]। वृत्तिमत्पदज्ञानजन्याः समुपस्थिताः सर्वे पदार्थाः

शाब्दबोधे भासन्ते इति नियमात्। शाब्दबोधस्य पूर्वक्षणीयोपस्थिताः पदार्था अत एव शाब्दे भासेरन्। यदि पदार्थोपस्थितिशाब्दबोधयोः कार्यकारणभावः स्वातन्त्र्येण विरच्यते अर्थात् तत्तदर्थविषयकशाब्दं प्रति साकांक्षपदज्ञानजन्यतत्तदर्थोपस्थितिरेव कारणमित्युच्यते, तर्हि जगदीशैरुच्यते - "तावतापि पदार्थानामन्वधीदशायां अपदार्थानामपि स्व-स्वसामग्रीवलेन प्रत्यक्षानुमित्योरन्यतर-प्रसङ्गस्य दुर्वारतापत्ते:"[१८]।

ये खलु शाब्दबोधं अनुमितिरिति वदन्ति तेषां वैशेषिकानां मते शाब्दबोधात् पूर्वं अनुमिते: सकलानि कारणानि अपि सन्तोति पदार्थानामुपस्थितिकाले अर्थात् शाब्दबोधस्य चरमकारण समबधानकाले वैशेषिकमते अनुमितिचरमकारणं लिङ्गपरामर्शम् अपि अस्तोति स्वीकार्यम्। एवं शाब्दबोधस्य प्रत्यक्षत्वस्वीकर्तृमते प्रत्यक्षस्य चरमकारणं इन्द्रियार्थसनिकर्ष: शाब्दबोधस्य अव्यवहित-पूर्वकाले अस्तोति स्वीकार्यम्। अत एव तत्र शाब्दे शाब्दबोधीया अपदार्था: = अनुमितिसामग्रीवलेन भासमाना: पदार्था: वैशेषिकादिनये, शाब्दबोधीया अपदार्था: = प्रत्यक्षसामग्रीवलेन भासमाना: पदार्था: लौकायितिकनये वस्तुतो तत्र भासते इति स बोध: प्रत्यक्ष: अनुमितिर्वा भविष्यतीति आपत्ति: समापतति। समानविषयक-

प्रत्यक्षत्वावच्छिन्नं प्रति एवं समान-विषयकानुमितित्वावच्छिन्नं प्रति शाब्दसामग्र्या: अप्रतिबन्धकत्वात्, नैयायिकाभिमतशाब्दबोधः अनुमितिसामग्रीबलेन, वैशेषिकादिनये अनुमिति:, लौकायनिकनये च प्रत्यक्षात्मकबोधो वक्तव्य इति।

भिन्नविषयकप्रत्यक्षं प्रति, भिन्नविषयकानुमितिं च प्रति शाब्दसामग्र्या: प्रतिबन्धकत्वं स्वीकृतं भवति, सुतरां निरुक्तस्थले या अनुमितिर्जायिते, यच्च प्रत्यक्षं जायते, तद्भिन्नविषयकमेव। सुतरामत्र प्रत्यक्षवादिनां मते साकांक्षशब्दज्ञानादुपस्थितभिन्नं अथ च इन्द्रियार्थ-सन्निकर्षघटितस्व-स्वसामग्रीवलेन पदार्थान्तरस्य भानं, वैशेषिकनये च पूर्वपरामृष्टपदार्थान्तरस्य भानमपि वारणं भवति।

ननु शाब्दबोधस्य प्रत्यक्षविशेषरूपेण स्वीकृतत्वे, प्रत्यक्षसामान्यं प्रति शाब्दसामग्र्या: प्रतिबन्धकत्वं व्याहन्यते, अर्थात् प्रत्यक्षत्ववादिनां मते शाब्दत्वं खलु प्रत्यक्षत्वस्यावान्तरधर्मरूपेण स्वीकृतं भवति। अत एव शाब्दवोधः प्रत्यक्षविशेष एव। तं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं भवति कथम्? अस्मिन् मते यतः शाब्दसामग्री

एव प्रत्यक्षसामग्री। अतएव प्रत्यक्षं प्रति प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वासम्भवात्। शाब्दान्यप्रत्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापेक्षा शाब्दबोधस्य स्वतन्त्रप्रमितित्वस्वीकरणमेव युक्तम्।

यदि वैशेषिकैः शाब्दबोधोऽनुमितिः लिङ्गज्ञानत्वादित्यादिना शाब्दबोधत्वावच्छिन्ने अनुमितित्वं साधयितुमिष्यते। तर्हि तत्र लिङ्गरूपेण आकांक्षायाः अथवा योग्यतायाः ग्रहणं भवति। अत एव 'शाब्दबोधोऽनुमितिः आकांक्षायाः', अथवा 'शाब्दबोधः अनुमितिः योग्यतावत्त्वात्' इत्यादिप्रकारेण शाब्दबोधमात्रस्य अनुमितित्वं साधयति। तन्न युक्तम्। 'गौरस्तितावान्' आकांक्षावत्त्वात्, अथवा गौः अस्तितावान् योग्यतावत्त्वात् इत्यादिस्थलं गौः अस्ति इत्यादि वाक्यार्थबोधस्थले ग्रहणीयम्। आकांक्षा तु पदे विद्यते न तु पक्षे अर्थे। अतः स्वरूपासिद्धदोषः। हेतुस्तु स्वरूपासिद्धदोषेण दुष्टो भवति। योग्यतायाः स्वरूपस्तु एकपदार्थे अपरपदार्थस्यास्तित्वम्, अत अस्तिता एव योग्यता। गौः अस्तितावान् योग्यतायाः इत्यत्र अस्तित्वसाध्येन समं हेतोरैक्यात् ( योग्यता = अस्तिता ) 'गौ अस्तितावान् अस्तितावत्त्वात्' इत्यत्र अस्तित्वव्याप्यास्तित्ववान् गौरिति परामर्शकाले पक्षे साध्यस्य सिद्धत्वात्

पुनरनुमित्या तत्साधने सिद्धिसाधनदोषः। एवं योग्यताविशिष्टाकांक्षा आकांक्षाविशिष्टयोग्यता हेतुरिति कथने हेत्वप्रसिद्धिः स्यादिति आकांक्षायोग्यतानां मेलनं घटयित्वा अपि तयोर्हेतुत्वं न सम्भवतीति।

तथापि वैशेषिकैः अर्थपक्षकानुमित्या शाब्द-बोधस्यानुमितित्वं साधुयितुम् इष्यते। गौः अस्तितावान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकांक्षाश्रयपदस्मारित्वात्, घटवत्। अथवा गौः अस्तितावान् अस्तिपदसमभिव्याहृतगौः पदस्मारितत्वाद् चक्षुर्वत्। उभयथा हेतुर्व्यभिचारी इति नैयायिकैः प्रतिपादितः।

हेतुरयं व्यभिचारी, अस्तित्वाभाववति अतीतानागतादौ गवि गौपदस्मारितवस्य सत्त्वात्। वैशेषिकास्तु साध्याभाववद्वृत्तिहेतुरिति व्यभिचारज्ञानदशायां साध्याभाववद्वृत्तिहेतुरिति व्याप्तिज्ञानासम्भवेऽपि साध्यवदन्यावृत्तित्वं, हेत्वधिकरणवृत्यभावप्रतियोगितानवच्छेदक-साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति व्याप्तिज्ञानमुत्पत्या अनुमितिः सम्भवतीति वदन्ति। अत एव स्वरूपसतः व्यभिचारसत्त्वेऽपि अन्यप्रकारेण व्याप्तिज्ञान-सम्भवात्,परार्थानुमाने व्यभिचारग्रहस्य प्रतिबन्धकत्वेऽपि स्वार्थानुमाने व्यभिचारग्रहस्य अकिञ्चित्करत्वात्। तन्न,

गवादेः पदस्मारित्वाद्यभाव-ग्रहदशायामर्थात् गौपदज्ञान-जन्यस्मरणविषयोपक्षीभूतगौर्न भवति यदा, तदा 'गौः अस्तितावान्' इति अनुमितिर्नोत्पद्यते। हेतोः पक्षधर्मताभावात्। एतेन गौरिति पदम् अस्तित्ववद्गोगोचरज्ञानपूर्वकमस्तिपदसाकांक्षगौः पदत्वात्, येनैवं तन्नैवं यथा आकाशमिति पदपक्षकानुमानमपि वैशेषिकानां परास्तम्। वस्तुतस्तु वाक्यार्थ-बोधस्यानुमितित्वस्वीकारे तादृशानुमितिसाधकहेतुरूपेण साकांक्षपदजन्यत्वं कल्पनीयम्, किन्तु तादृशी अनुमितिरसिद्धा, कथं तत्साधकहेतुकल्पनम्? एवं गौरस्तीति वाक्यज्ञानानन्तरं यज्ज्ञानं भवति, तज्ज्ञानं विषयीकृत्य अस्तित्वेन गौः श्रुतः, न तु अनुमित इति अनुभव एव पूर्वोक्तज्ञानस्य शाब्दबुद्धित्वे प्रमाणम्। श्रुतेः प्रामाण्यमास्तिकदार्शनिकानां विशेषतो नैयायिकानां पक्षे भेषजतुल्यम्। अतः श्रौतप्रमाणं शाब्दबोधविषये दर्शयितुमाह-'श्रोतव्यो मन्तव्य' इत्यादिप्रयोगदृष्ट्या शाब्दत्वस्यापि शृणोतेः शक्यतावच्छेदकत्वात् शाब्दबोधः स्वतन्त्र-प्रमितिरिति वस्तुतः स्वीकर्तव्या इति।

ये खलु शाब्दबोधं स्वीकुर्वन्ति, तेष्वपि शाब्दबोधस्य आकारविषये मतवैषम्यं दरीदृश्यते। केचन दार्शनिका आख्यातार्थमुख्यविशेष्यकं शाब्दबोधं स्वीकुर्वन्ति। केचित्तु धात्वर्थमुख्यविशेष्यकं शाब्दबोधं मन्यन्ते। केचित्तु प्रथमान्तार्थमुख्यविशेष्यकं शाब्दबोधं मन्यन्ते। तेषु नैयायिकानां मते 'देवदत्तः ग्रामं गच्छति' इत्यत्र द्वितीयायाः कर्मत्वमर्थः। तत्राधेयतासम्वन्धेन ग्रामस्यान्वयः। कर्मत्वस्य निरूपकतासम्बन्धेन धात्वर्थगमने अन्वयः, आख्यातार्थः कृतिः, तत्रानुकूलतासम्बन्धेन धात्वर्थगमनस्यान्वयः, कृतिश्चाश्रयतासम्बन्धेन देवदत्तेन सहान्वेति। तथाच ग्रामनिष्ठकर्मतानिरूपकगमनानुकूलकृतिमान् देवदत्तः इति प्रथमान्तार्थमुख्यविश्ष्यकः शाब्दबोधः। कर्मवाच्यस्थले 'देवदत्तेन ग्रामो गम्यते' इत्यत्र तृतीयार्थः कृतिः, तत्र समवायसम्बन्धेन देवदत्तस्यान्वयः, कृतिश्च जन्यतासम्बन्धेन धात्वर्थगमनेऽन्वेति। आख्यातस्य कर्मत्वमर्थः, तत्र निरूपितत्वसम्बन्धेन ग्रामस्यान्वयः। कर्मत्वस्याश्रयत्व-सम्बन्धेन प्रथमान्तार्थे ग्रामे अन्वयः। अतः 'देवदत्तमसमवेतकृतिजन्यगमननिरूपितकर्मताश्रयग्रामः' इति शाब्दबोधः।

वैयाकरणमते देवदेत्तः ग्रामं गच्छति द्वितीयाया आश्रयत्वमर्थः, तत्राभेदेन ग्रामस्यान्वयः, कर्मणः स्वनिष्ठकर्मतानिरूपकत्वसम्बन्धेन धात्वर्थगमनेऽन्वयः, 'गच्छति' इति स्थले तिपःअर्थः कर्ता, तत्र अभेदेन देवदत्तस्यान्वयः। कर्तुश्च गमने स्वनिष्ठकर्तृत्व-निरुपकत्वसम्वन्धेनान्वयः। तथा च देवदत्ताभिन्नकर्तृकं ग्रामाभिन्नकर्तृकं गमनम् इति धात्वर्थमुख्य-विशेष्यकशाब्दबोधः।

'देवदत्तेन ग्रामो गम्यते' इत्यत्र तृतीयायाः कर्ता अर्थः, तत्र अभेदेन देवदेत्तस्यान्वयः। कर्तुश्च गमने अन्वयः, आख्यातस्य कर्मत्वमर्थः, तत्र ग्रामादेः अभेदेनान्वयः। कर्मणश्च धात्वर्थे गमने अन्वयः। तथा च देवदत्ताभिन्नकर्तृकं ग्रामाभिन्नकर्मकं गमनम् इत्यन्वयबोधः।

मामांसकास्तु- 'देवदत्तस्तण्डुलं पचति' इत्यत्र आख्यातस्य कृतिरूपाभावना अर्थः। तण्डुलपदोत्तर-द्वितीयायाः कर्मत्वमर्थः। तत्राधेयतासम्बन्धेन तण्डुलस्यान्वयः, कर्मत्वस्य कृतौ आख्यातार्थे स्वनिरूपकधात्वर्थपाकानुकूलत्वसम्बन्धेनान्वयः। देवदत्तस्य

आधेयतासम्बन्धेन कृतावन्वयः। धात्वर्थपाकस्य करणत्वसम्बन्धेन कृतावन्वयः।

तथा च "देवदत्तसमवेता तण्डुलकर्मक-पाकानुकूलापाककरणिक इति शाब्दबोधः। 'देवदत्तेन तण्डुलः पच्यते" इति कर्माख्यातस्थले देवदत्तपदोत्तरतृतीयायाः कर्तृत्वमर्थः, तस्याख्यातार्थ कृतौ स्वनिरूपक-पाकानुकूलत्वसम्बन्धेनान्वयः। धात्वर्थस्य पाकस्य स्वकरणकौदनौद्देश्यकत्वसम्बन्धेनान्वयः कृतान्वयः, तत्राख्यातस्य कर्मत्वं भावना चार्थः। कर्मत्वस्य स्वनिरूपक-पाकानुकूलत्वसम्बन्धेन कृतावन्वयः। तथा च देवदत्तकर्तृकपाकानुकूला तण्डुलकर्मकपाकानुकूला पाककरण-कौदनोद्देश्यिका कृतिरिति बोधः।

अनेन प्रकारेण शाब्दबोधस्य बहुविधाकाराः दार्शनिकैः स्वीक्रियन्ते। साकांक्षपदसमूहो वाक्यमिति प्रायशः सर्वैः स्वीक्रियते। वाक्यघटकानां पदानां ये ये अर्थाः तेषां संसर्गं विषयीकृत्य तत्तदर्थस्तयोः संसर्गविषयकं यज्ज्ञानं तच्छाब्दबोधो वाक्यार्थबोधोऽन्ययबोधो वेत्युच्यते। तत्र विषयभूतेषु पदार्थेषु एको मुख्यविशेष्यतया भासते। अन्ये पदार्थाः विशेषणतया भासन्ते। संसर्गस्तु आकांक्षा मर्यादया भासते। चोक्तं व्युत्पत्तिवादे भट्टाचार्यपादैः "शाब्दबोधे

चैकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्य्यादया भासते”[२९]। तत्रापि शाब्दबोधे को मुख्यविशेष्यतया भासते इति जिज्ञासायां वैयाकरणैः धात्वर्थः व्यापारो मुख्यविशेष्यतया भासते इति कथितम्। अत एव तेषां मते ‘देवदत्तः ग्रामं गच्छति’ इत्यत्र देवदत्तकर्तृकग्रामनाष्ठसंयोगजनको व्यापारः इति वोधः।

प्रथमान्तार्थो मुख्यविशेष्यतया भासते इति नैयायिकाः। तेषां मते देवदत्तः ग्रामं गच्छतीत्यत्र ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमान् देवदत्तः इति बोधः।

मीमांसकास्तु आख्यातार्थः कृतिरेव मुख्यविशेष्यतया शाब्दबोधे भासते। तन्मते देवदत्तो ग्रामं गच्छतीत्यत्र देवदत्तनिष्ठा ग्रामसंयोगानुकूलव्यापारानुकूला कृतिरिति बोधः।

धात्वर्थः फलं मुख्यविशेष्यतया अन्वयबुद्धौ भासते इति जयन्तभट्टाः। तेषां मते निरुक्तवाक्यान् “देवदत्तकर्तृक-व्यापारजन्यः ग्रामनिष्ठः देवदत्तसंयोगः” इति बोधाकारः।

विशिष्टाद्वैतवादिनां मते आख्यातस्यार्थः कर्ता मुख्यविशेष्यतया भासते। तथाच तेषां मते निरुक्तवाक्यज्ञानात् देवदत्ताभिन्नः ग्रामनिष्ठसंयोग-

जनकव्यापारकर्ता इति बोधाकारः। एवम्विधाकारवैलक्षण्यं परिलक्ष्य वैशेषिकैः शाब्दबोधस्य स्वतन्त्रप्रमितित्वमस्वीकृत्य अनुमित्यन्तर्भावे शाब्दबोधस्य प्रवेशः क्रियते। तेषां मते एतानि पदानि परस्परार्थसंसर्गवन्ति साकाक्षं-पदसमूहत्वादित्यादयनुमितौ शाब्दबोधस्य चरितार्थता घटते इति शाब्दबोधस्य पृथक् प्रमितित्वव्यवस्थापनं व्यर्थमिति। तन्न शोभनं नव्यानां जगदीशादिनैयायिकानां मते इति तु प्रागेव कथितमस्माभिरिति दिक्॥

**तथ्यसूत्राणि –**

१. न्यायदर्शनम्, सूत्रसंख्या-३

२. आप्तोपदेशः शब्दः, न्यायदर्शनम्, सूत्रसंख्या-७

३. भाषापरिच्छेदः, कारिकासंख्या-१६५

४. भाषापरिच्छेदः मुक्तावली, शब्दखण्डम्

५. भाषापरिच्छेदः, कारिकासंख्या-८१

६. शक्तिवादः, गदाधरभट्टाचार्यः

७. तत्रैव

८. भाषापरिच्छेदः मुक्तावली, शब्दखण्डम्

९. तत्रैव

१०. आकांक्षा-योग्यता-आसत्तिप्रभृतीनां ज्ञानं शाब्दबोधस्य साक्षात्कारणम्

११. शब्दशक्तिप्रकाशिका, पृ. ६

१२. तदेव, पृ. ५

१३. 'न चासौ स्मृतिः, समानाकारसंस्काराप्रभवत्वात्'- शब्दशक्तिप्रकाशिका

१४. शब्दशक्तिप्रकाशिका, पृ. ७

१५. तत्रैव

१६. तत्रैव

१७. शाब्दबोधस्यान्तर्भावापत्तिः

१८. शब्दशक्तिप्रकाशिका

१९. व्युत्पत्तिवादः, गदाधरभट्टाचार्यः

# भ्रमविषये संशयविषये च नैयायिकमतसमीक्षा

**ड. तपनशंकरभट्टाचार्य्यः**
अध्यापकः यादवपुरविश्वविद्यालयस्य

(***निबन्धनिर्यासः-***
भारतीयदर्शने भ्रमस्य संशयस्य च विशेषस्थानं वर्तते। अयथार्थज्ञानं खलु भ्रमः। तद्वति तत्प्रकारकं ज्ञानं यथार्थम्। तदभाववति तत्प्रकारकं ज्ञानमयथार्थम्। यत्र यन्नास्ति तत्र तस्य ज्ञानं भ्रमः। विपरीतनिर्णयोऽपि भ्रमः। अस्य गुरुत्वं न्यायदर्शनेऽतीव वर्तते। देहेषु आत्मवत्प्रकारकबुद्धिः विपर्ययः। मिथ्याज्ञानं खलु विपर्ययः। एकस्मिन् धर्मिणि भावस्याभावस्य च यज्ज्ञानं स संशयः। यथा स्थाणुर्वा पुरुषो वा। संशयः सर्वासां प्रवृत्तीनां मूलम्। संशयः सर्वदा भावाभावगाही भवति इति न, कदापि भावावलम्बी संशयोऽपि भवति।)

आस्तिकनास्तिकभेदेन भारतीयदर्शनं द्विविधं भवति। दर्शनशब्दस्य व्युत्पत्तिस्तावद्-दृश्यते, ज्ञायते, प्राप्यते, लभ्यते आत्मतत्त्वं, पदार्थत्त्वं, विवक्षितार्थो येन तद्दर्शनम् (दृश्-ल्युट्, करणवाच्ये)। अस्तीति मतिर्यस्य स आस्तिक:, नास्तीति मतिर्यस्य स नास्तिक:। वेदोऽस्ति अर्थात् वेदस्य प्रमाणं ये स्वीकुर्वन्ति ते आस्तिका:, ये च न स्वीकुर्वन्ति ते नास्तिका:। आस्तिकदर्शनं षड्विधं भवति - न्याय-वैशेषिक-सांख्य-योग-

पूर्वमीमांसोत्तरमीमांसाभेदेन। पूर्वमीमांसाशब्देन जैमिनिप्रणीतं मीमांसादर्शनम्, उत्तरमीमांसाशब्देन वादरायणप्रणीतं वेदान्तदर्शनं च बोध्यते। न्यायदर्शनस्य सूत्रकारस्तावद् महर्षि: गौतम:, भाष्यकारो वात्स्यायन:, न्यायवार्त्तिककार: खलु उद्द्योतकर:, न्यायवार्त्तिकतात्पर्यटीकाकारस्तावद् वाचस्पतिमिश्र:, न्यायवार्त्तिकतात्पर्यपरिशुद्धिटीकाकारः तावद् उदयनाचार्य्य:।

अधुना विचार्य्यते कस्तावद् भ्रम:, कश्च संशय:। अयथार्थज्ञानमेव भ्रम:। यत्र यन्नास्ति तत्र तस्य ज्ञानं भ्रम:। समुदायार्थश्च तदभाववन्निरूपिततन्निष्ठविषयताप्रतियोगि ज्ञानम्। भ्रमश्च दोषाज्जन्यते। अस्मिन् तद् इति प्रत्यय: भ्रम:। विशेष्यताव्यधिकरणप्रकारकं ज्ञानं भ्रम:। मिथ्याज्ञानापरपर्य्याय:, अयथार्थनिश्चय: भ्रम:। विपरीतनिर्णयोऽपि भ्रम:। भ्रमस्य गुरुत्वं न्यायदर्शने अतीव वर्तते। भ्रमज्ञानं विना यथार्थज्ञानं न सम्भवति। भ्रमलक्षणं भाषापरिच्छेदग्रन्थस्य मुक्तावलीटीकायामेवमुक्तम् – 'तदभाववति तत् प्रकारकं ज्ञानं भ्रम:।' कारिकावल्यामुक्तम् –

> "अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते।
> तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।
> तत् प्रपञ्चो विपर्य्यास: संशयोऽपि प्रकीर्त्तित:।"[१]

प्रमाप्रमाभेदेन ज्ञानं द्विविधं भवति। प्रमा यथार्थज्ञानम्, अप्रमा च अयथार्थम्। कारिकावल्याम् आदौ अप्रमा, तदनन्तरं प्रमा इत्युक्तम्। यद्यपि 'प्रमा अप्रमा च' इति निरूपणक्रम उचितः, तथापि प्रमालक्षणस्य प्रमाभिन्नत्वघटिततया अग्रे भ्रमत्वज्ञानाद्यर्थं प्रागत्र अप्रमा अभिहिता। रजतत्वादिशून्ये शुक्तौ या तन्मति रजतत्वप्रकारकबुद्धिः 'इदं रजतमिति' सा अप्रमा इत्युच्यते। तस्य भ्रमस्य अवान्तरभेदस्तावत् विपर्ययः (विपर्यासः), संशयश्च। 'तत्प्रपञ्चो विपर्यासः संश्योऽपि प्रकीर्तितः।'[२] तदभाववन्निष्ठविशेष्यतानिरूपिता या तन्निष्ठप्रकारता– तन्निरूपकज्ञानत्वम् अप्रमात्वम्। जीवस्य प्रवृत्तिं प्रति रागो द्वेषो मोहश्च कारणं भवति। तथा च न्यायसूत्रम् – 'प्रवर्त्तनालक्षणा दोषाः'[३] प्रवृत्तिजनकत्वं खलु प्रवर्त्तना। रागो द्वेषो मोहश्च आत्मानं पुण्यकर्मणि पापकर्मणि च प्रवर्तयति। यस्मिन् आत्मनि मिथ्याज्ञानं जायते तस्मिन्नेव आत्मनि द्वेषोऽपि जायते। तथा च न्यायभाष्यम् – 'प्रवर्तना प्रवृत्तिहेतुत्वं, ज्ञातारं हि रागादयः प्रवर्तयन्ति पुण्ये पापे वा, यत्र मिथ्याज्ञानं तत्र रागद्वेषाविति।'[४] रागद्वेषमोहा एव दोषशब्देन बोध्या भवन्ति। तत्र मोहस्यैव प्राधान्यं वर्तते। यस्य मोहो नास्ति तस्य रागो द्वेषश्च न जायते। कश्चित् पुरुषः कर्मणा एव सुखं दुःखं च लभते। अतएव दोषाः खलु

रागद्वेषमोहाः। रागादिदोषत्रयम् अनुमानसिद्धं भवति। मोहं विना कस्यापि रागो न जायते द्वेषोऽपि न जायते। रागद्वेषं विना कोऽपि पुरुषः सुखजनककर्मणि, दुःखजनककर्मणि च प्रवृत्तो न भवति। अतएव दोषास्तावद् रागद्वेषमोहाः। 'तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता' – इति अप्रमालक्षणं कारिकावल्यामुक्तम्। 'तदभाववति तत्प्रकारकं ज्ञानं भ्रमः' इति मुक्तावल्यामुक्तम्।[५] तदभाववन्निष्ठ-विशेष्यतानिरूपिता या तन्निष्ठा प्रकारता तन्निरूपकज्ञानत्वम् अप्रमात्वम् इति। रजतत्वाभावनच्छुक्तिनिष्ठविशेष्यता-निरूपिता या रजतत्वनिष्ठा प्रकारता तन्निरूपकज्ञानत्वस्य 'शुक्तौ इदं रजतमित्य'त्र सत्त्वादिति लक्षणस्य सङ्गतिः। 'घटपटौ' इति समूहालम्बने घटे घटाभाववत्पटनिष्ठ-विशेष्यतानिरूपितप्रकारताविरहादेव नातिव्याप्तिरिति। भ्रमो द्विविधः विपर्यासः संशयश्च। विपर्यास्तावत् –

> 'आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीतता मतिः।
> भवेन्निश्चयरूपा या।'[६]

देहेषु आत्मवत्प्रकारकबुद्धिः विपर्ययः। अर्थात् 'देहे अयमात्मा' इति निश्चयात्मकं ज्ञानं विपर्यय इति। एवं शङ्खे अयं पीत इति पीतवत्प्रकारकनिश्चयात्मकं यज् ज्ञानं तद् विपर्यय

उच्यते। विपर्य्यासविषये उक्तं मुक्तावल्याम्- "शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञानं गौरोऽहमित्याकारकम्, एवं शङ्खादौ 'पीतः शङ्ख' इत्याकारकं यज् ज्ञानं निश्चयरूपं तद् भ्रम इति।" मिथ्याज्ञानं खलु विपर्ययः। स च तदभाववति तत्प्रकारकनिश्चयरूपः। प्रमालक्षणे अतिव्याप्तिवारणार्थं लक्षणे 'तदभाववती'ति घटाभाववति भूतले 'घटाभाववद् भूतलम्' इति निश्चयवारणाय लक्षणे 'तत्प्रकारके'ति पदं प्रदत्तम्। विपर्ययलक्षणे निश्चयपदानुपदाने तदभाववति तत्प्रकारकत्वस्य संशये इच्छायां च सत्त्वेन तत्रातिव्याप्तिः। अतएव तद्वारणाय लक्षणे निश्चयपदम्। एवं 'रङ्गरजतयोः इमे रङ्गरजते' इति यथार्थसमूहालम्बने अतिव्याप्तिवारणाय – तदभाववन्निष्ठविशेष्यतानिरूपित-तन्निष्ठप्रकारताशालित्वे सति संशयान्यत्वे सति ज्ञानत्वं विपर्ययत्वमिति। संशयस्य स्वरूपं कारिकावल्यामुक्तम्-

संशयोऽथ प्रदर्श्यते।
किंस्विन्नरो वा स्थानुर्वेत्यादिबुद्धिस्तु संशयः।।७

'किंस्वित्' इत्यस्यार्थस्तावद् वितर्कः। 'नरो वा' = 'नरत्ववान्न वा' इति नरत्वतदभावप्रकारकज्ञानं संशयः। एवं 'स्थाणुर्वा स्थाणुत्ववान् न वा' इति स्थाणुत्वस्थाणुत्वाभावप्रकारकज्ञानं

संशयः। 'नरो वा स्थाणुर्वेति भावद्वयकोटिकैक-संशयप्रसिद्धत्वात् संशयद्वयं बोध्यम्।

संशयस्य ज्ञाने निश्चयज्ञानस्य अपेक्षा वर्तते। अतएवाधुना निश्चयस्य स्वरूपमालोच्यते। 'तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः'।[८] तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चय इति। यथा- 'घटे घट' इति ज्ञानं घटत्वाभावाप्रकारकं घटत्वप्रकारकं च ज्ञानं निश्चयः। एवं 'शुक्तौ रजतम्- इत्यत्र रजतत्वाभावाप्रकारकं रजतत्वप्रकारकं च ज्ञानं निश्चयज्ञानमिति।

स संशयो मतिर्या स्यादेकत्राभावभावयोः।
साधारणादिधर्मस्य ज्ञानं संशयकरणम्।।[९]

संशये निश्चयलक्षणस्य अतिव्याप्तिवारणाय तदभावा-प्रकारकमिति। संशयलक्षणस्य व्याख्यानमेव भवति – 'एकस्मिन् धर्मिणि भावस्य अभावस्य च यज्ज्ञानं स संशय इत्यर्थः। असाधारणधर्मज्ञानं च उभयसाधारणधर्मज्ञानम। एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः्। तर्कसंग्रहे संशयस्य लक्षणमेवमुक्तम– 'एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं संशयः।'[१०] अन्नंभट्टेन पूर्वमुक्तम्

– 'अयथार्थस्त्रिविध' –'संशयविपर्ययतर्कभेदात'। संशयस्य उदाहरणं यथा – स्थाणुर्वा पुरुषो वा। मिथ्याज्ञानं विपर्ययः। यथा शुक्तौ इदं रजतमिति। व्याप्यारोपेण व्यपकारोपोस्तर्कः। उदाहरणं यथा – यदि वह्निर्न स्यात्, तर्हि धूमोऽपि न स्यात्। संशयः अनुमित्यात्मकः शाब्दबोधात्मको वी न भवति। शब्दव्याप्ति-ज्ञानयोर्निश्चयमात्रजनकत्वनियमः। बहुभाव-पदार्थविषयकसंशयस्य एव उपलब्धिर्भवति। यथा – किं इन्दुः, किं पद्मम्, किमु मुकुरविम्बम्, किमु मुख्यम् इत्यादि। संशयविषयकं न्यायसूत्रं तावद् – 'समानानेकधर्मोप-पत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।'[११] अस्मिन् सूत्रे लक्ष्यन्तावत् संशयः। विमर्शपदेन संशयस्य सामान्यलक्षणं सूचितम्। 'विमर्श' - इत्यत्र मृश्–धातोरर्थस्तावत् ज्ञानम्। 'वि'शब्दस्य अर्थः विरोधः। तेन विमर्शपदस्य अर्थो विरुद्धपदार्थानां ज्ञानम्। एकस्मिन् धर्मिणि विरुद्धपदार्थानां ज्ञानमेव संशयः। अतएव संशयसूत्रस्य भाष्यकारकृतं लक्षणम् – 'समान-धर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति।'[१२] संशय एव न्यायप्रवृत्तेर्मूलम्। अत्र न्यायशब्देन प्रतिज्ञादि-पञ्चावयववाक्यानि बोध्यन्ते। अतएव संशय एव न्यायस्य पूर्वाङ्गम्। यतः अज्ञातपदार्थे न्यायस्य प्रवृत्तिर्न भवति।

निश्चितपदार्थे अपि न्यायस्य प्रवृत्तिर्न भवति। किन्तु यस्मिन् पदार्थे कस्यापि संशयो जातः तस्मिन् सन्दिग्धपदार्थे एव न्यायस्य प्रवृत्तिर्भवति। वादिनः प्रतिवादिनश्च स्वकीयसिद्धान्ते यदि संशयो न स्यात् तथापि मध्यस्थव्यक्तीनां संशयनिरासार्थं ते प्रतिज्ञा-दिपञ्चावयववाक्यानां प्रयोगेण स्वपक्षस्थापनं परपक्षसमर्थनञ्च कुर्वन्ति। मध्यस्थव्यक्तीनां संशय एव न्यायप्रवृत्तेर्मूलम्। अतएव महर्षिगौतमः न्यायदर्शनस्य प्रथमसूत्रस्य आदौ प्रमाणपदार्थं ततः प्रमेयपदार्थमुक्तवान्। तृतीयपदार्थरूपेण 'संशयपदार्थस्य उल्लेखः कृतः। प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानेन निःश्रेयसप्राप्तिर्भवि-ष्यति। सामान्यरूपेण प्रमाणपदार्थस्य प्रमेयपदार्थस्य च प्रतिपादनेन सर्वेषामेव पदार्थानां सामान्यरूपेण कथनं सम्पूर्णं भवति, तथापि संशयादिचतुर्दशपदार्थानां विशेषज्ञानं न सम्भविष्यति। संशयसूत्रोक्तविमर्शब्देन विरूद्धपदार्थज्ञानं बोध्यते। 'अनवधानं ज्ञानं संशयः' इति वात्स्यायनादि-प्राचीननैयायिकैरुक्तम्। अवधारणशब्दस्यार्थस्तावद् निश्चयः। निश्चयाभावः संशयः। यस्मिन् धर्मिणि किञ्चिदपि ज्ञानं न भवति तस्मिन् विषये निश्चयस्याभावो वर्तते। यस्मिन् विषये कस्यापि संशयो जायते, तद्विषये पूर्वम् तस्य पुरुषस्य सामान्यज्ञानस्य अपेक्षा अवश्यं वर्तते। किन्तु तस्य पदार्थस्य विशेषधर्मज्ञानस्य अवधारणाभावात् तत्र संशयो भवति।

विशेषधर्मस्य निश्चये संशयो न भवति। संशयसूत्रे 'विशेषापेक्ष'–पदेन तत्सूचितं भवति। विशेषधर्मस्मरणेन संशयस्य नाशो भवति। अर्थात् विशेषधर्मस्य निश्चयाभावः संशयस्य कारणम्।

अस्माकं याः प्रवृत्तयः सन्ति तासां सर्वासां मूलं तावद् भ्रमः। यतः जन्मरहितो यो आत्मा स शरीरसम्बन्धे सर्वासां विपत्तीनां कारणं भवति। निरवयवस्य नित्यस्य आत्मनः शरीरेण सह यः सम्बन्धः, तस्य सम्बन्धस्य प्रारम्भः कदा जातस्तन्न ज्ञातम्। शरीरात्मभ्रमः अर्थात् शरीरे आत्मभ्रमः अर्थात् शरीरमेव आत्मा एतादृशो यो भ्रमः तेन भ्रमेणैव जीवात्मनः स्वरूपं विस्मृतं जातम् । शरीरमेव आत्मा इति अस्माभिः ज्ञातम्। शरीरमेव चेतनम् – एतादृशो यो महाभ्रमः, तस्मिन् महाभ्रमे सर्वे मनुष्या मोहाच्छन्ना जाताः, निपतिता जाताः। तस्मात् शरीररूप – आत्मनः तुष्टिविधाने पुष्टिविधाने च मनुष्याः सर्वदा व्यग्रा यत्नशीलाश्च जाताः। ये तावद् मोक्षलाभार्थं भगवदुपासनायां प्रवृत्ता जाताः, तेषामपि मोक्षलाभार्थं या प्रवृत्तिः अर्थात् जपतपः – कर्मादि तस्याः प्रवृत्तेः मूलमपि भ्रमः। अहं बद्धः मुक्तिमिच्छामि, मुक्तो भवितुमिच्छामि – एतादृशी इच्छा अपि भ्रमवशाद् भवति। आत्मा सर्वदा मुक्तः, न बद्धः। अतएव मुक्तस्य आत्मनः मुक्तेच्छा भ्रमवशाद् भवति। अतएव आत्मनः बद्धचिन्तनेन

मनुष्याः सर्वदा व्याकुलाः सन्ति, अतएव ते तपस्यादिकं कुर्वन्ति। एतानि सर्वाणि कर्माणि भ्रममूलकानि। पूर्वपूर्वजन्मीयवद्धमूलभूतो यो संस्कारः स संस्कार एव जीवस्य देहात्मभ्रमं प्रति मूलं कारणम्। यद्यपि भाषापरिच्छेदे उक्तम् –

‘दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्।
पित्तदूरत्वादिरूपो दोषो नानाविधो मतः।।’[१३]

अर्थात् अप्रमाज्ञानं प्रति असाधारणं कारणं दोषः। प्रमाज्ञानं प्रति असाधारणं कारणं गुणः। तथापि आत्मनः अनादिकालात् प्रवाहितो बद्धमूलो यो भ्रमरूपसंस्कारः स एव जीवस्य यावतीयभ्रमं प्रति मूलकारणम् – तदेव अवश्यं वक्तव्यम्। एकदा नास्तिक्यवादस्य प्रचारेण आध्यात्मिकमार्गस्य विनाशार्थं नास्तिकजनाः चेष्टितवन्तः। सर्वं ज्ञानं भ्रमः अर्थात् भ्रमात्मकः सन्देहात्मको वा, यथार्थज्ञानमेव नास्ति – इति तैरुक्तम्। इदं दुष्टमतं ते प्रचारं कृतवन्तः। तदा ज्ञानसम्राड् वेदः तेषां नास्तिकानां दुष्टमतेन कश्चित् म्लानभूतो जातः। ततः भारते धर्मकर्मादयः प्रायः लुप्ता जाताः। तदा देवातानां प्रेरणावशान्महर्षिः गौतमः न्यायदर्शनरूपं मोक्षदर्शनं रचितवान्। अस्मिन् विषये प्रमाणं प्रथमसूत्रे एव वर्तते। प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानेन

अपवर्ग अर्थात् मोक्षलाभो भविष्यति। महर्षिविरचितस्य न्यायदर्शनस्य प्रथमसूत्रस्य ‘प्रमाण’शब्देन विरुद्धमतानां निराशो भवति। कथम्? न्यायभाषस्य आदौ तत् सुष्ठुतया प्रतिपादितम् – तत्र उक्तम् –‘प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्। प्रमाणमन्तरेण नार्थ-प्रतिपत्तिः, नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्। प्रमाणेन खल्वयं ज्ञातार्थमुपलभ्य तमर्थमभीप्सति जिहासति वा। तस्येप्सा-जिहासा-प्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते। सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः। समीहमानस्तमर्थ-मभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा। अर्थस्तु सुखं सुखहेतुश्च, दुःखं दुःखहेतुश्च। सोऽयं प्रमाणार्थोऽपरिसंखेयः, प्राणभृद्भेदस्यापरिसंखेयत्वात्।’ सर्वेषां दुःखानाम् आत्यन्तिकनिवृत्या एव जीवस्य मोक्षलाभो भवति। ‘दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः’ इति गौतमेनोक्तम्। जीवस्य रागो द्वषो मोहश्च दोषः। देहादौ आत्मबुद्धिरूपं मिथ्याज्ञानमेव अहङ्कारः। तद्विपरीतं ज्ञानम् अर्थात् ‘शरीरं न आत्मा’ – इति ज्ञानं खलु तत्त्वज्ञानम्। तपश्चरणरूपसाधनया आत्मविषये शरीरादिविषये च चरमतत्त्वज्ञानेन मिथ्याज्ञानस्य नाशो भवति, ततः पूर्वसञ्चितकर्मणाम् अर्थात् प्रारब्धकर्मणां नाशो भवति। अतएव तस्य पुनर्जन्म न भविष्यति। तथा च श्रुतिः – ‘न च

पुनरावर्त्तते।' किन्तु चरमतत्त्वज्ञानेन प्रारब्धकर्माणां नाशो न भवति। भोगं विना तेषां क्षयो न भवति। चरमतत्त्वज्ञानेन क्रमशः जीवस्य अपवर्गो भविष्यति। येन क्रमेण जीवस्य परा मुक्तिर्भविष्यति तस्य क्रमप्रदर्शनं महर्षिगौतमेन द्वितीयसूत्रे कृतम्। तथा च सूत्रम् – 'दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः।' अस्मिन् सूत्रे पूर्वं पूर्वं कार्यम्,परं परं च कारणम्। कारणाभावे कार्यस्य उत्पत्तिर्न भवति। तस्मात् कारणस्य निवृत्तौ कार्यस्य निवृत्तिर्भवति। अतएव दुःखस्य कारणं जन्म। जन्मनः कारणं धर्माधर्मरूपप्रवृत्तिः। तस्याः प्रवृत्तेः कारणं तावत् रागद्वेषरूपदोषः। दोषस्य कारणं मिथ्याज्ञानम्। आत्मादिविषये भ्रमज्ञानेनैव दोषस्य आत्यन्तिकनिवृत्तौ मिथ्याज्ञानस्य आत्यन्तिकनिवृत्तेः आवश्यकता वर्तते। प्रत्यक्षादिप्रमाणैः प्रमेयपदार्था एव मुमुक्षुपुरुषाणां प्राधान्येन ज्ञातव्याः। प्रमेयः=प्रकृष्टो मेयः=सर्वश्रेष्ठो मेयः। द्वादश-विधानां प्रमेयपदार्थानामुल्लेखः महर्षिगौतमेन कृतः।

'आत्मा-शरीरेन्द्रियार्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःखापवर्गास्तु प्रमेयम्।'[१४] अत्र प्रमेयपदेन पारिभाषिकप्रमेयस्य ग्रहणं भवति। प्रमाणेन यः सिद्धः स प्रमेयः। ते च प्रमेया असंख्याः। भाष्यकारेणोक्तम् –

द्रव्यादयोऽपि प्रमेयाः। अत्र सूत्रे प्रमेयपदेन आत्मादिद्वादशानां ग्रहणं भवति। तेषामेव प्रमेयाणां तत्त्वज्ञानेनैव मोक्षलाभो भवति। तत्रापि प्रमेयेषु मध्ये प्रथमः प्रमेयस्तावद् आत्मा। अतएव न्यायदर्शने तत्त्वज्ञानेन मोक्षलाभः प्रतिपादितः। भ्रमज्ञानं तत्त्वज्ञाने अन्तरायो भवति। अतएव भ्रमस्य गुरुत्वं न्यायदर्शने अतीव वर्तते। सर्वस्य द्रष्टा खलु आत्मा, स एव भोक्ता, सर्वज्ञः सर्वानुभावी। पदार्थानाम् असंख्यत्वविषये भाष्यकारेण उक्तम् – 'अस्त्यन्यदपि द्रव्यगुण-कर्म-सामान्य-विशेष-समवायाः प्रमेयं तद्भेदेन चापरिसंख्येयम्। अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात् संसारः इत्यतः एतदुपदिष्टः विशेषेणेति।'

संशयः एव सर्वासां प्रवृत्तीनां मूलम्। यतः अज्ञाते पदार्थे न्यायस्य प्रवृत्तिर्न भवति। पुनः निश्चिते पदार्थे न्यायस्य प्रवृत्तिर्न भवति। अतएव सन्दिग्धे संशये वा पदार्थे न्यायस्य प्रवृत्तिर्भवति। अस्मात् कारणादेव महर्षिः गौतमः संशयकथनात् परं पक्षप्रतिपक्षाभ्यां न्यायप्रवृत्त्या वा अर्थावधारणस्य निर्णयो भवति इत्युक्तम्। तथा गौतमसूत्रम् – 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः'।[१५] स्वपक्षसंस्थापनेन परपक्षखण्डनेन च पदार्थानामवधारणं निर्णयः। विमर्शं कृत्वा अर्थात् संशयेन कथम् अर्थावधरणस्य निर्णयो भवति? पक्षप्रतिप्रक्षाभ्याम् अर्थात् साधनेन

उपालम्भेन च अर्थावधारणं भवति। साधनं खलु स्थापना। उपालम्भ: अर्थात् परपक्षखण्डनं प्रतिषेधः। तथा च भाष्यम् – 'स्थापना साधनं, प्रतिषेधः उपालम्भ:। तौ साधनोपालम्भौ पक्षप्रतिपक्षाश्रयौ व्यतिषक्तानुबन्धनेन प्रवर्तमानौ पक्षप्रतिपक्षावित्युच्येते। तयोरन्यतरस्य निवृत्तिरेकतरस्य अवस्थानमवश्याम्भावि, यस्यावस्थानं तस्यावधारणं निर्णयः।'[१६] आभ्यामेव अर्थावधारणं सम्भवति इति तत्र न तात्पर्यम्। अपि च पक्षप्रतिपक्षाभ्यां संशयस्य नाशो भवति अर्थाद् एकस्य मतस्य स्थापनेन अर्थस्य तात्पर्यनिर्णयो भवति। संशयं विना न्यायस्य प्रवृत्तिर्न भवति। यथा आदौ पर्वतस्य ज्ञानं भवति, किन्तु स पर्वतो वह्निमान् न वा इति न जानामि। एवं प्रकारे संशये न्यायस्य प्रवृत्तिर्भवति । तत्रैव न्यायप्रयोगेण तत्त्वस्य निर्णयो भवति। अतएव सम्पूर्णे ज्ञाते अर्थे अथवा सर्वथा अनुपलब्धे अर्थे न्यायस्य प्रवृत्तिर्न भवति। किन्तु संशयितेऽर्थे एव पदार्थं निर्णेतुं न्यायस्य प्रवृत्तिर्भवति। तथा च न्यायभाष्यम् – 'तत्रानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते, किं तर्हि? संशयितेऽर्थे। यथोक्तं विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय' इति। विमर्शः संशयः, पक्षप्रतिपक्षौ न्यायप्रवृत्तिः, अर्थावधारणः निर्णयस्तत्त्वज्ञानमिति। स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुच्यते।'[१७] आत्मादिद्वादशविधप्रमेये पदार्थे भ्रमो भवति।

न्यायदर्शने भ्रम अन्यथाख्याति इत्युच्यते। आत्मादिद्वादशविधपदार्थे मिथ्याज्ञानरूपभ्रमः कथं भवति? तस्य प्रतिपादनमपि भाष्यकारेण कृतम्। द्वादशविधपदार्थे तत्त्वज्ञानं कथं भवति तदपि भाष्यकारेण प्रतिपादितम्। अन्यप्रकारेण ख्यातिः = अन्यथाख्यातिः। विपरीतरूरेण ज्ञानम् अन्यथाख्यातिः। अन्यथा = अन्यप्रकारेण, ख्यातिः = ज्ञानम्। शुक्तौ रजतत्त्वरूपेण ज्ञानम् = अन्यथाख्यातिः। शुक्तौ इदं रजतमिति ज्ञानं भ्रमः। अरजतशुक्तौ रजतत्त्वविशिष्टरूपेण ज्ञानम् एव 'इदं रजतम्' इति मिथ्याज्ञानम्। भ्रमस्तु निश्चयात्मकविपरीतज्ञानम्। संशयो न निश्चयात्मकं ज्ञानम्। एकधर्मिकविरुद्धभावाभावावगाहि ज्ञानम्। यथा – स्थाणुर्न वा। स्थाणुत्ववान् स्थाणुत्वाभाववान् वा एकस्मिन् एव अधिकरणे विरुद्धभावाभाव – आन्दोलनात्मकं ज्ञानं संशयः। 'संशयः सर्वदा भावाभावावगाही भवति' – इति न। परन्तु कदापि केवलं भावावलम्बी संशयो भवति। भाषापरिच्छेदग्रन्थे 'नरो वा स्थाणुर्वा' – एतादृशं ज्ञानमपि संशय इति विश्वनाथेनोक्तम्। वस्तुतः कोटिद्वयविषये संशयो जायते। एतद्विषये पूर्वसंस्कारजन्यं स्मरणं संशयमात्रस्य कारणं भवति। अतएव यस्मिन् स्थले कस्यापि स्थाणुत्वपुरुषत्वरूपविरुद्धभावरुपकोटिद्वयस्य स्मरणं भवति,

तस्यापि भावद्वयकोटिकः संशयो जायते। एतद्विषये पूर्वसंस्काजन्यं स्मरणं संशयमात्रस्य कारणं भवति। अतएव यस्मिन् स्थले कस्यापि स्थाणुत्वपुरुषत्वरूप-विरुद्धभावरूपकोटिद्वयस्य स्मरणं भवति, तस्यापि भावद्वयकोटिकः संशयो जायते। तत्र भावकोटिसंशयस्य अन्यः कोऽपि बाधको भवति। अतएव प्राचीननैयायिका भावकोटिसंशयमपि स्वीकुर्वन्ति। भाष्यकारो बहुभाव-कोटिसंशयस्य प्रदर्शनमपि कुर्वन्ति। 'संशयसूत्रस्य अनेकधर्मोपपत्तेः' इति पदस्य व्याख्यानकाले भाष्यकारेण 'अनेक'शब्दस्य अर्थः एवं उक्तः। 'समानजातीयमसमान-जातीयञ्चानेकम्। तस्यानेकस्य धर्मोपपत्तेः। विशेषस्य उभयथादृष्टत्वात्।' अनेकशब्देन सजातीयो विजातीयश्च पदार्थो गृह्यते। अस्माकं यास्तावत् प्रवृत्तयः, यथा वयं उन्नतिं लब्धुं इच्छामः, जपादिकं कर्तुं इच्छामः, अर्थोपार्जनं कर्तुं इच्छामः, उत्तमकर्म कर्तुम्, अपकर्म कर्तुं इच्छामः इत्यादिप्रवृत्तीनां मूलं खलु भ्रमः। आत्मनः जन्म नास्ति, जरा नास्ति मृत्युरपि नास्ति। आत्मनः शरीरेण सह यदा सम्बन्धो जातः तदा एव 'अहं शरीरम्' एतादृशो महाभ्रमो जातः। भाषापरिच्छेदे उच्यते – 'आद्यो देहेष्वात्मबुद्धिः'। तत्र प्रथमो भ्रमः खलु देहेषु आत्मबुद्धिः। देहे चैतन्यवद् ज्ञानम्। देहरक्षानिमित्तं सदा चेष्टते । देहस्य तुष्टिः, देहस्य पुष्टिः

इत्यादिकं चिन्तनं जीवः सदा करोति। देहस्य प्रतिकूलविषयाणां विनाशं ते कुर्वन्ति। संशयसूत्रस्य समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्धव्यवस्थातः इति पदत्रयेण पञ्चविधः संशयः सूचितः। देहस्य पुष्टिसाधनार्थं तुष्टिसाधनार्थं च विविधानि कर्माणि जीवाः कुर्वन्ति। तेन अदृष्टस्य सञ्चयो भवति । अतएव- 'पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् '– इति तेषां जीवानां भवति । अयं भ्रमो न्यायदर्शने अन्यथाख्यातिशब्देन बोध्यते, अन्यप्रकारेण ज्ञानम् उच्यते। 'शुक्तिर्न रजतम्' – तथपि रजतरूपेण ज्ञायते। 'अहं (आत्मा) बद्धः' इति विचिन्त्य उत्तमकर्माणि यथा जीवाः करोति अपकर्माणि अपि स करोति। किन्तु आत्मा मुक्तः, न वद्धः – इति ज्ञानाभावात् ते जीवाः कर्माणि कुर्वन्ति। अतएव तत्रापि भ्रमो विद्यते। आत्मनः पुत्रो नास्ति, पिता नास्ति, वाह्यिकसम्पदपि नास्ति। अतएव तस्य आत्मनः कृतेः यानि कर्माणि तान्यपि भ्रमवशाद् भवति। शङ्कराचार्य्यकृते अध्यासभाष्ये अपि भ्रमविषयः आलोचितः। येषां तत्त्वज्ञानं न भवति तेषां कृते इदं शास्त्रम्। मिथ्याज्ञानं येषां विद्यते तेषां कृते इदं शास्त्रम्। मिथ्याज्ञानस्य विनाशाय सर्वाणि शास्त्राणि वर्तन्ते। तत्र शाङ्करभाष्ये उक्तम् – 'अविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च।' मिथ्याज्ञानिनां कृते शास्त्राणि। तत्त्वज्ञानिनां

कृते शास्त्राणि न विरचितानि। आत्मादिद्वादशप्रमेयाणां तत्त्वज्ञानेन मोक्षलाभो भविष्यति। किन्तु मुख्यफलरूपपरामुक्तेः क्रमवर्णनम् 'दुःख-जन्म-प्रवृत्ति...' इत्यादिसूत्रे वर्णितम्। अतएव एतत् सूत्रद्वयस्य भाष्ये सूक्ष्मातिसूक्ष्मरूपेण आलोचितम्। आत्मादिद्वादशपदार्थानामु-पदेशः महर्षिणा कथं कृतः? एतेषु आत्मादिषु जीवानाम् भ्रमो वर्तते। अतएव तद्भ्रमं निवारयितुं तेषां तत्त्वज्ञानार्थं महर्षिणा सूत्रितम्। भाष्यकारेण च व्याख्यातम्। आत्मादिपदार्थानां तत्त्वज्ञानेन भ्रमस्य विनाशो भवति। अतएव तदनन्तरं मोक्षलाभो भविष्यति। तत्त्वज्ञानं मोक्षस्य जनको भवति। कथं जीवस्य मोक्षलाभो भवति – न्यायदर्शने तद् उपदिष्टम्। मोक्षस्य उपायभूतं शास्त्रं खलु न्यायशास्त्रम्, तद् मोक्षोपायशास्त्रम्। वैशेषिकदर्शनेऽपि उक्तम्- पदार्थानां तत्त्वज्ञानेन मोक्षलाभो भवति। पदार्थविषये अस्माकमासक्तिर्विद्यते। पदार्थानामासक्तिवशाद् वयं संस्कारे बद्धा जाताः। पुत्रः, सम्मानम्, यशः, ख्यातिः, धनरत्नादिभोग्यविषया: संसारे वर्तन्ते। तेषु विषयेषु अस्माकमासक्तिर्विद्यते। एतेषां विषयाणां तत्त्वज्ञानेन अस्माकं भ्रमस्य विनाशो भवति, आसक्तेर्नाशोऽपि भविष्यति। मम पुत्रः, मम कन्या, मम गृहम् – इत्यादि ममत्वबोधः भ्रमवशादेव भवति। तेषामासक्तौ सुखं न वर्त्तते। किन्तु तेषु दुःखं वर्तते। एते सर्वे पदार्था अचेतनभूताः जडभूताश्च।

जडपदार्थैः 'अहम्' इति चेतनो बद्धो जातः। घटपटादिपदार्थाः नश्वरभुताः। अचिरे तेषां नाशो भविष्यति। तत्त्वज्ञानेन पदार्थानां परिणामविषयेऽपि ज्ञानं भविष्यति।

अहंकारस्य निवृत्तिं विना जीवस्य संसारनिवृत्तिः अर्थात् मुक्तिर्न सम्भवति। अहंकारस्य निवृत्तिः कथं भवति – इति जिज्ञासायां महर्षिगौतमेन सूत्रितं यत्, 'दोषनिमित्तानाम् तत्त्वज्ञानादहंकारनिवृत्तिः'[१८]। दोषशब्देन रागः द्वेषः मोहश्च बोध्यते। इति पूर्वमुक्तम्। शरीरादयः बहवः पदार्थाः दोषस्य निमित्तं भवति। मिथ्याज्ञानेन जीवानां संसारे आवर्तनं भवति। अतएव तत्त्वज्ञानमेव मुक्तेः कारणं भवति। आत्मसाक्षात्कार एव मुक्तेश्चरमकारणम्। आत्मसाक्षात्कारे ईश्वरस्य अनुग्रहः अपेक्षते। अर्थात् ईश्वरस्य अनुग्रहं विना आत्मसाक्षातकारो न सम्भविष्यति। अतएव श्वेताश्वतरोपनिषदि दृश्यते – 'तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्व्वै शरणमहं प्रपद्ये'। अन्ते च पुनः प्राप्यते – परमेश्वरं गुरुं प्रति च परां भक्तिं विना ईश्वरसाक्षातकारो न सम्भवति। अतएव तत्र उपनिषदि वर्तते –

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।'

अतएव ऋग्वेदे परमेश्वरस्य समीपे मुक्तेः प्रार्थना परिदृश्यते – 'मृत्योमुक्षीय मामृतात्'। [१९]

> "का तव कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः।
> कस्य त्वं वा कुत आयात तत्त्वं चिन्तय तदिदं भ्रातः।।"

-- इति शंकराचार्य्यस्तोत्रमत्र स्मरणयोग्यं भवति। मोक्षं प्रति तत्त्वज्ञानं कारणं भवति। तत्त्वज्ञानं प्रति भ्रमज्ञानं संशयज्ञानं च कारणं भवति। भ्रमज्ञानं यथा विपरीतं ज्ञानं तथा संशयज्ञानमपि न यथार्थज्ञानं भवति। अतएव तत्त्वज्ञानं प्रति अस्य ज्ञानद्वयस्य उपयोगिता अतीव वर्तते। इति शम्।।

## तथ्यसूत्राणि -

१. भा.प.- १२६-१२७

२. भाषापरिच्छेद-१२७

३. न्यायसूत्रम् -१/१८

४. न्यायसूत्रभाष्यम् -१/१/१८

५. कारिका - १२७

६. कारिका - १२८

७. कारिका - १२८-१२९

८. कारिका - १२९

९. कारिका - १३०

१०. पत्राङ्कः – १६४

११. न्यायसूत्रम्  – १/१/२३

१२. न्यायसूत्रभाष्यम् – १/१/२३

१३. कारिका - १३१

१४. न्यायसूत्रम् -१/१/९

१५. न्यायसूत्रम्  –१/१/४१

१६. न्यायभाष्यम् – १/१/४१

१७.  न्यायभाष्यम् – १/१/१

१८. न्यायसूत्रम् – ४/२/१

१९. ऋग्वेदः – ७/५/४/५९

**ग्रन्थपञ्जी** -

जगदीशः। तर्कामृतम्। सम्पा. विष्णुपदमहापात्रः। नइ दिल्ली, मान्यता प्रकाशन,२००९ । मुद्रितम्।

तर्कसंग्रहः। सम्पा. नारायणचन्द्रगोस्वामी। कलिकाता :  संस्कृत पुस्तक भाण्डार, १३९०  वङ्गाव्दः। मुद्रितम्।

तर्कसंग्रहः। सम्पा. निरञ्जनस्वरूपव्रह्मचारी। कलकाता: संस्कृत वुक डिपो,२०१३। मुद्रितम्।

न्यायकोशः। सम्पा. महामहोपाध्याय-भीमाचार्यः। पुणे: भाण्डारकरप्राच्यविद्या-संशोधनमन्दिर, १९९६ । मुद्रितम्।

न्यायदर्शनम्। सम्पा. फणिभूषण-तर्कवागीशः। कलिकाता: पश्चिमवङ्‌ग राज्य पुस्तक पर्षद्,१९८१। मुद्रितम्।

न्याय-परिचयः। सम्पा. फणिभूषण-तर्कवागीशः। कलिकाता: पश्चिमवङ्‌ग राज्य पुस्तक पर्षद्,१९७८। मुद्रितम्।

न्यायसिद्धान्तमुक्तावली। व्याख्या. श्रीकृष्णवल्लभातार्यः। वाराणसी: चौखम्वा संस्कृत संस्थान, २००६ । मुद्रितम् ।

भाषापरिच्छेदः। सम्पा. प्रवाल्कुमारसेनः। कोलकाता: विजयायन, १४१३ वङ्‌गाव्दः। मुद्रितम्।

वेदान्त-दर्शनम्। सम्पा. राजेन्द्रनाथघोषः। कलिकाता: पश्चिमवङ्‌ग राज्य पुस्तक पर्षद्, १९९१। मुद्रितम्।

# असिद्धवदात्राभात् इत्यधिकारसूत्रविमर्शः

**ड. हरेकृष्णपट्टजोषी**

सहकारी अध्यापकः रामकृष्णमिशन्-विद्यामन्दिरस्य

(*निबन्धनिर्यासः-*

सिद्धेऽसिद्धत्वमारोप्य शब्दानुशिष्टिं विदधानानां भगवतां पाणिनिमहर्षीणां नैकेष्वसिद्धत्वप्रकाशनपरेषु शास्त्रेषु **असिद्ध-वदत्राभादि**ति शास्त्रं स्वीयं किञ्चिदनिर्वचनीयं वैशिष्ट्यं विदधदष्टाध्याय्यां देदीप्यमानं वरीवर्ति। **पदच्छेदः पदार्थोक्तिः ...** इत्याद्यभियुक्तोक्तं व्याख्यानलक्षणमरणीकुर्वता मयकात्र सूत्र-विमर्शः सविधे विदितवेदितव्यानां दोषज्ञानां यथामति यथाधीति च समुपस्थाप्यते। **न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐच् इति...** इत्यादिभाष्यकारस्मृतिं स्मारं स्मारं बद्धोऽयं बन्धः। टीकाकृतां वैमत्योद्घाटनं समुदितविप्रतिपत्तिनिरसनं चात्र संप्रस्तुतम्।)

दलितशशिकराभा दिव्यकुन्दावदाता
दलदमृतजवक्त्रा दैवतैर्दीव्यमाना।
दुरितदलनदक्षा दीर्णजाड्या च दिव्या
द्यतु मधुमयवाचां देवता दुष्टतां नः।।

महामुनिपाणिनिप्रणीताया अष्टाध्याय्याः षष्ठा-ध्यायस्य चतुर्थपादे द्वाविंशमिदं प्रकृतम् **असिद्धवदत्राभात्** इति सूत्रम्। वैयाकरणसिद्धान्तकौमुद्या भवतेर्लिटि

रूपसाधनावसरे समुपन्यस्तं सूत्रमिदं श्रीमता भट्टोजिदीक्षितेन।

## १. किमिदं सूत्रम्

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।

इत्यभियुक्तोक्तिः। परन्तु सूत्रलक्षणस्य षड्विधत्वाभावाद् इदं न युक्तम्। **षट्विधं सूत्रमुच्यते** इत्येव तु सांप्रदायिकः पाठः। लक्षणशब्दस्य स्वरूपपरत्वे तु यथोक्तं न दुष्टम्। षड्विधेषु पाणिनीयसूत्रेषु इदमधिकारसूत्रमिति सिद्धान्तः। किमत्र प्रमाणमिति चेत्? **असिद्धवद् इत्ययमधिकारः** इति काशिकाकारस्य, **अधिकारश्चायम्** इति प्रौढमनोरमाकारस्य, समानानुपूर्वीकं वाक्यं तत्त्वबोधिनीकारस्य, प्रकाश-व्याख्याकृतः श्रीकृष्णपण्डितस्य, **अधिकारसूत्रमिदमुत्तरत्र श्नान्नलोप इत्यादौ प्रतिसूत्रमुपतिष्ठते** इति बालमनोरमाकारस्य वचनमत्र प्रमाणम्।

## २. ननु कोऽयमधिकारशब्दार्थः?

अधिक्रियते उपरितनसूत्रजालशेषत्वेन पठ्यते इति व्युत्पत्त्या अधिपूर्वात्करोतेः **अकर्तरि च कारके संज्ञायाम्** ३.३.१९ इति कर्मणि घञा निष्पन्नोऽयमधिकारशब्दः **घञजबन्ताः पुंसि** इति लिङ्गानुशासनोक्तेः पुंसि वर्तते।

**उत्तरोत्तरगमनमधिकार** इति अधिकारसामान्यलक्षणम्। उत्तरोत्तरगमनं कदाचित् संपूर्णस्य सूत्रस्य भवति। यथा **धातोः** ३.१.९१ **अङ्गस्य** ६.४.१ इत्यादेः। कदाचित् सूत्रांशपदस्य यथा- **इको यणचि** ६.१.७७ इति सूत्रगतस्य **अचि** इत्यस्य पदस्य **आद्गुणः** ६.१.८७ इति सूत्रे समागमनम्। कदाचित् पदैकदेशस्य यथा **झोऽन्तः** ७.१.३ इति सूत्रे **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्** ७.१.२ इत्यस्य **प्रत्ययां**शः।

अधिकारस्य निर्दुष्टलक्षणं परिभाषेन्दुशेखरस्य भूतिटीकायामेवमुच्यते- **स्वदेशे लक्ष्यसँस्कारोपयोगि (लक्ष्य-धर्मिक-साधुत्व-प्रकारक-बोधोपयोगि) विधिशास्त्रीय-वाक्यार्थ-बोधोपकारक-वाक्यार्थ-अननुभावकत्वे सति विधिशास्त्रीय-लक्ष्यसँस्कारोपयोगि-वाक्यार्थबोध-प्रयोजकत्वम् अधिकारत्वम्** इति।

**स्वदेशे लक्ष्य-संस्कारक-शाब्दबोधाजनकत्वे सति उत्तरशास्त्रेण सह एकवाक्यतया बोधोपयोगित्वम् अधिकारत्वम्** इति श्रीरामप्रसादत्रिपाठिनः वदन्ति।

### ३. अधिकारसूत्रस्य अवधिविवेचनम्

**स्वरितेनाधिकारः** १.३.११ इति सूत्रम् अधिकारपरिमाणज्ञानार्थम् आवश्यकम्। तथा हि स्वरिते नाधिकार इति सूत्रस्वरूपम्। स्वरितं दृष्ट्वा अधिकारो न

भवति इति तदर्थः। अत्र **कैयटः-** प्रकृतस्य अधिकारनिवृत्तये शब्दान्तरस्य स्वरितत्वं प्रतिज्ञायते। तेन **विंशतिकात्खः** ५.१.३२ इत्यत्र स्वरितत्वदर्शनात् **द्वित्रिपूर्वान्निष्कात्** ५.१.३० इत्यस्य निवृत्तिरनुमीयते।

तदुक्तं **समर्थः पदविधिः** २.१.१ इति सूत्रे **नागेशेन-** स्वरितत्वप्रयुक्ताधिकारेण उत्तरत्र तत्तत्पदोपस्थितिः अधिकारान्तरं दृष्ट्वा व्याख्यानाद् वा निवृत्तिश्च इति।

अत एव भाधिकारमभिव्याप्य सूत्रस्य अवधिर्वर्तते इत्यवगम्यते । भाधिकारस्य अवधिज्ञानं तु **अङ्गस्य** ६.४.१, **प्रत्ययः** ३.१.१, **परश्च** ३.१.२ इत्यादौ इव व्याख्यानेनैव सिध्यतीति। तेन प्रकृतसूत्रस्य अधिकारः **ऋत्व्य-वास्त्व्य-वास्त्व-माध्वी-हिरण्ययानि च्छन्दसि** ६.४.१७५ इति सूत्रपर्यन्तं विलसति। भाधिकारमभिव्याप्य सूत्रमिदमधिक्रियते इत्यस्मिन् विषये बृहच्छब्देन्दुशेखरे **नागेश** आह-अत्र च **सूर्यतिष्याऽगस्त्यमत्स्यानां य उपधायाः** ६.४.१४९ इति अत्रत्यं उपधाग्रहणं ज्ञापकमिति तत्रैव निरूपितम् इति। तस्मिन्नपि सूत्रे (६.४.१४९) तेनोक्तम्- एतदेवोपधाग्रहणं ज्ञापयति-भाऽधिकारमभिव्याप्याऽऽभीया-ऽसिद्धत्वमिति इति। प्रकृतसूत्रे **सूर्यतिष्ये**त्यत्र च **उद्योतकारः** समं सिद्धान्तमुक्तवान्। (वस्तुत उपधाग्रहणमेव भाधिकारमभिव्याप्याय-मधिकार इत्यर्थे मानमिति बोध्यम्।

एवं च इदमेवोपधाग्रहणं सह तेनासिद्धत्वे ज्ञापकमिति भावः।)

**४. सूत्रस्य अतिदेशत्वं सम्भवति न वा ?**

अतिपूर्वाद् अतिसर्जनार्थकाद् दिश्-धातोः भावे घञि अतिदेशशब्दो निष्पद्यते।

**अतिदेशो नाम ये परत्र विहिताः धर्माः तमतीत्य अन्यत्र तेषां देशः** इति शावरभाष्यकृत्। **अन्यत्र अन्यधर्मपरिप्रापणमतिदेशः** (पृ-३७) इति वाक्यपदीय-टीकाकृत्पुण्यराजः। तान्यतिदेशसूत्राणि पाणिनीये द्वेधा प्राप्यन्ते। वतिप्रत्ययान्तघटितानि, तदघटितानि च। प्रकृतसूत्रस्य वतिप्रत्ययान्तघटितत्वेन अतिदेशत्वं सिद्धम्। पुनरपि कार्यरूपनिमित्तादिभेदेन सत्यपि अतिदेशस्य नैकविधत्वे अभावातिदेशः अन्यतमः। क्वचिद् विद्यमानस्य धर्मस्य, क्वचिल्लक्ष्ये प्रवृत्त्युन्मुखस्य शास्त्रस्य कार्यस्य वा निवृत्तेः अभावस्य अतिदेशनम् अभावातिदेशः। येन सूत्रेण अभावातिदेशः क्रियते, तदपि अभावातिदेशपदेन व्यवह्रियते।

**५. पदच्छेदः**

असिद्धवत् अत्र आ भात् इति सूत्रस्यास्य पदविभागः। तेनेदं सूत्रं पदचतुष्टयात्मकं भवति। सूत्रे **आ भात्** इति असमस्तं भिन्नं पदम्। यद्यत्र **आङ् मर्यादाभिविध्योः** २.१.१३

इति अव्ययीभावसमासः स्यात् तदा **आभम्** इति समस्तं पदं स्यात्। अर्थे तु अविशेषः बोध्यः।

## ६. पदार्थकथनम्

**असिद्धवत्-** असिद्धेन तुल्यं वर्तते इति विग्रहे तृतीयान्ताद् असिद्धशब्दात् तुल्यमित्यर्थे **तेन तुल्यं क्रिया चेद्वतिः** ५.१.११५ इति वतिप्रत्यये (वतिः इकारेत्) प्रक्रियाकार्ये प्रोक्तं रूपं साधु। अनेन तुल्या क्रिया इत्यर्थे वतेर्विधानात् का अत्र क्रिया इति जिज्ञासायां **वर्तते** इति अवगम्यताम् । अत्र असिद्धशब्देन असिद्धकर्तृकवर्तनं लक्ष्यते। तेन असिद्धकर्तृकवर्तनतुल्यं सिद्धकर्तृकवर्तनमिति बोधः पर्यवस्यति। असिद्धवद्घटकः सिद्धशब्दः परिनिष्पन्नवचनः। यथा **सिद्ध ओदनः, सिद्धः सूपः** इत्यादौ सिद्धशब्द उपर्युक्तार्थकः तद्वत्। न सिद्धम् असिद्धम् इति । यत् सिद्धमपि सिद्धकार्यं न करोति तदसिद्धमित्यर्थः। असिद्धेन तुल्यमिति उच्यमाने केन धर्मेण साधर्म्यमिति प्रश्ने सिद्धकार्याकरणसाधर्म्येण इति समाधिरुक्तः। तेन **सिद्धं शास्त्रं सिद्धकार्याकरणसाधर्म्येण असिद्धेन शास्त्रेण समानं वर्तते** इति निर्गलितोऽर्थः।

**अत्र-** समानश्रयप्रतिपत्त्यर्थम् अत्रग्रहणम्। समान एक आश्रयो निमित्तं यस्य (सूत्रस्य) तत् समानाश्रयम्। समानाश्रयस्य प्रतिपत्तिः (परिज्ञानम्) समानाश्रयप्रतिपत्तिः।

समानाश्रयप्रतिपत्तये इदं समानश्रयप्रतिपत्त्यर्थम् इति। तदुक्तं **भाष्ये- अथ अत्रग्रहणं किमर्थम्? अत्रग्रहणं विषयार्थम्। विषयः प्रतिनिर्दिश्यते। अत्र-एतस्मिन्नाभाच्छास्त्रे आभाच्छास्त्रमसिद्धं यथा स्यात्** इति। **विषयार्थमि**त्यस्य व्याख्यायामुच्यते **कैयटेन-** विशिष्टो यो विषयः समानलक्षणः तन्निर्देशार्थम् इति।

एतद् निमित्तसप्तम्यन्तमिति **बालमनोरमाकारः**। सप्तमी च वैषयिकी इति **शब्दरत्नकारः, बृहच्छब्देन्दुशेखरकार**श्च।

समानाश्रयत्वं च असिद्धत्वाश्रय-शास्त्र-सम्बन्धि-निमित्त-समुदायान्यूनानतिरिक्ताश्रयकत्वम्। **शब्दरत्नकृन्मतेन** समाना-श्रयत्वञ्च तत्प्रयोग-प्राप्तासिद्धत्वाश्रय-शास्त्रीय-शब्दरूप-निमित्त-समुदायापेक्षयाऽन्यूनानतिरिक्ताश्रयत्वम् इति।

**उद्योते**ऽप्युच्यते- समानाश्रयत्वं च तत्तत्प्रयोगप्राप्ता-सिद्धत्वाश्रयशास्त्रीयनिमित्तसमुदायापेक्षयाऽन्यूनानतिरिक्ताश्र -यकत्वम्। आश्रयणं स्थानित्वेनैव-निमित्तत्वेनैव-इति नाग्रहः, किन्तु यथाकथंचित्। विकारकृतमतिरिक्तत्वं तु न, जहि इत्यादेः अनुदाहरणत्वापत्तेः। ननु जहीति भाष्योदाहरणे हिलोपे जस्य निमित्तत्वम्, जादेशे च हन्तेरिति कथं समानाश्रयत्वमत आह-विकारकृतमिति। एवं च जभावस्य

विकारत्वेन अनतिरिक्तत्वात् तयोः समानाश्रयत्वमेवेति भावः।

**आ भात्-** अधिकारसूत्रस्य अवधिज्ञानाय आ भाद् इति पदद्वयमनावश्यकम्। विषयनिर्देशार्थम् आ भाद्ग्रहणम्। तदुक्तं **बृहच्छब्देन्दुशेखरकारेण शब्दरत्नकारेण** च- **आभाद्ग्रहणं विषयनिर्देशार्थम्। अवधिलाभस्तु अङ्गस्य इत्यादौ इव व्याख्यानत एव भविष्यति** इति। स च विषयः आभीयं प्रति एव आभीयमसिद्धं नान्यत्प्रति इत्येवंरूपः।

प्रकृतसूत्र **उद्योते** उच्यते- **अधिकाराद् आभीयस्य असिद्धत्वे सिद्धे आभाद्ग्रहणं आभीये कर्तव्ये इत्यर्थरूपविषयलाभार्थमिति अत्रग्रहणं समानाश्रयत्वार्थमिति भावः**।

**न्यासे**प्युक्तम्- अथ आभाद्ग्रहणं किमर्थम्, यावता स्वरितलिङ्गासङ्गात् अन्तरेण अपि आभाद्ग्रहणम् आ पादपरिसमाप्तेः असिद्धवद् इति अनुवर्तिष्यते? आ भाद् इति विषयनिर्देशः क्रियते- आ भसंशब्दनाद् यद् वक्ष्यते तस्मिन् कर्तव्यतया विषयभूते असिद्धवद् भवति इत्यस्य अर्थस्य परिज्ञानाय।

## ७. विग्रहप्रदर्शनम्

तत्र **असिद्धवद्** इति अव्ययं सुबन्तम्। **तद्धितश्चासर्वविभक्तिः** १.१.३८ इति सूत्रे **तसिवती** इति परिगणनात् वत्यन्तस्य शब्दस्वरूपस्य अव्ययत्वेन तदुत्तरविभक्तेः **अव्ययादाप्सुपः** २.४.८२ इति लुकि प्रत्ययलक्षणेन सुबन्तत्वं सिद्धम्।

**अत्र** इत्यपि अव्ययं सुबन्तम्। **तद्धितश्चासर्वविभक्तिः** १.१.३८ इति सूत्रे **तसिलादयः प्राक् पाशपः** इति परिगणनात् तदन्तःपातिना **सप्तम्यास्त्रल्** ५.३.१० इति विहितत्रलन्तस्य अत्रेति शब्दस्वरूपस्य अव्ययत्वेन तदुत्तरविभक्तेः **अव्ययादाप्सुपः** २.४.८२ इति लुकि प्रत्ययलक्षणेन सुबन्तत्वं सिद्धम्।

**आ** इत्यपि अव्ययं सुबन्तम्। अत्रेदमवधेयं यत् **चादयोऽसत्त्वे** १.४.५७ इति सूत्रोक्तचादिगणे तथा **प्रादयः** १.४.५८ इति सूत्रोक्तप्रादिगणे च आकारः पठ्यते। तत्र चादिगणे अङित् आकारः तथा प्रादिगणे ङिद् आकारः पठ्यते। सूत्रगतोऽयमाकारो ङिदेव। किमत्र कारणमिति चेदुच्यते-सूत्रस्थोऽयमाकारः अभिविधौ वर्तते। तेन **ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः। एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्॥** इति **निपात एकाजनाङ्** १.१.१३ इति सूत्रोक्तभाष्यप्रामाण्यात् **तेन सह** इत्यर्थके अभिविधौ वर्तमानस्य आकारस्य ङित्त्वमवसेयम्।

किञ्चायमाकारः **चादयोऽसत्त्वे** १.४.५७ इत्यनेन निपातसंज्ञकः। तथैव **आङ् मर्यादावचने** १.४.८९ इति कर्मप्रवचनीसंज्ञोऽपि वर्तते। क्रियायोगाभावाद् नायमाकार उपसर्गसंज्ञकः। तथा च **स्वरादिनिपातमव्ययम्** १.१.३७ इति निपातत्वेन अव्ययत्वात् तदुत्तरविभक्तेः **अव्ययादाप्सुपः** २.४.८२ इति लुकि प्रत्ययलक्षणेन सुबन्तत्वं सिद्धम्। वाक्यस्मरणयोः अर्थयोः वर्तमानः अङित् आकारस्तु **उपसर्गविभक्तिस्वरप्रतिरूपकाश्च** इति चादिगणसूत्रेण निपातसंज्ञ इति अन्यदेतत्।

**भात्** इति पञ्चम्यन्तं सुबन्तम्। **आङ् मर्यादावचने** १.४.८९ इत्यत्र वचनग्रहणात् अभिविधौ वर्तमानस्य आङ् इत्यस्य गतिसंज्ञापवादभूतकर्मप्रवचनीयसंज्ञायां तद्योगे **पञ्चम्यपाङ्परिभिः** २.३.१० इति सूत्रेण अर्थवतः भशब्दात् पञ्चमीविधानात् प्रोक्तं रूपं साधु। **भस्य** ६.४.१२९ इति अधिकारम् अभिव्याप्य इति **आ भात्** इत्यस्यार्थः। भस्य इति अधिकारसूत्रपर्यन्तं विद्यमानप्रकरणान्तर्गतविधिरित्यर्थः।

**भाष्ये-** किं पुनः प्राग् भाद् असिद्धम्, आहोस्वित् सह तेन? कुतः पुनरयं सन्देहः? आङाऽयं निर्देशः क्रियते, आङ् च पुनः सन्देहं जनयति। तद् यथा-आ पाटलिपुत्राद् वृष्टो देव इति सन्देहः-किं प्राक् पाटलिपुत्रात्-सह तेनेति। एवमिहापि सन्देहः - प्राग्भात् - सह तेनेति।... अथवा पुनरस्तु सह तेन -

इति। अत्र **प्रदीपकृत्-** प्राग् भादित्यस्य पक्षस्य प्रतिपक्षभावेन उपादीयमानाद् अभिविधौ आकारो बोद्धव्यः।

## ८. वाक्ययोजना

सूत्रे पदान्तरस्य अननुवर्तनात् **आ भाद् अत्र असिद्धवद्** इति सूत्रगतपदान्वयो भवति। यद्यपि असिद्धत्वाश्रयशास्त्रस्य आ भात् इति पदद्वयेन निर्देशं कुर्वता सूत्रकृता असिद्धतानिरूपकस्य शास्त्रस्य निर्देशो न विहितः तथापि प्रत्यासत्त्या आभीयमेव शास्त्रम् असिद्धता-निरूपकत्वेन अध्याह्रियते।

## ९. सूत्रार्थप्रदर्शनम्

समानाश्रयम् भाधिकारमभिव्याप्य विद्यमाने कस्मिंश्चित् शास्त्रे कर्तव्ये समानाश्रयमाभीयं शास्त्रं सिद्धमपि प्रवृत्तमपि असिद्धवत् अप्रवृत्तवद् भवति।

**पदमञ्जरीकारो**ऽत्राह- **श्नान्नलोपः** इत्यारभ्य आ पादपरिसमाप्तेः यानि सूत्राणि तानि अन्योऽन्यस्मिन् असिद्धवद् भवन्ति, तानि चेत् तुल्यनिमित्तानि इति।

सिद्धान्तकौमुद्यां दीक्षितेन सूत्रस्य वृत्तिरेवमीरिता - **इत ऊर्ध्वमापादसमाप्तेराभीयम्। समानाश्रये तस्मिन्** (आभीये) **कर्तव्ये तद्** (आभीयम्) **असिद्धं स्यात्** इति। वृत्तौ

तस्मिन् कर्तव्ये इत्यत्र **यस्य च भावेन भावलक्षणम्** २.३.३७ इति सप्तमी। ततः तस्मिन् कर्तव्ये सति इति लभ्यते। वृत्तौ **आभीयमि**ति पदं प्रयुक्तं दृश्यते। आभे आभं वा भवम् इत्यर्थे सप्तम्यन्ताद् आभशब्दात् **तत्र भवः** ४.३.५३ इति भवार्थे छप्रत्यये प्रक्रियाकार्ये प्रोक्तरूपं सिद्धम्। यद्यपि आभाच्छास्त्रे भवमाभीयं तथापि सूत्रस्यापि प्रकरणैकदेशत्वेन तत्रभवत्वादिति प्रकाशकृदाह।

प्रकृतसूत्रस्य अधिकारे **आर्धधातुके** ६.४.४६ इति **भस्य** ६.४.१२९ इति च अधिकारसूत्रद्वयं क्रोडीकृतम्। तत्र **आर्धधातुके** ६.४.४६ इत्यस्य अधिकारे चतुर्विंशतिः (२४) सूत्राणि, **भस्य** ६.४.१२९ इति अधिकारे च पञ्चचत्वारिंशत् (४५) सूत्राणि विद्यन्ते। एवं साकल्येन प्रकृतसूत्राधिकारे त्रिपञ्चाशदधिकैकशतं (१५३) सूत्राणि समुल्लसन्ति। एतदधिकारसूत्रगतकार्याणि यथाक्रमम्- नलोपः (२३-३३), शास उपाधाया इकारादेशः (३४), तस्यैव च शादेशः (३५), हन्तेर्जादेशः (३६), अनुनासिकलोपः (३७-४०), अनुनासिकस्य आत्त्वम् (४१-४५), **आर्धधातुके** (४६) **इत्यधिकृत्य** भ्रस्जो रमागमः (४७), अतो लोपः(४८), यलोपः(४९-५०), णेर्लोपः(५१-५४), णेरयादेशः(५५-५७), ल्यपि निष्ठायां च दीर्घः(५८-६१), चिण्वद्भावः(६२), **क्ङिति आर्धधातुके परतः** दीङो युडागमः(६३), आकारस्य लोपः(६४), तस्यैव च ईत्त्वम्(६५), घुमास्थादीनाम् ईत्त्वम्

एत्त्वं च(६६-६९), मयतेरित्वम्(७०), अङ्गस्य अडाटावागमौ(७१-७५), इर् इत्यस्य रे इत्ययमादेशः(७६), अङ्गस्य इयङुवङादेशौ(७७-८०), यण्विधिः(८१-८७), भुवो वुगागमः(८८), उपधाया ऊत्त्वं ह्रस्वो दीर्घो लोपश्च(८९-१००), **क्ङितिसार्वधातुकसम्बन्धिष्वङ्गकार्येषु** हेर्धित्वम्(१०१-१०३), चिण उत्तरस्य लुग्विधिः(१०४), हेर्लुग्विधिः(१०५), प्रत्ययस्योकारलोपः(१०६-१०९), करोतेः अत उत्त्वम्(११०), श्नसोरल्लोपविधिः(१११), श्नाभ्यस्तयोः आकारलोपः ईकारादेशः(११२-११३), दरिद्रस्य भियः च इत्त्वम्(११४-११५), जहातेः इत्त्वम् आत्त्वं लोपश्च(११६-११८), घ्वसोरेत्वाभ्यासलोपौ(११९), **लिटि परतः एत्वाभ्यासलोपौ**(१२०-१२६), तृ इत्ययमादेशः(१२७-१२८), **भस्य इत्यधिकृत्य** (१२९) पादः पदादेशः, भस्याङ्गस्य संप्रसारणं लोपः टेर्लोपश्च(१३१-१४५), उकारान्तस्य भस्य गुणः लोपश्च(१४६-१४७), इवर्णावर्णान्तस्य भस्य लोपः(१४८), भस्याङ्गस्य यलोपः(१४९-१५२), भस्य छस्य लुक्(१५३), इष्ठेमेयःसु प्रत्ययेषु भस्यादेशाः(१५४-१६२), अङ्गस्य प्रकृतिभावः(१६३-१७०), निपातनविधिश्च(१७१-१७५) इति।

## १०. सूत्रोदाहरणप्रदर्शनम्

**क. उत्सर्गलक्षणभावार्थं** प्रकृतसूत्रं प्रवर्तते। अयं भावः- उत्सृज्यते आदेशेन निवर्त्यते इति उत्सर्गः नाम स्थानी। तदुक्तं **प्रदीपे-** उत्सर्गशब्देन सामान्यविषयत्वसाधर्म्यात् स्थानी अभिधीयते। स उत्सर्गः लक्षणं (निमित्तं) यस्य सूत्रस्य तत् सूत्रम् उत्सर्गलक्षणं सूत्रम्। तस्य भावः (प्रवृत्तिः) उत्सर्गलक्षणभावः। तस्मै उत्सर्गलक्षणभावाय इदं उत्सर्गलक्षणभावार्थमिति।

**एधि** इत्याद्युदाहरणम्। तथा हि- भुवि वर्तमानाद् आदादिकात् परस्मैपदिनः अकर्मकात् अस्तेः कर्तरि लोटि सिपि **सेर्ह्यपिच्च** ३.४.८७ इति सेः हिरित्यस्मिन् आदेशे **अस् हि** इति स्थिते शपि शब्लुकि परत्वात् **हुझल्भ्यो हेर्धिः** ६.४.१०१ इति सूत्रं बाधित्वा **अलोऽन्त्यस्य** १.१.५२ इति परिभाषया परिष्कृतेन **घ्वसोरेद्धावभ्यासलोपश्च** ६.४.११९ इति सूत्रेण अन्त्यस्य सकारस्य एकारे **अ ए हि** इति जाते झलन्तलक्षणं धित्वं न प्राप्नोति। इदं धित्वविधायकम् उत्सर्गलक्षणं सूत्रम्। तस्य प्रवृत्त्यर्थम् एत्त्वविधायकं सूत्रं प्रकृतसूत्रेण असिद्धवद् भवति। तेन झल्(सकार)रूपनिमित्तमादाय धित्वे **अ ए धि** इति जाते हेरपित्त्वात् सार्वधातुकत्वाच्च **सार्वधातुकमपित्** १.२.४ इति ङित्त्वेन **श्नसोरल्लोपः** ६.४.१११ इति अकारलोपे **एधि** इति रूपं सिद्धम्। अत्र **घ्वसोरेद्धावभ्यासलोपश्च** ६.४.११९ इति,

**हुझल्भ्यो हेर्धिः** ६.४.१०१ इति च सूत्रद्वयं समानाश्रयम् आभीयञ्च। तत्रादौ हिः परत्वेन निमित्तम् अन्ते स्थानित्वेन निमित्तम्। अतः समानाश्रये **हुझल्भ्यो हेर्धिः** ६.४.१०१ इति आभीये कर्तव्ये **घ्वसोरेद्धावभ्यासलोपश्च** ६.४.११९ इति आभीयमसिद्धवद् भवति। अत एव शास्त्रासिद्धत्वपक्षमाश्रित्य प्रौढमनोरमायामाह **दीक्षितः- एधि इत्यत्र स्थानिनो झलन्तत्वबुद्धेः अनिवर्तितत्वात् तन्निमित्तं धित्वं सिध्यति** इति। अत्र **काशिकाकारः** वदति- **एधि इत्यत्र एत्वे कृते झल्लक्षणं धित्वं न प्राप्नोति, असिद्धत्वात् भवति** इति।

**ख. आदेशलक्षणप्रतिषेधार्थं** प्रकृतसूत्रं प्रवर्तते। आदेशो लक्षणं (निमित्तं) यस्य सूत्रस्य तत् सूत्रम् आदेशलक्षणं सूत्रम्। आदेशलक्षणस्य प्रतिषेधः आदेशलक्षणप्रतिषेधः। आदेशलक्षणप्रतिषेधाय इदम् आदेशलक्षणप्रतिषेधार्थमिति।

**जहि** इत्याद्युदाहरणम्। तथा हि- हिंसागत्योरर्थयोः वर्तमानाद् आदादिकात् परस्मैपदिनः सकर्मकात् हन्-धातोः कर्तरि लोटि सिपि **सेर्ह्यपिच्च** ३.४.८७ इति सेः हिरित्यस्मिन् आदेशे **हन् हि** इति स्थिते शपि शब्लुकि **हन्तेर्जः** ६.४.३६ इति सूत्रेण अनेकाल्त्वात् हन्तेर्जादेशे **ज हि** इति जाते **अतो हेः** ६.४.१०५ इति हेर्लुक् प्राप्नोति। इदं लुग्विधायकम् आदेशलक्षणं सूत्रम्। तस्य प्रतिषेधार्थं जादेशविधायकं सूत्रं प्रकृतसूत्रेण असिद्धवद् भवति। तेन अदन्तत्वाभावात् तन्निमित्तीकृत्य प्रवर्तमानस्य हेर्लुकोऽभावात् **जहि** इति रूपं

सिद्धम्। अत्र **हन्तेर्जः** ६.४.३६ इति, **अतो हेः** ६.४.१०५ इति च सूत्रद्वयं समानाश्रयम् आभीयञ्च। तत्रादौ हिः परत्वेन निमित्तम् अन्ते स्थानित्वेन निमित्तम्। अतः समानाश्रये **अतो हेः** ६.४.१०५ इति आभीये कर्तव्ये **हन्तेर्जः** ६.४.३६ इति इति आभीयमसिद्धवद् भवति। अत्र **काशिकाकारः** वदति- **जहि इत्यत्र जभावे कृते अतो हेः ६.४.१०५ इति लुक् प्राप्नोति, असिद्धत्वान्न भवति** इति।

सिद्धान्तकौमुद्यां **बभूव** इति लक्ष्यं प्रकृतलक्षणस्य प्राप्तिस्थलरूपेणोपन्यस्तम्। तथा हि भवतेः लिटि तिपि णलि भुवो वुकि **भूव् अ** इति स्थिते धातोर्द्वित्वे अभ्यासादिकार्ये **बभूव् अ** इति जाते भुवो वुगागमः स्यात् लुङ्लिटोरचि इत्यर्थकस्य **भुवो वुग् लुङ्लिटोः** ६.४.८८ इति आभीयशास्त्रस्य पूर्वं प्रवृत्तस्य अपि श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तधातोर्भ्रू इत्यस्य चाङ्गस्य इयङुवङौ स्तः अजादौ प्रत्यये परे इत्यर्थके **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** ६.४.७७ इत्याभीये कर्तव्ये असिद्धत्वेन (बभू अ इति अवलोक्य) ऊकारस्य उवङ्ङादेशे (ब भ् उव् अ इति जाते) **पुगन्तलघूपधस्य च** ७.३.८६ इति लघूपधगुणे (ब भ् ओव् अ) बभोव इति अनिष्टरूपापत्तिः स्यात्। तत्परिहाराय तु **वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ** इति वार्तिकं समाश्रितम्।

## ११. प्रत्युदाहरणप्रदर्शनम्

**क. वत्करण**प्रयोजनम्- प्रतिपत्तिलाघवाय वत्करणम् इति **कैयटेनो**च्यते। तदुक्तं प्रदीपे- क्वचित्तु प्रतिपत्तिलाघवाय भेदोपक्रमे वतिना निर्देशः क्रियते-ब्रह्मदत्तवदयमिति। इहापि- असिद्धवदत्राभात् इति।

वत्करणं तु प्रतिपत्तिलाघवार्थमेवेति **पदमञ्जरीकारो** वदति।

**तत्त्वबोधिनीकारेण** वत्करणप्रयोजनं प्रतिपादयता निगदितं यत्- **वत्करणं प्रतिपत्तिलाघवाय** भवति। तथा हि वत्करणमन्तरेण **असिद्धमत्राभात्** इति सूत्रस्वरूपं स्यात्। पाणिनेः सर्वाणि सूत्राणि सिद्धानि। अस्यामवस्थायां सिद्धं सूत्रजातमुद्दिश्य असिद्धमिति प्रयुज्यमानम् अनुपपन्नं सत् सामर्थ्यात् असिद्धवद् इत्यर्थमवगमयति। यथा राजभिन्ने पुरोहिते राजायमिति प्रयोगः अनुपपन्नः सन् राजवदिति अर्थं बोधयति। अत्र तु प्रतिपत्तिगौरवं (ज्ञानजनक-मनोव्यापारगौरवम्) भवति। राजवदयं पुरोहित इत्युच्यमाने तु प्रतिपत्तिलाघवमिति विशेषः। **षत्वतुकोरसिद्धः** ६.१.८६ इत्यत्र अगत्या असिद्धवद् इति, **असंयोगाल्लिट् कित्** १.२.५ इत्यत्र किद्वद् इति च कल्प्यते।

**वत्करणं सुखार्थम्**। विनापि तेन (वत्करणेन) **पूर्वत्रासिद्धम्** ८.२.१ इत्यादौ अतिदेशदर्शनात् इति **प्रकाशकार** आह।

**ख. आ भात्** इत्यत्र यदि मर्यादायाम् आङ् स्वीक्रियते तदा भाधिकारात् प्राक् **मघवा बहुलम्** ६.४.१२८ इति सूत्रपर्यन्तम् प्रकृतसूत्रस्य अधिकारः कल्पनीयो भवेत्। तेन भाधिकारोक्तसूत्राणि सपादसप्ताध्यायीस्थत्वेन परस्परं सिद्धानि स्युः। ततः **भूयान्** इति रूपं न सिध्यति। तथा हि- अयमनयोरतिशयेन बहुरिति विग्रहे वैपुल्यवाचकाद् बहुशब्दाद् **द्विवचनविभज्योपपदे तरबीयसुनौ** ५.३.५७ इति ईयसुन्प्रत्यये **आदेः परस्य** इति परिभाषया परिष्कृतेन १.१.५४ बहोः परयोः इमेयसोः लोपः स्याद् बहोश्च भूरादेशः इत्यर्थकेन (भाधिकारोक्तेन सिद्धान्तदृष्ट्या आभीयेन) **बहोर्लोपो भू च बहोः** ६.४.१५८ इति सूत्रेण प्रकृतेः भूभावे प्रत्ययादेः इकारस्य लोपे च कृते **भू यस्** इति स्थिते भूभावस्य सिद्धत्वात् उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते इत्यर्थकेन (भाधिकारोक्तेन सिद्धान्तदृष्ट्या आभीयेन) **ओर्गुणः** ६.४.१४६ इति सूत्रेण ऊकारस्य गुणे ओकारे **भोयस्** इति जाते ततः सौ **भोयान्** इति स्यात् न तु **भूयानि**ति । सिद्धान्ते **ओर्गुणः** इति आभीये कर्तव्ये **बहोर्लोपो भू च बहोः** इति आभीयस्य असिद्धत्वस्वीकारेण बहोर्भूभावस्य ओर्गुणे कर्तव्ये असिद्धत्वात् गुणस्य अप्राप्तौ **भूयानि**ति रूपसिद्धौ न कापि बाधा। अत एव बहोर्लोप इत्यादिसूत्रव्याख्यायां बालमनोरमायामुच्यते- ‘**भूभावस्य आभीयत्वेन असिद्धत्वाद् ओर्गुणो न भवति**’ इति।

प्रसङ्गेऽत्र **न्यासकारस्य** व्याख्यानं दृशेलिमम्। तेनोक्तं- आ भाद् इति आङ् मर्यादायां वा स्याद्? अभिविधौ वा? तत्र यदि आद्यः (मर्यादा) पक्ष आश्रीयेत, भाधिकारीयस्य असिद्धत्वं न स्यात्। ततश्च **असिद्धं बहिरङ्गमन्तरङ्गे** इत्यस्याः परिभाषायाः अनाभाच्छास्त्रीयत्वाद् अस्यां प्रवर्तमानायां वसोः संप्रसारणस्य बहिरङ्गस्य, अन्तरङ्गस्य च आकारलोपस्य युगपदुपस्थाने सति तया परिभाषया प्रवर्तमानया वसोः संप्रसारणस्य असिद्धत्वे उत्पादिते अन्तरङ्गत्वाद् आकारलोपः पपुषः इत्यत्र न स्यात्। तेन तदसिद्धरूपं दोषं मर्यादापक्षे दृष्ट्वा अभिविधिपक्षः समाश्रितः इति।

**ग**. सूत्रे **अत्रे**ति पदस्य ग्रहणं समानश्रयप्रतिपत्त्यर्थं क्रियते। तद्ग्रहणाभावे पपुषः इत्यादौ दोषः स्यात्। तथा हि पानार्थकाद् भौवादिकात् पाधातोः **परोक्षे लिट्** ३.२.११५ इति कर्तरि लिटि, लिटः स्थाने **क्वसुश्च** ३.२.१०७ इति क्वसौ (यद्यपि क्वसुरादेशः छन्दसि भवति तथापि **विभाषा पूर्वाह्णापराह्णाभ्याम्** ४.३.२४ इति सूत्रे **पपुष आगतं पपिवद्रूप्यम्** इति भाष्यप्रामाण्यात् क्वसुर्लोकेऽपि क्वचिद् भवति इत्यवगमात्) अनुबन्धलोपे **लिटि धातोरनभ्यासस्य** ६.१.८ इति धातोर्द्वित्वे अभ्यासह्रस्वे निष्पन्नात् क्वस्वन्तात् **प पा वस्** इत्येवंरूपात् द्वितीयाबहुवचने शसि (अस्) **यचि भम्** १.४.१८ इति प्रकृतिभागस्य (प पा वस् इति समुदायस्य)

भत्वेन **वसोः संप्रसारणम्** ६.४.१३१ इति वकारस्य संप्रसारणे उकारे (प पा उ अ स् अस्) **संप्रसारणाच्च** ६.१.१०८ इति उकारस्य अकारस्य च स्थाने पूर्वरूपे उकारे प पा उ स् अस् इति स्थिते क्वसोः आर्धधातुकत्वेन कित्त्वेन कृते संप्रसारणे अजादित्वेन च, उस् इत्याकारके तस्मिन् परतः अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोः आतो लोपः स्यात् इत्यर्थकेन **आतो लोप इटि च** ६.४.६४ इति सूत्रेण आकारलोपे, सस्य षत्वे, (प प् उ ष् अस् ›पपुषस् › पपुषः) संयोगे पपुषः इति रूपम्। अत्र आल्लोपे आभीये कर्तव्ये वसोः संप्रसारणम् इति आभीयम् असिद्धं न भवति। यतो हि आल्लोपस्य आश्रयः (निमित्तम्) क्वसुः (उस्) तथा संप्रसारणस्य आश्रयः शस्-रूपा विभक्तिः। अतोऽत्र भिन्नाश्रयत्वं स्पष्टम्।

अत्रेदमाशङ्क्यते- **आतो लोप इटि च** ६.४.६४ इति सूत्रम् अन्तरङ्गम्। **वसोः संप्रसारणम्** ६.४.१३१ इति च बहिरङ्गम्। कथमनयोः शास्त्रयोः अन्तरङ्गबहिरङ्गभाव इति चेदत्र **न्यासकारेणो**च्यते- अत्र (पपुषः) हि (शस्-अस्) विभक्तेः पूर्वो (प पा उ स्) वस्वन्तो भागः, तदाश्रयः आकारलोपः, संप्रसारणं तु विभक्त्याश्रयम्। **प्रकृत्याश्रयम् अन्तरङ्गम्, प्रत्ययाश्रयं तु बहिरङ्गम्** इति। अतः **असिद्धं बहिरङ्गमन्तरङ्गे** इति परिभाषया अन्तरङ्गे (आकारलोपे) कर्तव्ये बहिरङ्गम् (सम्प्रसारणम्) असिद्धं भवति इत्यर्थे

अवगम्यमाने संप्रसारणस्य असिद्धत्वात् क्वसोः आर्धधातुकत्वेऽपि कित्त्वेऽपि अजादित्वाभावात् आकारलोपः न भवति। अत्र **न्यासकृतो**च्यते - ननु च उस्यपदान्तात् इत्यनेनैव पररूपेण सर्वं सिद्धम्? नैतदस्ति, प्रतिपदोक्तस्य हि उस्-शब्दस्य तत्र ग्रहणम्, लाक्षणिकश्च अत्र उस्। ततः आकारलोपाभावे पपुषः इति रूपासिद्धिरिति चेत्-

अत्रोच्यते- **वाह ऊठ्** ६.४.१३२ इति सूत्रम् असिद्धवदत्राभात् ६.४.२२ इत्यस्य अधिकारे पठ्यते। अत एव प्रोक्तं सूत्रम् असिद्धवद् भवति। **असिद्धं बहिरङ्गमन्तरङ्गे** इति परिभाषा **वाह ऊठ्** ६.४.१३२ इति सूत्रस्थेन **ऊठ्ग्रहणेन** ज्ञापिता इति कृत्वा आभाच्छास्त्रीया भवति। यत्र अन्तरङ्गबहिरङ्गयोः शास्त्रयोः युगपद् उपस्थानं भवति, तत्र निरुक्ता परिभाषा प्रवर्तते, अन्तरङ्गे कर्तव्ये बहिरङ्गस्य असिद्धतामापादयितुम्। अस्यां स्थितौ परिभाषायां कर्तव्यायां **वसोः संप्रसारणम्** ६.४.१३१ इति सूत्रस्य **आतो लोप इटि च** ६.४.६४ इति सूत्रस्य च असिद्धत्वाद् युगपद् उभयोरुपस्थानाभावात् परिभाषाया अप्रवृत्तौ बहिरङ्गसंप्रसारणस्य असिद्धत्वं नास्ति। तेन आकारलोपे सति सिद्धं पपुष इति रूपम्। शब्दरत्नकारेणाप्युक्तमत्र- **असिद्धपरिभाषया तु न, तस्या ऊठ् सूत्रे निष्पन्नत्वेन बहिरङ्गान्तरङ्गयोरुभयोरपि** (आभीयत्वेन) **असिद्धतया तदप्राप्तेः** इति।

**प्रदीपे** प्रसङ्गेऽत्रोच्यते- **असिद्धं बहिरङ्गमन्तरङ्ग** इति परिभाषया संप्रसारणस्य असिद्धत्वं नास्ति। एषा हि परिभाषा **वाह ऊठ्** इत्यत्र ज्ञापितत्वाद् आभाच्छास्त्रीया। तस्यां प्रवर्तमानायाम् अकारलोपसंप्रसारणयोः असिद्धत्वाद् अन्तरङ्गबहिरङ्गयोः युगपद् अनुपस्थानात्, **नाजानन्तर्य** इति प्रतिषेधाद् वा।

अत्राह **उद्योतकारः** यद् कैयोटोक्तम् आद्यमेव समाधानं युक्तम्। **नाजानन्तर्ये...** इत्यस्याः सिद्धान्त्यसंमतत्वादिति बोध्यम्। अन्यत्रापि उच्यते- वस्तुत इयं (**नाजानन्तर्ये...** इति परिभाषा ) सिद्धान्त्यसंमता इति असकृदावेदितम्।

**तत्त्वबोधिनीकारेण** अत्र निगदितम्- न च उक्त (असिद्ध)परिभाषाया आलोपस्य च समानश्रयत्वं नेति शंक्यम्, वसोः संप्रसारणे कृते हि अजाद्याश्रयेण आलोपः प्रवर्तते, तस्मिन् कर्तव्ये संप्रसारणस्य असिद्धत्वाय तद्विषये बहिरङ्गपरिभाषापि प्रवर्तते इति तस्य तत्सत्त्वात् (समानाश्रयत्वस्य सत्त्वात्) इति। अत एव **पदमञ्जरीकारो** वदति- वसुसंप्रसारणं चैकं परिभाषाया आल्लोपादीनां च आश्रय इति समानाश्रयत्वमप्यस्ति।

वृत्तौ **आभीये कर्तव्ये** इति लेखनेन **अभाजि** इत्यादेः प्रयोगस्य सिद्धिः भवति। तथा हि- आभीये कर्तव्ये आभीयम्

असिद्धमिति सिद्धान्तः। **अनाभीये कर्तव्ये आभीयम् असिद्धं न** भवति। तथा हि आमर्दने वर्तमानाद् रौधादिकात् परस्मैपदिनो भञ्जधातोः कर्मणि लुङि धातोरडागमे लस्य तादेशे **च्लि लुङि** ३.१.४३ इति धातोः च्लौ, **चिण् भावकर्मणोः** ३.१.६६ इति च्लेः चिणि अनुबन्धलोपे **अभञ्ज् इ त** इति स्थिते आभीयेन **भञ्जेश्च चिणि** ६.४.३३ इति सूत्रेण भञ्जेर्नलोपे **अ भज् इ त** इति जाते अनाभीयेन **अत उपधायाः** ७.२.११६ इति सूत्रेण उपधाया अकारस्य वृद्धौ कृतायां **चिणो लुक्** ६.४.१०४ इति चिणः परस्य तकारस्य लुकि प्रोक्तं रूपम्। अत्र आभीयो नलोपः अनाभीयायाम् उपधावृद्धौ कर्तव्यायां न असिद्धः। तेन उपधायाम् अकारदर्शनाद् वृद्धिः निर्बाधा।

## १२. टीकाकृद्वैमत्योद्घाटनम्

**प्रक्रियाकौमुदीकारेण कार्यासिद्धत्वपक्षः** समुपस्थापितः। तदुक्तं तेन प्रकृतसूत्रवृत्तौ-अत ऊर्ध्वमापादसमाप्तेः कार्यम् आभाच्छास्त्रीयम्, तस्मिन् कर्तव्ये तत्रत्यं कार्यमसिद्धवत् स्यादिति।

**तट्टीकाकृता** श्रीकृष्णपण्डितेन तु कार्यमिति प्रतीकमादाय क्रियतेऽनेनेति कार्यं शास्त्रमिह विवक्षितम्। तेन शास्त्रे शास्त्रमसिद्धं भवति इत्युक्त्वा **शास्त्रासिद्धत्वपक्षः** समर्थितः।

**प्रौढमनोरमाकारेण शास्त्रासिद्धत्वपक्षः** समर्थितः। तदुक्तं तेन- **अत्रापि शास्त्रासिद्धत्वमेव आकरे स्थितम्** इति।

**तत्त्वबोधिनीकारः शास्त्रासिद्धत्वपक्षस्य** समर्थकः। तदुक्तं तेन प्रकृतसूत्रव्याख्यायाम्- **अत्रापि शास्त्रासिद्धत्वमेव आकरे स्थितम्** इति।

**बालमनोरमाकारः** अस्य सूत्रस्य व्याख्याने **कार्यासिद्धत्वपक्षमेव** प्रतिपादयति। प्रकृतसूत्रटीकायां तेनोक्तम् - विहितं कार्यमिति शेषः। ततश्च **श्नान्नलोपः** इत्यारभ्य आपादपरिसमाप्तेः विहितं यदाभीयं कार्यं तदसिद्धवद् भवति। तथा च यद्यत्सूत्रे इदमनुवर्तते तत्तदाभीये कार्ये कर्तव्ये इति लभ्यते। एवं च **श्नान्नलोपः** इत्यादि तत्तदाभीयं कार्यं **श्नान्नलोपः** इत्याद्याभीये कार्ये कर्तव्ये असिद्धवद् इत्यर्थः पर्यवस्यति। एतत् सर्वं भाष्ये स्थितम् इति

**कार्यासिद्धत्वपक्षे युक्तिः-** शास्त्रकार्ययोर्मध्ये शास्त्रं कार्यार्थं समाश्रीयते। अतः शास्त्रापेक्षया कार्यस्य प्राधान्यम्। शास्त्रं हि कार्यार्थत्वाद् अप्रधानम्।

**शास्त्रासिद्धत्वपक्षे युक्तिः-** यतो हि कार्यं शास्त्रनिमित्तकं तस्मात् शास्त्रस्य प्राधान्यम् किञ्च शास्त्रस्य असिद्धत्वे कार्यस्य असिद्धत्वं स्वतः लभ्यते। **आ भात्** इति शास्त्रस्य अवधित्वेन उपादानाच्च शास्त्रस्य असिद्धवद्भावः युक्तः, अन्यथा हि सूत्रकारः कार्यमेव किञ्चिद् अवधित्वेन

उपादीयेत। अतो पकत्वात् शास्त्रस्य एव असिद्धत्वम्, **आ भात्** इति शास्त्रस्यैव विषयत्वेन निर्देशाच्च।

ननु कार्यासिद्धत्वपक्षे कथङ्कारं दोष इति चेदुच्यते- **देवदत्तहन्तृहतन्यायेन** इति अवगम्यताम्। **हते देवदत्ते तद्धन्तरि हतेऽपि नोन्मज्जनं, हतत्वारोपे तु सुतराम् (नोन्मज्जनं देवदत्तस्य)। हन्तुमुद्यतस्य हनने तूज्जीवनमस्त्येव** इति देवदत्तहन्तृहतन्यायशरीरम्। तेन देवदत्तस्य हन्तरि हतेऽपि देवदत्तस्य यथा न दर्शनम् , तथात्र (एधीत्यत्र) देवदत्तस्थानीयायाः झल्बुद्धेः हननसदृशादेशसंपादकं **घ्वसोरेद्धावभ्यासलोपश्च** ६.४.११९ इति शास्त्रम्। तस्य प्रवृत्तिरेव हननम्। तस्मिन् कृते झलः अदर्शनमस्तीति हुझल्भ्यो हेर्धिः इति न स्यात्।

न च **तौ सत्** ३.२.२७ इति निर्देशेन न्यायोऽयमनित्य इति वक्तुं युक्तम्। तथा हि-(तद् औ › त अ औ ›त औ इत्यवस्थायम्) देवदत्ततुल्यवृद्धेः हन्तृतुल्यबाधकपूर्वसवर्णदीर्घस्य हन्तृतुल्येन **नादिचि** ६.१.१०४ इत्यनेन निषेधेपि देवदत्तस्य वृद्धेः उन्मज्जनाभावात् तौ इति निर्देशः अनुपपन्नः सन् तन्न्यायस्य अनित्यत्वे ज्ञापकः। अतो देवदत्तहन्तृहतन्यायस्यात्र अप्रवर्तनमिति चेत् तदोच्यते रत्नकृता- तौ इत्यादौ वृद्धिहन्तुः पूर्वसवर्णदीर्घस्य हननोद्यमसजातीयं प्रसङ्गमात्रम्, न तु हननस्थानीया लक्ष्ये प्रवृत्तिः इति न तत्र (तौ इत्यत्र) अस्य

न्यायस्य विषय इति तेन (**तौ सदि**ति निर्देशेन) नास्य अनित्यत्वं बोध्यते।

## १३. प्रकीर्णकम्

**क.** यदिदं विधिसूत्रं स्यात् तर्हि आ भात् इति पदस्य ग्रहणम् असिद्धवद्भवतः निर्देशार्थं भवेद्, यं प्रति असिद्धत्वं तन्निर्देशार्थं वा भवेत् विनिगमनाया विरहात् । तेन आभीयम् आभीये असिद्धम् इत्येवार्थः स्यात्। सूत्रे निमित्तस्य अनुल्लेखात् समानाश्रयत्वरूपार्थो न लभ्येत तथा तदर्थं क्रियमाणम् अत्रग्रहणमपि अनर्थकं भवेत्। अत एव निर्दुष्टसूत्रार्थसम्पत्तये सूत्रस्य अधिकारत्वं स्वीकार्यम्।

**ख.** ननु प्रकृतसूत्रस्य अधिकारत्वे यस्मिन् यस्मिन् सूत्रे असिद्धवदिति सूत्रस्य उपस्थानं भवति तस्मात् सूत्रादेव आरभ्य यद् आभीयं तस्मिन्नेव कर्तव्ये असिद्धत्वं स्यात्, न तु ततः पूर्वस्मिन्नपि कर्तव्ये। यद्देशस्थेन हि वक्त्रा आट् (**आडुत्तमस्य पिच्च ३.४.९२**) उच्चार्यते तत एव आरभ्य मर्यादाभिविधिप्रतिपत्तर्भवति। यथा आ पाटलिपुत्राद् वृष्टो देव इत्युच्यमाने पाटलिपुत्राद् एव मर्यादा अभिविधिश्च बोध्यते। ततश्च **घ्वसोरेद्धावभ्यासलोपश्च** ६.४.११९ इति विधीयमानमेत्त्वं पूर्वस्मिन् **हुझल्भ्यो हेर्धिः** ६.४.१०१ इति धित्वे कर्तव्ये नासिद्धं (सिद्धम्) स्यात्। तेन झलन्तत्वाभावात् हेर्धित्वाभावेन एधि इति रूपं न सिध्यति इति चेद्-

अत्रोच्यते- अधिकारविषये शब्दाधिकारः अर्थाधिकारः चेति द्वौ पक्षौ। शब्दाधिकारे अर्थरहितं शब्दमात्रमनुवर्तते। अर्थाधिकारे यादृशार्थकं पूर्वत्र तादृशार्थकमेव पदं परत्र अनुवृत्तिस्थलेऽपि। अत्र सूत्रे सतोरपि उभयोः पक्षयोः शब्दाधिकारे दोषसद्भावाद् अर्थाधिकारपक्षः स्वीक्रियते। किञ्च अर्थाधिकारपक्षे लाघवमस्ति। तदुक्तं शब्दरत्नकारेण-शब्दाधिकारे शब्दार्थयोरुभयोः कल्पना; अर्थाधिकारे तु शब्दमात्रस्येति लाघवादिति भाव इति। एवमर्थाधिकारे अनेन सूत्रेण अयमर्थः सम्पादितः यत् **श्नान्नलोपः** इत्यारभ्य आ पादपरिसमाप्तेः यानि सूत्राणि तानि अन्योऽन्यस्मिन् असिद्धवद् भवन्ति, तानि चेत् तुल्यनिमित्तानि इति। ततश्च **घ्वसोरेद्धावभ्यासलोपश्च** ६.४.११९ इति विधीयमानमेत्त्वं पूर्वस्मिन् **हुझल्भ्यो हेर्धिः** ६.४.१०१ इति धित्वे कर्तव्ये असिद्धं भवति। तेन झलन्तलक्षणं धित्वं निर्बाधम्। एतत्सर्वं पदमञ्जर्यां प्रक्रियाकौमुद्याः प्रकाशटीकायां प्रौढमनोरमायां तत्त्वबोधिन्याञ्च आलोचितमस्ति।

**ग.** नागेशाशयः- लघुशब्देन्दुशेखरे नागेशभट्टेन अधिसूत्रविषयं गदितम्- इदं सूत्रमनित्यम्। **श्नसोरल्लोपः** ६.४.१११ इति सूत्रस्थतपरकरणात्। तथा हि अस् ताम् इति स्थिते **जनसनखनां सञ्झलोः** ६.४.४२ इति सूत्रभाष्योक्तरीत्या आभीयेषु विप्रतिषेधसत्त्वेन, परत्वात्

लोपे, तस्य आभीयत्वेन असिद्धत्वात्, पुनः प्रसङ्गविज्ञानेन आटि, लक्ष्यभेदात् **लक्ष्ये लक्षणस्ये**ति न्यायाऽप्राप्तौ, प्राप्तस्य आटो लोपस्य वारणार्थं तत्र तपरकरणम्। तच्च आटोऽसिद्धत्वे व्यर्थं सत् तदनित्यत्वज्ञापकम् इति।

अयं भावः- **श्नसोरल्लोपः** ६.४.१११ इति सूत्रं (श्नेति श्नम्प्रत्ययैकदेशनिर्देशः) सार्वधातुके क्ङिति परतः श्नस्य अस्तेश्च अकारस्य लोपं विधत्ते। तत्र अत् इति तपरकरणं कृतम्। अस्-धातोः लङि प्रथमद्विवचनविवक्षायां तसि तसः तामादेशे अस् ताम् इति स्थिते **आडजादीनाम्** ६.४.७२ इति अजादेरङ्गस्य अस्तेः आडागमस्य, तामः सार्वधातुकत्वात् स्वयमपित्त्वेन **सार्वधातुकमपित्** १.२.४ इति ङित्त्वाच्च **श्नसोरल्लोपः** ६.४.१११ इति सूत्रेण विहितस्य अल्लोपस्य च युगपत् प्रवृत्तौ उभयोः सत्यपि आभीयत्वे आभीयेषु विप्रतिषेधसत्त्वेन परत्वात् अकारलोपे स् ताम् इति जाते तस्य अल्लोपस्य आभीयत्वेन असिद्धत्वात्, पुनः प्रसङ्गविज्ञानेन आटि कृते आस् ताम् इति जाते पुनः तेनैव (६.४.१११) सूत्रेण आटः आकारस्य लोपे प्रसक्ते (अकारस्य एव लोपः स्यात् न आकारस्य इति विवक्षया ) तद्वारणाय अत् इति तपरकरणं क्रियते। न च तत्र **लक्ष्ये लक्षणं सकृदेव प्रवर्तते** इति परिभाषया पुनः अल्लोपो न भविष्यति इति शंकनीयम्, लक्ष्यभेदे परिभाषा न प्रवर्तते इति अङ्गीकारात्। न च अत्र लक्ष्यभेदो नास्ति इति वाच्यम्, पूर्वम् अस्तेः

अकारस्य लोपो जातः संप्रति तु आकारस्य लोपप्राप्तिः इति लक्ष्यभेदस्य स्पष्टत्वात्। अस्यामवस्थायाम् आस् ताम् इति लक्ष्यस्य भेदात् आटः आभीयत्वेन असिद्धत्वात् तपरकरणं व्यर्थं भवत् असिद्धवदिति सूत्रस्य अनित्यत्वं ज्ञापयति। ततश्च श्नसोरलोपः इति सूत्रस्वरूपे स्वीक्रियमाणे आस् ताम् इत्यत्र असिद्धवदिति सूत्रस्य अनित्यत्वेन प्रवृत्त्यभावपक्षे अकारेण ग्रहणकशास्त्रबलात् आकारस्यापि बोधात् तस्य लोपे प्रसक्ते ह्रस्वस्य अकारस्य लोपो यथा स्यात् न दीर्घस्य इति एतदर्थं तपरकरणं स्वांशे चरितार्थं भवति।

नेदं नागेशस्य स्वकीय आशयः। न्यासे पदमञ्जर्यां च उपर्युक्तं वचनमुपलभ्यते। **श्नसोरल्लोपः** ६.४.१११ इति सूत्रे **न्यासकारो** वदति- अथ तपरकरणं किमर्थम् आस्ताम् आसन् इत्यत्र आडागमस्य मा भूत् इति चेत्? नैतदस्ति; इह हि लङि कृते लावस्थायाम् आडागमात् पूर्वमन्तरङ्गत्वात् लादेशः क्रियते। तत्र (लादेशे) कृते विकरणः कृताकृतप्रसङ्गित्वात् आडागमं बाधते। आडागमस्य तु **अशब्दान्तरप्राप्तेः** अनित्यत्वम्। तथा हि- कृते विकरणे विकरणान्तस्य अङ्गस्य तेन (आडागमेन) भवितव्यम्, अकृते धातुमात्रस्य (आडागमेन भवितव्यम् इति शेषः)। कृते विकरणे यद्यपि आडागमाऽकारलोपयोः द्वयोरपि कृताकृतप्रसङ्गित्वेन नित्यत्वम्, तथापि परत्वाद् अकारलोपः क्रियते, तस्मिन् (अकारलोपे) कृते तस्य (अकारलोपस्य) असिद्धत्वाद् आट्,

तस्य (आटः) असिद्धत्वादेव च (अकारस्य) लोपो न भविष्यतीति किं (अत् इत्यत्र) तपरकरणेन? एवं तर्हि एतज् ज्ञापयति-आभाच्छास्त्रीयमसिद्धत्वमनित्यमिति। तेन **वुग्युटावुवङ्यणोः सिद्धौ भवतः इत्येतद् वक्तव्यं** न वक्तव्यं भवति।

**प्रदीपे** विद्यते- **श्नसोरल्लोपः** इति तपरकरणाच्च लिङ्गात् क्वचित् सिद्धत्वं शक्यमनुमातुम्। अन्यथा-आस्ताम्-आसन् इत्यादौ आटः असिद्धत्वात् लोपाप्रसङ्गात् किं तपरकरणेन?

तत्र **उद्योते** उद्यते- अस् ताम् इति स्थिते विप्रतिषेधे आभीयासिद्धत्वाभावस्य वक्ष्यमाणतया आडपेक्षया परत्वाद् अल्लोपे तस्य असिद्धत्वात् पुनः प्रसङ्गविज्ञानेनाटि विकारान्यानुपूर्व्या ऐक्याभावात् **लक्ष्ये लक्षणस्य** इति न्यायाप्राप्त्या प्राप्ताटो लोपस्य वारणाय कृतं तपरत्वम् आटोऽसिद्धत्वे व्यर्थं सत् तदनित्यतां ज्ञापयति।

**अत एकहल्मध्ये**..... इति सूत्रे न्यासे एवं लिखितम् - **श्नसोरल्लोपः** इत्यत्र आभाच्छास्त्रीयस्य असिद्धत्वस्य अनित्यत्वं ज्ञापितम्, तेन दम्भेरेत्त्वे कर्तव्ये लोपस्य असिद्धत्वं न भवति,ततश्च दम्भेर्लिटि एत्त्वं भविष्यति।

**पदमञ्जरीकारो** वदति- तपरकरणं किम्? आटो मा भूत् – आस्ताम्, आसन्, असिद्ध आट्। एवं तर्हि आभीयस्य असिद्धत्वमनित्यत्वमिति ज्ञापनार्थं तपरकरणम् इति। अन्यत्राप्युक्तं तेन- **श्नसोरल्लोपः** इति तपरकरणाल्लिङ्गात् क्वचित् सिद्धत्वमनुमीयते, तद्धि आस्तामित्यादौ आटो मा भूदिति। यदि चेदमसिद्धत्वं नित्यं स्यात्, आटोऽसिद्धत्वादेव लोपो न भविष्यति इति किं तपरकरणेन?

**तत्त्वबोधिनीकारेण** प्रकृतसूत्रव्याख्यायामुच्यते- '**श्नसोरल्लोपः** ६.४.१११ इति तपरकरणाल्लिङ्गाद् आभीयासिद्धत्वमनित्यमिति। तपरकरणं हि आस्ताम् इत्यत्र आडागमस्य लोपो मा भूत् इत्येतदर्थम्। यदि आडागमः श्नसोरल्लोपं प्रति आभीयत्वेन असिद्धः स्यात् तर्हि किं तेन तपरकरणेन' इति।

सूत्रानित्यत्वविषये अत एकहल्सूत्रे **दम्भ एत्वमलक्षणम्** (श्लोकवा.)। **असिद्धत्वान्नलोपस्य दम्भ एत्वं न सिध्यति।... श्नसोरत्त्वे तकारेण ज्ञायते त्वेत्त्वशासनम्।।** इति श्लोकवार्तिकस्य व्याख्यायामुच्यते भाष्ये- अनित्योऽयं विधिरिति। अत्र **प्रदीपकृदाह-** असिद्धत्वस्य अनित्यत्वज्ञापनाय तकारः कृतः। नित्ये हि असिद्धत्वे आसन् इत्यादौ आटः असिद्धत्वाद् लोपो न भविष्यतीति किं

तन्निवृत्त्यर्थेन तकारेण। तेन असिद्धत्वाभावाद् दम्भ एत्वं सिध्यति।

**आभीयासिद्धत्वस्य अनित्यत्वे फलम्-** देभतुः इत्यादेः सिद्धिः। तथा हि दम्भने (लोकवञ्चनाय विहितकर्मानुष्ठानं दम्भः) वर्तमानात् स्वादिगणीयात् दम्भुधातोः लिटि तसि तसोऽतुसि दम्भ् अतुस् इति स्थिते **श्रन्थि-ग्रन्थि-दम्भि-स्वञ्जीनां लिटः कित्त्वं वा** इति व्याकरणान्तरनियमेन लिटः कित्त्वेन अनिदितां **हल उपधायाः क्ङिति** ६.४.२४ इति झलन्तस्य अनिदितः अङ्गस्य उपधाया नकारस्य कित्परस्य लोपे धातोर्द्वित्वे अभ्यासत्वे दभ् दभ् अतुस् इति जाते **अत एकहल्मध्येऽनादेशादेर्लिटि** ६.४.१२० इति एत्वाभ्यासलोपयोः कृतयोः सकारस्य रुत्वे विसर्गे च कृते देभतुः इति रूपम्। तत्र यदि **अत एकहल्मध्येऽनादेशादेर्लिटि** ६.४.१२० इति आभीये कर्तव्ये अनिदितां हल उपधायाः क्ङिति ६.४.२४ इति आभीयमसिद्धं स्यात्तदा नलोपस्य असिद्धत्वेन एत्त्वाभ्यासलोपयोरप्राप्तौ प्रोक्तं रूपं न सिध्यति। परन्तु **असिद्धवदि**ति सूत्रस्य अनित्यत्वेन अत्र अप्रवृत्तौ नलोपस्य सिद्धत्वाद् एत्त्वाभ्यासलोपौ स्त इति। तेन **दम्भेश्च एत्त्वाभ्यासलोपौ वक्तव्यौ** इति वार्तिकं न अपूर्ववचनं किं तु प्रकृतसूत्रानित्यत्वबललभ्यमेव।

**१४. भाष्यकारमतम्-** भाष्ये सूत्रारम्भसमर्थकानि **कात्यायनो**क्तानि सर्वाणि वार्तिकानि प्रकारान्तरेण उपपत्तिं

प्रदर्शयता प्रत्याख्याय **श्लोकवार्तिककारो**क्तप्रयोजनान्यपि निराकृतानि भगवता भाष्यकृता। श्लोकवार्तिकोपन्यासप्रसङ्गे अगादि कैयटेन- वार्तिककारोक्तेषु प्रयोजनेषु प्रत्याख्यातेषु श्लोकवार्तिककारोक्तप्रयोजनोपक्षेपः। तत्र (उद्योते) **वार्तिककारः–कात्यायनः। श्लोकवार्तिककारस्तु** अन्य एवेत्यवादी**दुद्योतकारः**। अत एव भाष्ये तु एतत्सूत्रं प्रत्याख्यातमित्याह **प्रकाशकृत्**। सूत्रं तु प्रत्याख्यातमाकरे इति **प्रौढमनोरमाकारः**।

परन्तु **आरभ्यमाणेऽप्येतस्मिन्योगे** इति भाष्यांशं व्याचिख्यासुना अनेकपरिहाराश्रयणे प्रतिपत्तिगौरवं मा भूत् इत्येवमर्थमारभ्यमाणे इति ब्रुवता **कैयटेन** प्रतिपत्तिगौरवपरिहाराय सूत्रमिदमावश्यकमित्यवाचि।

**पदमञ्जरीकारो**पि तदेवं न सन्ति प्रयोजनानि, प्रतिपत्तिगौरवपरिहारार्थं सूत्रमारब्धमित्याह।

बृहच्छब्देन्दुशेखरे **नागेश**स्तु इदं सूत्रं स्पष्टार्थकम्। ध्वनितं चेदम् **आरभ्यमाणेऽप्येतस्मिन्नि**त्यादिना भाष्येण इति वदति।

१५. **स्वमतम्-** व्याकरणस्य प्रक्रियांशः अविद्याविजृम्भित एव। तदुक्तं भर्तृहरिणा **शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते** इति। अखिलः खलु

लोकव्यवहारः वाक्यमालम्ब्य प्रवर्ततेतमाम्। क्वचित् निशम्यामि पदं स प्रवर्तते। शिष्टप्रयुक्तपदानामन्वाख्यानाय प्रवर्तत इदं खलु पदशास्त्रम्। तदन्वाख्यानाय बहुविधं मार्गं श्रयते व्याकरणमिदम्। तेष्वसिद्धमार्गाश्रयणमेकम्। सिद्धे असिद्धत्वमारोप्य प्रवर्तमानमिदं व्याकरणं यदि सत्यस्य पदस्य साधुत्वं निर्वक्ति तर्हि का हानिरत्र आपद्येत । तदुक्तम् - **उपायाः शिक्षमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति।।** आरोपितस्य ज्ञानस्य अप्रमात्वेन तादृशं ज्ञानं पुरस्कृत्य शास्त्रप्रवृत्तिः किमु साध्वी इति चेदत्रोच्यते नागेशेन-यद्यपि लोके अनाहार्यज्ञानस्य (यथार्थज्ञानस्य) प्रवर्तकत्वं निवर्तकत्वं च दृष्टं तथापि इह (व्याकरणे) शास्त्रप्रामाण्यात् आहार्यारोपोऽपि शास्त्रप्रवृत्तौ अप्रवृत्तौ च नियामक इति बोध्यम् इति शिवम्।

# शरणागति: नि:श्रेयसोपायने सरलसरणि:

**ड. सेख-साविर-आलि:**

सहायकाध्यापक**:** पश्चिमवङ्गराज्यविश्वविद्यालयस्य

**(*निबन्धनिर्यासः-***

मोक्षमाध्वीकाधिगमाध्वसु एषु ज्ञानादिषु चतुर्षु भक्तिरानन्यमयति। तत्रापि शरणागतिरन्तर्गतिमेति। एषां ज्ञानाद्युपायचतुष्काणां मोक्षस्पर्शजुषां शरणागतेश्च स्वरूप-निरूपणपुरस्सरं, शरणागतेरार्जवं जववता व्यापृतिमतामपि कृत्यकलापे कलौ युगे सयुक्ति यत् संप्रादर्शि, साम्प्रतिके नासाम्प्रतम् तत्, किञ्च दर्शनप्रस्थानेषु आस्तिकनास्तिकेषु मोहम्मदीयादिधर्ममतेषु सुसमासादा सेति अशेषविशेषाविशेष-पुंसां समादरणीयेति।**)**

धर्मार्थकाममोक्षा हि चतुर्वर्गा**:** पुरुषार्थत्वेन प्रसिद्धा आ मूढाच्छास्त्रशस्त्रा आ कुटीरवासिभ्य**:** प्रासादवासिनो निखिला एव नरा**:** संसारमिमं दु**:**खमयमेव मन्यन्ते। क्वचिद्दु**:**खस्रोत**:**सूत्थितं सुखसन्ततितरङ्गोऽपि खद्योतिका-द्युतिरिव भङ्गुर इति परिणामदु**:**खमिति वा सुखमपि

भासमानं दु:खमित्यवधेयम्। दु:खपारावारपार एव पुंसां काङ्क्षा। स च धर्मादिसाध्योऽपि नैकान्तिको नात्यन्तिकश्च। मोक्ष एव दु:खात्यन्तनिवृत्तिरूपत्वात्तदीयमेव पुमर्थानां परमत्वं चरमत्वञ्चेति।

ननु कोऽयं मोक्षमार्ग:? तापत्रयपराहता विवेकिनो नानाश्रुतिस्मृतीतिहासपुराणेषु आत्मतत्त्वसाक्षात्कार एव तदुपायत्वेनाकलित इति मन्यन्ते। ननु आत्मतत्त्वसाक्षात्कार: किंसरणिसाध्य इति चेन्न शास्त्रेष्वेव तादृशमार्गस्य सुलभत्वात्। किन्तु शास्त्राणां भिन्नत्वात्तत्प्रवर्तकमुनीनाञ्च "नासौ मुनिर्यस्य मतं न भिन्नमि"ति भिन्नभिन्नमतित्वात् शास्त्रमपि विविधतदुपायज्ञापकम्। तथाहि केचन ज्ञानस्य कर्मण: वा भक्तेरेव वा तन्मार्गत्वेनोपदेशं कुर्वन्ति। तत्रत्येषु भिद्यमानेषु मतेषु सत्सु च समुदितानां साधारणमनुजनूनां च संशयानां श्रीमद्भगवद्गीता श्रीरामकृष्णतदनुयायिगीतिश्च छेदिकेति नो नितरां सुखमिति किमुत वक्तव्यम्। तथाहि 'यावन्ति च एतानि मतानि तावन्त एव पन्थान' इति श्रीरामकृष्णवचनं "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति कृष्णवचनञ्चानुसन्धेयम्।

एवं सति सत्सु रिक्तासनेषु किं साधनं सुखासनम्? ननु के च मार्गा गीतायामुपदिष्टा:? तथाहि प्रथमषट्के कर्मयोगस्य द्वितीये षट्के भक्तियोगस्य तृतीये षट्के च ज्ञानयोगस्य आवेदितत्वात्त एव मार्गा: श्रीगीतागीता:। श्रीमद्भगवद्गीता हि समन्वयशास्त्रमिति भणितिरपि सुप्रापा एव। ननु कोऽयं कर्मयोग:? हलकर्षणे सत्येव शैथिल्यमापन्ने क्षेत्रे बीजमुप्तं सदङ्कुरकारि भवति नाकृष्टे क्षेत्रे। भवत्यप्यङ्कुरे तत्रत्यस्याङ्कुरस्य नोत्कर्षस्तथाविधो घटत इत्यादौ क्षेत्रेणोर्वरेण भाव्यम्, भाव्यफलफलायैवेत्यवधयम्। एवमेव शुद्धचित्त एव तत्त्वसाक्षात्कार: सुघट इति चेतसा शुद्धेन भाव्यम्। तच्छुद्धिसाधिका हि हलकृष्टिवन्निष्कामकर्मानुष्ठिति:। सैव निष्कामकर्मानुष्ठितिरेव कर्मयोगपदवेदनीयेति बोध्यम्। न हि क्षणमपि अकर्मकृता भाव्यमिति कर्मावश्यमनुष्ठेयमिति कर्मानुष्ठानस्यावश्यकत्वे सकामकर्मवन्निष्काममपि कर्म कर्तुं शक्यमिति तत्र च सकामकर्मण: सफलत्वात्तद्भुक्तये पुनरपि बन्ध:। कर्मानुष्ठानस्य याथार्थ्यायाथार्थ्यानुसारं च फलस्यापि साध्वसाधुत्वापत्तिरिति तत: अपि क्रमेण सुखं दु:खं वा सुखमपि न चिरायेति तदपि परिणामपीडदमिति सकामं कर्म सदैव दु:खदमिति हेयमेव। किञ्च सकामकर्मण: सफलत्वे

सुफलत्वे च न तद्वारा कामशान्तिर्घटतेऽपि तु विवर्धत एवेति अग्नौ हविराहुतौ अग्नेर्वृद्धिवदिति "न जातुचित् काम: कामानामुपभोगेन शाम्यति" इति सर्वथैव सकामं कर्म त्याज्यमिति। एवञ्च दशायां न कर्मात्यन्तं त्याज्यं भवति, "न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृदि"ति लोकानुसारिगीतावचनप्रामाण्यात्। अपि चोदितं –

"न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति॥"

तथात्वे शिष्टं निष्कामं कर्मैव शक्यानुष्ठानमिति तेनैव चेत:शुद्धि: सुसम्पादा स्यादिति। तथाचोदितं –

श्रीमद्भगवद्गीतायाम् –

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥" इति।

एवमेव निष्कामकर्म परमपुरुषार्थप्रापकमेवेति सोऽपि मार्गविशेष:। तदुक्तं -

"असक्तो ह्याचरन् परमाप्नोति पुरुष:" इति।

अत: सिद्धान्त: कर्मयोगे- “तस्मादसक्त: सततं कार्यं कर्म समाचर” इति।

ननु कोऽयं ज्ञानयोग:? निर्गुणब्रह्मोपासनं ज्ञानयोग:। तथाच गीतायां गीतम्-

“ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम्॥
संयनियम्येन्द्रियग्रामं सर्वत्र समबुद्धय:।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रता:॥” (१२/३-४)

अत्रापि अक्षरस्य अव्यक्तस्य सर्वव्यापिन: अचिन्त्यस्य निर्विकारस्य परमात्मन उपासनं तत्पदप्रापकमेवेति “ते प्राप्नुवन्ति मामेव” इति वचसैवोदितत्वात्।

एवं च योगमार्गोऽपि अत्रावेदित:। योगश्च यमनियमासनाद्यष्टाङ्गविशिष्ट:। तदनुष्ठानमपि तत्प्रापकं भवति। तथाच योगसूत्रम् – “यमनियमासनप्राणायाम-प्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि”(२/२९) इति।

"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिर्विवेकख्याते:" (२/२८) इति च।

एवंविधस्य योगस्यानुष्ठाने परमपदप्राप्तिर्घटतेतराम्। तथाहि श्रीमद्भगवद्गीतायां गीतम् –

"स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवो:

प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ।
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणो
विगतेच्छभयक्रोधो य: सदा मुक्त एव स:॥"
(५/२७-२८) इति।

एवञ्च "विगतेच्छभयक्रोधो य: सदा मुक्त एव स:" इति वचसा योगयुक्तोऽपि प्रागुक्तो मुक्तिं भजत इति आवेदितम्। एवं भक्तियोगोऽपि अत्रावेदित:। तत्रैव शरणागति: प्रसङ्गसङ्गतिमेति। ननु कोऽयं भक्तियोग:? कैव वा शरणागति:? श्रवणाद्यनुष्ठानं परमेश्वरतुष्टिमात्रनिमित्तं भक्ति:। तदुक्तं भागवते –

"श्रवणं कीर्तनं विष्णो: स्मरणं पादसेवनम्।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।" इति।

श्रवणादिकं यावन्न श्रीचरणे समर्पितं तावन्न भक्तिः योगपदवेदनीयतामेति। अतः श्रवणाद्यनुष्ठानं भक्तिमात्रम्। किन्तु श्रवणाद्यनुष्ठानस्य श्रीचरणे निवेदने हि सा भक्तिः योगपदं समधिगच्छति। स एव भक्तियोग इत्याख्यायते। अतस्तत्र "इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा" इत्युदितम्। अतः सगुणनिर्गुणभेदन भक्तिर्द्विविधा। तत्र स्वार्थमूला भक्तिर्हि सगुणा केवलमीश्वरतुष्टिमूला हि भक्तिर्निर्गुणा इति। तथाच गीतायां सगुणभक्तेश्चातुर्विध्यमुक्तम्-

"चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥" (७/१६)

एवञ्च श्रीमद्भागवतेऽपि सात्त्विकराजसतामसभेदेन वर्णिता भक्तिः सगुणैवेति। तदुक्तम् तत्र –

"अभिसन्धाय यो हिंसां दम्भं मात्सर्यमेव वा।
संरंभी भिन्नदृग्भावं मयि कुर्यात् स तामसः॥

विषयानभिसन्धाय यश ऐश्वर्यमेव वा।
अर्चादावर्चयेद्यो मां पृथग्भाव: स राजस:॥
कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भाव: स सात्त्विक:॥
(३/२९/८-१०) इति।

अत्र च परमेशप्रीतिर्घटतामित्यत्र रागाभावात् तासां सगुणत्वमित्यवधेयम्।

का च निर्गुणा? भगवत्प्रीतिमात्रमूला भक्तिर्हि तथा। तदुक्तं –

"मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्ति: पुरुषोत्तमे॥
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जना:॥
स एव भक्तियोगाख्य आत्यन्तिक उदाहृत:।"
(३/२९/११-१४) इति।

एवञ्च शरणागतिरपि भक्तिविशेष:। सा कथञ्चिद्भागवती निर्गुणा भक्तिरिति वक्तुं शक्यते। अतएव यत्र इष्टमनिष्टं वा

काङ्क्षितं किमपि न तिष्ठति, सर्वं कर्म तत्फलं चेश्वरबुद्ध्या अनुष्ठीयते, अपि यत्करणीयं तदेवेश्वरभावनया क्रियते न त्वधिकमिति दशा भक्तस्य शरणागतिरित्युच्यते। तथाच श्रीमद्भगवद्गीतायां गीतम् –

"मच्चित्ता मद्गतप्राणा बोधयन्त: परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥" इति

अत्र च सदैवेश्वरस्मरणपरत्वं तद्गतप्राणत्वं कीर्तितम्। एवञ्च "अन्याभिलषिताशून्यं ज्ञानकर्माद्यनावृतम् आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा" इति भक्तिरसामृत-सिन्धुवचनमपि सार्थकम्। शरणागतिश्च भक्त्यङ्गम्। तथाचोक्तं श्रीभक्तिविज्ञाने – "श्रीजीवपाद श्रीभक्तिमार्गे विधिमार्गे ये एकादशप्रकार भक्त्यङ्ग (यथा शरणगति, गुर्वादिसेवा ओ नवविधा भक्ति) विषय उल्लेख करियाछेन, ताहाते शरणागति एकतम" इति। तदर्थश्चायं – श्रीजीवपादेन श्रीभक्तिसन्दर्भे उल्लिखितानामेकादशभक्त्याङ्गानां मध्ये शरणागति: प्रथमेति। वैष्णवतन्त्रे शरणागति: षड्विधा- १) श्रीशसुखानुसन्धान एव सहायकस्य ग्रहणं संकल्प: (२) तत्र

यत्प्रतिबन्धकं तस्य परिवर्जनम् ३) श्रीश एवावश्यं रक्षेदिति सुदृढनिश्चिति: ४) श्रीश एव पालक इति वरणम् ५) तत्पादपद्मे आत्मनिवेदनम् ६) दैन्यञ्चेति एवं चैषा शरणागति:। श्रीमद्भगवद्गीतायामावेदिता-

“सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच:॥”
(१८/६६) इति।

एतच्च कथामृतेऽपि स्पष्टम् “देखो वापु भगवानेर जन्य सव ना छाडले हवे ना। समस्त छेडे भगवानके धरते हवे। नाचते हले एक हात तुले एक हात वगलदावा करे नाचले हवे ना। दुहात तुले नाचो भगवानके सव समर्पण करे निश्चिन्त हये तार शरणागत हओ” इति। तदर्थश्चायं यत्, “भगवते समस्तमेव न समर्प्यते चेत् न फलं (मुक्ति:) घटेत” निखिलवस्तुनिचयपरित्यागेन भगवन्तं शरणं व्रज इति। किञ्च नृत्यवेलायां करद्वयेनैवोत्तलितेन भाव्यम्। एकस्योत्तलनेऽपरस्य स्कन्धसन्धिमध्ये स्थापने च नृत्यमेव न घटते। अत: तत्कृते सर्वं समर्प्य तमेव शरणम् व्रजे”ति।

अपि चोक्तं तत्रैव – "आमि यन्त्र तिनि यन्त्री" इति। "अहं यन्त्रमेव यन्त्र्येव स" इति भावोऽपि शरणागतिव्यञ्जकः। शरणागतौ लब्धायान्तु न पुनस्ततो भयम् शिशोर्यथा समस्तोऽयं भारो मातुरेव तथा भक्तस्यापि समस्तो भार ईशस्यैव।

तदुक्तं भागवते –

"यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित्।
धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह"॥
(११/२/३५) इति।

कठोपनिषद्यपि आम्नातम् –

"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्"॥ (१/२/२३) इति।

ननु ज्ञानादिमार्गवच्छरणागतिरपि मार्गः। किन्तु स च सरलतमत्वेन प्रतिपाद्यः। कथंकारमस्याः सरलतमत्वं

संगच्छते इति चेत्? आदौ वा शरणागति: मुक्तिसरणिरित्येव क्वापि प्रतिपादितं न वेति चेत्? अत्रोच्यते श्रीमद्भगवद्गीयाया द्वादशाध्याये एव प्रतिपादितञ्चैतदिति। तथाहि

"एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमा:"॥ (१२/१)

श्रीकृष्णं प्रत्यर्जुनस्य प्रश्ने श्रीकृष्णेनोत्तरितेन यत्,

"मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मता:॥" (१२/२)

वचनेनैव प्रमाणितं यत्, ज्ञानादप्यपेक्षया भक्तिमार्गस्य युक्ततमत्वमस्तीति। अपि चैतत् षष्ठेऽप्यध्याये उपपादितम् –

"योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मत:॥" (६/४३) इति।

अत्र च सर्वेषामित्युक्ते केषामिति चेदुच्यते –

"तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिक:।

कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥"
(६/४६) इति।

"अनन्यांश्चिन्तयन्तो मां ये जना: पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥"
(९/२२)

इत्यत्र श्लोके योगपदस्य भगवत्प्राप्तिरूपत्वात्, क्षेमपस्य च तस्मादनिवृत्तिरूपत्वात् शरणागते: मोक्षघटकत्वं सूपपादितमेव। तथाच श्रीबलदेवविरचितायां गीताभूषणटीकायामाटीकितम् – "अत्राहु:- तेषां नित्यं मया सार्धमभियोगं वाञ्छितं योगं मत्प्राप्तिलक्षणं क्षेमं च मत्तोऽपुनरावृत्तिलक्षणमहमेव वहामि, तेषां मत्प्रापणभारो ममैवे"ति (९/२२) इति।

ननु एतावतापि सन्दर्भेण भक्तितदङ्गभूत-शरणागतिमार्गस्य श्रेष्ठत्वमुपपादितं, न तु तदीयसारल्यमिति चेदत्रोच्यते – सत्यम्। तथापि कुत: शरणागते: गरीयस्त्वमित्यत्र ज्ञानमार्गे क्लेशाधिक्यादत्र च क्लेशलेशत्वाद् गरीयस्त्वमित्यनेनैव तदीयसारल्योपदर्शनस्य

युक्तत्वात्। तथाच श्रीधरभट्टटीकायामाटीकितम् – “अव्यक्ते निर्विशेषेऽक्षरे आसक्तं चेतो येषां तेषां क्लेशोऽधिकतर:। हि यस्मादव्यक्तविषया गतिर्निष्ठा देहाभिमानिनां नित्यं प्रत्यक्प्रवणत्वस्य दुर्घटत्वात् ” (१२/३-४) इति। ननु एतत्तु श्रीधरमतमन्येषां तु कथं सुग्राहं स्यादिति चेन्न “क्लेश: अधिकतरो यद्यपि मत्कर्मादिपराणां क्लेश: अधिक एव, क्लेश: अधिकतरस्तु अक्षरात्मनां परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्त: ‘अव्यक्तासक्तचेतसाम् ..... अव्यक्ता हि यस्माद्या गति: अक्षरात्मिका ‘दु:खं’ सा देहवद्भि: देहाभिमानवद्भि:’ ‘अवाप्यते’। अत: क्लेश: अधिकतर:” (१२/५) इति शाङ्करवचनस्यापि तत्प्रोपोद्बलकत्वात्, ‘द्विर्बद्ध: सुबद्धो भवति’ इति न्यायात् च। श्रीरामकृष्णदेवैरप्यभ्यधायि – “यारा संसारे आछे आर यादेर देहबुद्धि आछे तादेर सोऽहं भावटि भालो नय। संसारीर पक्षे योगवाशिष्ट वेदान्त भालो नय, वड खाराप। संसारीर सेव्यसेवकभाव थाकवे” इति। तथाहि संसारिणां देहाभिमानवतां हि नायं “सोऽहम्” इति भाव:

वेदान्तयोगवाशिष्टादिको वा रम्य: सुखद: सम्पद्यते इति तदर्थ:।

एतेनैव च वचसा युगपच्छरणागते: सारल्यं तथा तत्र च कारणमप्युपदर्शितमिति बोध्यम्। ननु किमत्र हेत्वन्तरं युज्यते न वेति? अत्रोच्यते सत्यम्। इतोऽपि शरणागते: सारल्यं यत् श्रवणादिद्वारा एव भक्ति: तद्विशेषभूता शरणागतिश्च सिध्यति। तत्र च गण्डूषजलतुलसीदलपात्रविशेषाणाञ्च केवलमुपयोग इति। तथा गौतमीयतन्त्रे उक्तम् –

"तुलसीदलमात्रेण जलस्य चूलकेन वा।
विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सल:॥" इति।

श्रीचैतन्यचरितामृतग्रन्थे चावेदितम् –

"कृष्णके तुलसीदल देय येइ जन।
तार ऋण शोधिते करेन चिन्तन॥
जल तुलसीर सम किछु घरे नाहि घन।
तवे आत्मा वेचि करे ऋणेर शोधन॥ (आदिपर्वणि ३/१०४-१०६) इति।

श्रीभागवतेऽपि – “शरणागतिश्रितामानेव सुखाराध्य ईश्वर” इति। “तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभि:” (३/१९/३६) इति।

प्रह्लादवचनमप्यत्र मानम् – “न ह्यच्युतं प्रीणयतो बह्वायास:” (भागवते ७/६/१९) इति।

किञ्च कुटुम्बभरणे यादृश: क्लेश: सोऽपि नैवात्रापेक्षित इति। तदुक्तं तत्र श्रीलचक्रवर्तिकृतायां टीकायाम् – “कुटुम्बप्रीणयने ये प्रकार क्लेश, श्रीहरिर प्रीतिसाधने तद्रूप क्लेश स्वीकार करिते हय ना। तिनि सर्वहृदये अन्तर्यामिरूपे वर्तमान थाकाय, अन्वेषणेर ओ क्लेश नाइ” इति।

तृतीयत: अपि चैतदबोध्यं यत् अस्यां हि शरणागतौ अचिरेणैव परमपदप्राप्तिर्घटत इति तस्या: सारल्यं किमुत वक्तव्यम्। तदुक्तं –

“ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्परा:
अनन्येनैव योगेन मां ध्यायन्त उपासते।
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्

भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्॥"

(१२/६-७) इति।

एतच्च नवमेऽध्याये ऽभ्यधायि-

"क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।

कान्तेय प्रतिजानीहि न मे भक्त: प्रणश्यति॥" (९/३१)

तथाच नारदीयभक्तिसूत्रे आवेदितम् –

"स कीर्त्यमान: शीघ्रमेवाविर्भवति अनुभावयति च भक्तान्" (८०) इति।

चतुर्थत: - अपि चैतद्बोध्यं यत् यथा ज्ञानगते: क्लेशात्मकत्वात् ततोऽपि क्लेशलेशत्वात् शरणागतेरेव उपादेयत्वमिति प्रतिपादितपूर्वमेव, तथापि शरणागते: कीदृशं क्लेशलेशत्वं युज्यते येन तद्विशिष्यत इति तदिदानीं प्रतिपाद्यते। चित्तसमाधानादिकं प्रति असक्तानां तु लघूपायत्वेन शरणागतिरेवाश्रेयत्वाद्विशिष्यत इति प्रतिपाद्यम्। चित्तसमाधौ अशक्त: प्रत्याहारादिद्वारा श्रीपदस्मरण-मभ्यस्येत्। अभ्यासेऽपि अशक्त: एकादश्युपवासव्रत-पूजापरिचर्यानामसंकीर्तनादिकं भगवत्प्रीतियुजं कर्म कुर्यात्।

ततोऽपि मुक्तिप्राप्तिरिति तत्रापि अशक्तस्य पुरुषस्य ईश्वरैकशरणत्वं यायतो यथाशक्ति कर्माणि यतचित्तस्य परित्यजत: फलासक्ति: परिहर्तव्या। ततश्च संसृतिपारावारपार: स्यादिति। ततश्च सिद्धान्तितम् -

"श्रेयो हि ज्ञानमभ्यासाज् ज्ञानाद्ध्यानं विशिष्यते।

ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् (१२/१२)" इति।

अतएव सर्वथैव अशक्तस्य शरणागतिरेव श्रेयसी। तथाचोक्तम् –

"अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रित:।

सर्वकर्मफलत्यागं तत: कुरु यतात्मवान्॥" (१२/११)

अत्र च गिरीशचन्द्रघोषवृत्तमप्यनुसन्धेयमिति।

पञ्चमत: - किञ्च "मय्यर्पितमनोबुद्धिर्यो मद्भक्त: स मे प्रिय:" (१२/१४) इति।

"हर्षामर्षभयोद्वेगैर्मुक्तो य: स च मे प्रिय:" (१२/१५) इति।

“एतैर्विमुक्तो यो मद्भक्त: स मे प्रिय:” (सुबोधिन्याम् १२/१५) इति।

सर्वारम्भपरित्यागी यो मद्भक्त: स मे प्रिय:” (१२/१६) इति।

“शुभाशुभपरित्यागी भक्तिमान् य: स मे प्रिय:” (१२/१७) इति।

तथा “सम: शत्रौ च मित्रे च तथा मानापमानयो:।

शीतोष्णसुखदु:खेषु सम: सङ्गविवर्जित:॥

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।

अनिकेत: स्थिरमतिर्भक्तिमान् मे प्रियो नर:॥

(१२/१८-१९) इति।

“ये तु धर्मामृतमिदं यथोक्तं पर्युपासते।

श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रिया॥” (१२/२०)

इत्यादिषु भक्तियोगाध्यायान्ते अष्टश्लोकै: क्रमेणैव – “भक्तिमान् मे प्रिय:” इति वचोजालैर्भक्तिगतेरेव मार्गेषु सारल्यमुदितमिति बोध्यम्, “सिद्धे सत्यारभ्यमानो विधिर्नियमाय कल्प्यते” इति न्यायात्।

षष्ठत: - किञ्च "दैवी ह्येषा गुणमयी मम माया दुरत्यया
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥" (७/१४)

इत्यत्र श्रीधरभट्टटीकायामाटीकितम् – "के तर्हि जानन्ति? इत्यत आह- दैवीति दैवी अलौकिकी अत्यद्भूतेत्यर्थ:, गुणमयी सत्त्वादिगुणविकारात्मिका मम परमेश्वरस्य शक्तिर्माया दुरत्यया दुस्तरा हि प्रसिद्धमेतत्, तथापि ये मामेवेत्येवकारेणाव्यभिचारिण्या भक्त्या प्रपद्यन्ते भजन्ते ते मायामेतां सुदुस्तरामपि तरन्ति ततो मां जानन्तीति भाव: इति। तथाच माया दुस्तरा इत्यनेन मायातरणं सम्भवतीति तथा असति तदुपाये तन्न सम्भवतीति आक्षेपादुपायोऽप्यस्तीति प्रतिपादितम्। तत: समेषामेवोपायानां प्राप्तौ तत्र उच्यते, तथापि 'मामेव ये प्रपद्यन्ते '"इति तेन शरणागतेरेव मायातरणोपायेषु लघीयस्त्वं समर्थितं भवतीति।

सप्तमत: - अपि चैतद्बोध्यं यत्, निर्गुणब्रह्मोपासनायां "ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते" इत्यादौ इन्द्रियग्रामसंयमस्य सर्वत्र समबुद्धेश्च साधनत्वेन निगदितम् तदेतत्साधनप्राप्तिर्न सुकरीति किन्तु शरणागतौ लब्धायां तु

सर्वमेतत् अयत्नसिद्धमेव समवाप्तं स्यादिति। तदुक्तं द्वादशाध्याये –

“अद्वेष्टा सर्वभूतानां मैत्र: करुण एव च।
निर्ममो निरहङ्कार: समसुखदु:ख: क्षमी॥

सन्तुष्ट: सततं योगी यतात्मा दृढनिश्चय:।
मय्यर्पितमनोबुद्धिर्यो मद्भक्त: स मे प्रिय:॥”
(१२/१४) इति।

तत्र च श्रीधरभट्टटीकाव्याख्यानमप्यत्र प्रमाणतां प्रतिपद्यते- “एवंभूतस्य भक्तस्य क्षिप्रमेव परमेश्वरप्रसादहेतून् धर्मानाह- ”इति।

अष्टमत:- अनिर्देश्यमव्यक्तमचिन्त्यमित्यादिपदेनैव यदुपास्य-वर्णनं विहितं ततोऽपि ज्ञानयोगस्य क्लेशतरत्वं सुगममेवेति साधूनामसाधूनामियमजिह्मा राजपद्धतिरिति।

नवमत: - अपि चैतद्बोध्यं यत्, कलौ हि सर्व एव यथा व्यापृता यथा वा सर्वे तमोगुणाच्छन्नास्तेषां कृते शरणागतिरेव सरलोपाय इति कथमपि नाङ्गीकर्तुं शक्यते।

पात्रभेदे हि समयभेदे हि औषधं चिकित्सकै: रोगिणे दीयते। तथाच कलौ अपि शरणागतिरेव शरणम्।

दशमत: - किञ्च ज्ञानयोगादिषु युक्त्या प्रयोगेण विचारस्यापेक्षता वर्तत इति ज्ञानयोग: प्रमाणान्तरसापेक्ष: किन्तु शरणागतौ समुदितायां हि न संशय: 'सा मे चेतसि समुदिता न वेति? न वा तत्र प्रमाणान्तरस्यापेक्षाऽस्तीति। न हि मातरं प्रति पुत्रस्य प्रेमास्तीति न वेति पुत्रस्य संशय: भवति। न वा तत्र पुत्रस्य प्रमाणान्तरस्यापेक्षास्ति तत्परीक्षणे इति घट: प्रदीपप्रकाश्योऽपि न हि प्रदीप: प्रदीपान्तरप्रकाश्य इति। किञ्च नारदीयभक्तिसूत्रे उक्तं यत्, "नात्र वादो विचारार्थमवलम्बनीय:। अत: ज्ञानादियोगेषु यथा बाहुल्यमस्ति न तथा अत्र इति। तदुक्तं तत्र "वादो नावलम्ब्य:" (७४) इति। तथा "बाहुल्यावकाशत्वाद-नित्यत्वाच्च"(७५) इति।

एकादशत: - किञ्च शरणागतिमार्गस्य भक्तिमार्गस्य वा स्वत: एव शान्तस्वभावत्वात् परमानन्दभूतत्वात् साधनान्तरत: सुलभत्वेनायं मार्गो विशिष्यत। तथाच "शान्तिरूपात्

परमानन्दरूपाच्च"(६०) इति नारदीयभक्तिसूत्रे विवेदितम्। तद्व्याख्यायाञ्च भूतेशानन्दमहाभागैरावेदितम् – "भक्तिर सहजसाध्यतार आरओ कारण ये भक्ति स्वयं शाश्वत शान्ति ओ परमानन्दस्वरूप इति। पूर्वोक्तार्थ एव एतद्वच:प्रतिपाद्य इति। न च कथंकारमस्या: परमानन्दप्राप्तिघटकत्वं संगच्छते इति वाच्यम् , तत्र लोकाचारशास्त्राचरणानां समेषामेवेश्वरे समर्पितत्वात्। तत्र मार्गे चिन्त्यान्तराणामसद्भावाच्च। तथाच नारदीयभक्तिसूत्रे आवेदितम् – "लोकहानौ चिन्ता न कार्या निवेदितात्मलोकवेदशीलत्वात्"(६१) इति। तथाच नारदीयभक्तिसूत्रम् – अन्यस्मात् सौलभ्यं भक्तौ" (५९) इति। तथा "प्रमाणान्तरस्यानपेक्षत्वात् स्वयं प्रमाणत्वात् " इति। अतो लघीयस्त्वमस्या: किमुत वक्तव्यम्?

ननु भवता उक्तं शरणागति: सर्वेषामेव मुक्तिगतिरिति कथमेतदुपपद्यते? तदुच्यते सत्यम्। शरणागति: न केवलं ज्ञानिनामपि तु साध्वसाधुनिर्विशेषेण समेषामेव मुक्तये उपकारिणीति। तथाहि श्रीमद्भगवद्गीतायामविगीततया गीतम् –

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति मे प्रिय:।
ये भजन्ति तु मां भक्त्या मयि ते चाप्यहम्॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्य: सम्यग्व्यवसितो हि स:॥"
(९/२९-३०) इति।

न खलु कलङ्कितोऽपि चन्द्रस्तिमिरपराभवमेति। तदुक्तं नारसिंहे पुराणे –

"भगवति च हरावनन्यचेता भृशमलिनोऽपि विराजते मनुष्य:।
न हि शशकलुषच्छवि: कदाचित् तिमिरपराभवतामुपैति चन्द्र:॥" इति।

ननु "नाविरतो दुश्चरितान्नाशान्तो नासमाहित:।
नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात्॥"

इत्यत्र दुराचाराणां श्रीशपादप्राप्तेरश्रवणात् कथं पूर्वोक्तं वच: युक्ततां यातीति चेन्न। हरिस्मृत्यैव तद्दुरितदूरणासम्भवात्। तथाचाहतं श्रीमद्भगवगीतायाम् –

"क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।

कौन्तेय प्रतिजनीहि न मे भक्त: प्रणश्यति॥" (९/३१)

भागवतेऽप्यावेदितम् –

"बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियै:।
प्राय: प्रगल्भतया भक्त्या विषयैर्नाभिभूयते॥" (११/१४/ १८) इति।

ननु ज्ञानेनैव मुक्तिर्घटते तदुक्तं श्रीमद्भगवद्गीतायाम् -

"कर्मणैव हि संसिद्धिमास्थिता जनकादय:।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥" (३/२०)

अत्र च एवकारेण यदि कर्मण एकस्यैव इति तदुपायत्वमितरेषाञ्च व्यवच्छेदस्तर्हि कथं शरणागतेस्तथात्वं प्रतिपद्यते इति चेन्न। अत्र कर्मणा निष्कामकर्मणा चित्तशुद्धिमात्रं कथितमिति चित्तशुद्धौ हि निष्कामकर्मण एव प्रयोजनम्, न तु मुक्तौ। कर्मयोगस्यैव कारणत्वं नान्यस्य इति व्याख्येयम्। तदुक्तं श्रीधरटीकाय़ां – "अत्र सदाचारं प्रामाणयति कर्मणैवेति। कर्मणैव शुद्धसत्त्वा: सन्त: संसिद्धिं सम्यग् ज्ञानं प्राप्ता इत्यर्थ:" इति।

न च न क्वापीयमन्यत्र शरणागति: श्रुतपूर्वा कुत एतन्नूत्नं तत्त्वं कल्पितमिति किं नेदं मनोराज्यविजृम्भणमिति शङ्क्यम्। दर्शनान्तरेषु धर्मान्तरेष्वपि एतस्य सुखदर्शनात्। तथाहि योगदर्शने समाधिपादे मोक्षसाधनत्वेन साधकानां वैकल्पिकत्वेनेश्वरप्रणिधानमुक्तम्। तथाच पातञ्जलसूत्रम् - "ईश्वरप्रणिधानाद्वा" (१/१/२३) इति। ननु किमिदमीश्वरप्रणिधानम्? तदुक्तं भोजवृत्तौ – "ईश्वर: वक्ष्यमाणलक्षण: तत्र प्रणिधानं भक्तिविशेष: विशिष्टमुपासनं सर्वक्रियाणां तत्रार्पणं विषयसुखादिकं फलमनिच्छन् सर्वा: क्रियास्तस्मिन् परमगुरावर्पयति तत्प्रणिधानं समाधेस्तत्फललाभस्य च प्रकृष्ट उपाय:" इति।

अत्र तु ईश्वरे सर्वकर्मतत्फलार्पणमेवेश्वर-प्रणिधानमित्युक्तमिति न तच्छरणागतितो भिद्यते। तथाच श्रीमद्भगवद्गीतायां गीतम् –

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥" इति।

चन्द्रिकायामपि एतदेव साक्षादीश्वरप्रणिधानमित्युक्तम्। भाष्ये मणिप्रभायाञ्च ईश्वरे प्रणिधानाद्भक्ति-

विशेषादीश्वरस्तमनुगृह्णातीति अर्थो व्याख्यात:। भक्तिविशेषश्च कीदृगिति न व्याख्यातम्। मणिप्रभायामुक्तम् – “ईश्वरे कायिकाद्वाचिकान्मानसिकात् प्रणिधानाद्भक्ति-विशेषादासन्नतम: समाधिलाभ:” इति। किन्तु भोजवृत्तौ तु स भक्तिविशेष ईश्वरे सर्वकर्माद्यर्पणरूप इति स्पष्टं भाषितमिति। अन्यत्र तु भावागणेशवृत्तौ अन्यथा उदितम्। तत्र ईश्वरप्रणिधानपदेन प्रणवजपादिकं सूचितम्। तथाचोक्तं – “वक्ष्यमाणलक्षणो य ईश्वर: परमात्मा परब्रह्मादिशब्दवाच्यो निरुपाधिकैश्वर्योपलक्षितश्चिन्मात्र: पुरुषविशेषस्तत्प्रणिधानात् ‘तज्जपस्तदर्थभावनमि’ति वक्ष्यमाणात्तद्विषयकधारणाध्यानसमाधित्रयतुल्यादप्यासन्नतमो योगस्तत्फलञ्च भवतीश्वरानुग्रहादित्यर्थ:” (१/१/२३) इति। तथापि साधनपादे “तप: स्वाध्यायेश्वरप्रणिधानानि क्रियायोग:” (२/१/१) इत्यत्र क्रियायोगतृतीयस्येश्वर-प्रणिधानस्य त्वीश्वरे सर्वकर्मार्पणस्वरूपत्वमुक्तमेव। तदुक्तं भावागणेशवृत्तौ – “तपोऽत्र चित्तप्रसादाविरोधिशास्त्रोक्तोप-वासादिकम् स्वाध्याय: प्रणवजपो मोक्षशास्त्राध्ययनं वा ईश्वरप्रणिधानं परमेश्वरे सर्वकर्मार्पणं, न तु प्रथमपादोक्तं

तस्योत्तमाधिकारिणं प्रत्येवोक्तत्वात्। अर्पणं च कौर्मे प्रोक्तम् – "नाहं कर्ता सर्वमेतद् ब्रह्मैव कुरुते तथा एतद् ब्रह्मार्पणं प्रोक्तमृषिभिस्तत्त्वदर्शिभि:" इति। अत एतन्निश्चितं योगशास्त्रेऽपि परमेश्वरे समस्तकर्मतत्फलार्पणरूपा शरणागतिरुपायत्वेन मोक्षघटकत्वेनोपदिष्टा।

किन्तु किमियं सरणि: शरणागति: सरला आहोस्वित् जिह्मा इति चेदत्रोच्यते तत्रैव तत्समाधिरपि गदित इति। तथाच "ईश्वरप्रणिधानाद्वा" इति सूत्रवृत्तौ भोजेन भणितम् – "इदानीमेतदुपायविलक्षणं सुगममुपायान्तरं दर्शयितुमाह- ईश्वरप्रणिधानाद्वा" (१/१/२३) इति। कथमस्य सुगमत्वमिति चेदत्रोच्यते तत्परिष्कृतं मणिप्रभायां यत् , भक्तेस्तु अन्यानपेक्षत्वादेव सुगमत्वमस्तीति। तदुक्तं मणिप्रभायाम् – "वाशब्द: पूर्वोक्तोपायेनास्य भक्त्युपायस्य विकल्पार्थ: भक्तेरन्यानपेक्षत्वादीश्वरो हि भक्त्याऽभिमुख: सन्निदमिष्टमस्यास्त्वित्यनुगृह्णातीति भाव:" इति। एवञ्च साधनपादे प्रथमसूत्रेऽपि भावागणेशवृत्तौ ईश्वरप्रणिधानस्य ईश्वरे समस्तकर्मतत्फलार्पणभूतस्य शरणागतिपर्यायस्य सुलभत्वमावेदितम्। तदुक्तं तत्र – "ईश्वरप्रणिधानं परमेश्वरे

सर्वकर्मार्पणम्, न तु प्रथमपादोक्तं तस्योत्तमाधिकारिणं प्रत्येवोक्तत्वात्" (२/१/१) इति। अपि च तत्रैव "यद्यपि वक्ष्यमाणा यमनियमासनादय: सर्वेऽपि क्रियायोगास्तथापि तेभ्य: समाहृत्य प्रकृष्टसाधनत्रयं मध्यमाधिकारिणं प्रत्युपदिष्टमन्तत: केवलेनैतेनापि तीव्रतरेण योगो भवतीति सूचयितुम्"(२/१/१) इति।

सांख्यदर्शने – अत्रेदमवधेयं यत्, सांख्यसंख्यावतामपि समवाये यमनियमासनप्रानायामप्रत्याहारधारणाध्यान-समाधय: अष्टावङ्गानि विवेकधीप्रयोजकानि इति। तेषाञ्च स्वरूपं तत एव वेद्यम्। तथाच "स्वकर्मस्वाश्रमविहितकर्मानुष्ठानमि"(३/३५) इति। सूत्रे भाष्ये भाष्यकृता भाषितम् – "तथाच पातञ्जलसूत्रे यमनियमासनप्रानायामप्रत्याहारधारणाध्यानसमाधय: अष्टा-वङ्गानि" इति। तेषाञ्च स्वरूपन्तत्रैव द्रष्टव्यम् इति। तथाच पातञ्जलशास्त्रे शौचं सन्तोषस्तप:स्वाध्याय ईश्वरप्रणिधानञ्च नियमा विवेदिता:। अथ सांख्यैरपीश्वरप्रणिधानमुक्तमिति तत्रापि शरणागति: स्वीकृता। ननु सांख्या निरीश्वरा इति

चेत्, सत्यं, तथापि अर्वाचीनैरभ्युपगतत्वात्, यद्वा जगत्कर्तृत्वेनास्वीकृतत्वे तत्सत्त्वस्यावश्याङ्गीकरणीयत्वाच्च।

न्यायवैशेषिकदर्शने – यद्यपि प्रमाणादिषोडशपदार्थ-तत्त्वज्ञानान्निःश्रेयसाधिगमो भवतीति द्वितीयसूत्रेऽक्षपादेन सूचितं, तथापि प्रमाणादिपदार्थतत्त्वज्ञानं परोक्षमपरोक्ष-मनादिकालतः प्रवृत्तं मिथ्याज्ञानं तज्जन्यसंस्कारपर्वतश्च समूलमुन्मूलयितुं न समर्थमिति अपरोक्षतत्त्वज्ञानं (आत्मतत्त्वसाक्षात्कारश्च) योगविध्युपायैः साध्यमिति विनिर्णीतम्। तदुक्तं न्यायसूत्रे – "तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः" (४/२/६१) इति। तत्र च अपवर्गार्थं यमनियमाभ्यामात्मसंस्कारः साध्य इति। तत्र यद्यपि भाष्ये "यमः समानाश्रमिणां धर्मसाधनम् नियमस्तु विशिष्टमिति, तथापि वृत्तिकृता तु योगोक्ता एव यमनियमा ग्राह्याः। तदुक्तं न्यायसूत्रवृत्तौ – "ननु समाधिमात्रादेव निष्प्रत्यूहोऽपवर्गः स्यात्साधनान्तरं वाऽपेक्षणीयमत आह यद्वा समाधिसाधनान्याह – तदर्थमपवर्गार्थमिति। भाष्यादौ तदर्थं समाध्यर्थमिति वा यमानाह योगसूत्रम् -

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा:" (२/३०)। नियमानाह- "शौचसन्तोषतप: स्वाध्यायेश्वरप्रणिधानानि नियमा: (२/३२) इति " इति।

अत्र ईश्वरप्रणिधानं नियमान्तर्गतमिति अपवर्गे शरणागतिरपि प्रयोजिकेति ज्ञेयम्। न्यायसूत्रवृत्तावपीश्वरप्रणिधानमङ्गीकृतमिति। तच्चेश्वरे सर्वकर्मार्पणरूपा शरणागतिरेवेत्यपि न संशयस्तत्र। अतएव शरणागतिर्न्यायशास्त्राङ्गीकृतेति किन्तु शरणागतिस्तत्र सरला सरणिरिति न भणितम्। किन्तु शरणागतिर्न नूत्नं तत्त्वमित्यपि विवेदितमिति।

वैशेषिकदर्शनप्रस्थाने - पदार्थतत्त्वज्ञानं मुक्तिकारणमिति यद्वेदितं, तत्र तत्त्वज्ञानञ्च आत्मसाक्षात्कार एवेति बोध्यमिति। तत्र च स चायं कथंकारं घटत इति "आत्मकर्मसु मोक्षो व्याख्यात:" (६/२/१६) इति सूत्रोपस्कारे परिष्कृतम् – "तत्रात्मकर्मणि तावत् श्रवणं मननं योगाभ्यासो निदिध्यासनं प्राणायाम: शमदमसम्पत्तिरात्मपरात्मसाक्षात्कारो देहदेशा-न्तरोपभोग्यपूर्वोत्पन्नधर्माधर्मपरिज्ञानं तद्भोगानुरूपनाना-देहनिर्माणं तयोर्भोगेन प्रक्षयो रागद्वेषलक्षणदोषतुषार-दमादग्निधर्माधर्मयोरनुत्पादात्प्रवृत्त्यपाये जन्मापायाद्

दु:खापायलक्षणोऽपवर्गस्तत्र षट्पदार्थीयतत्त्वज्ञानमाद्यमात्म-कर्म” इति। अत्र च योगाभ्यासादिपदेनैव योगशास्त्रं मोक्षप्रतिपत्तौ शरणमिति ध्येयम्। न्यायशास्त्रवत् तत्रापि व्याख्या पूर्ववदिति बोध्यम्।

मीमांसामतम् – यद्यपि मीमांसका निरीश्वरा इति मीमांसासंख्यावद्भिर्बहुतरं मीमांसितमेव तथापि आधुनिका मीमांसका: कथञ्चित् सेश्वरा एवेति वक्तुं शक्यत इति मीमांसान्यायप्रकाशप्रकाशितवच: कदम्बकस्यैवात्र प्रमाण-त्वात्। तथाच आपोदेवीये मीमांसान्यायप्रकाशे प्रकाशितम् – “सोऽयं धर्म: यदुद्देशेन क्रियमाणस्तद्धेतु: श्रीगोविन्दार्पणबुद्ध्या क्रियमाणस्तु नि:श्रेयसहेतु:। न च तदर्पणबुद्ध्यानुष्ठाने प्रमाणाभाव: -

“यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥” इति स्मृते:।

किञ्च कमलाकरभट्टविरचिते मीमांसाकुतूहलेऽक्षरश एव भक्तेर्मोक्षार्थत्वं ज्ञानकर्मसमुच्चयविचारे विचारितम्। ननु

भक्तिमार्गो निरीश्वराणां कुत: संगच्छत इति चेन्न। तेषामपि नये ईश्वराङ्गीकारात्। तथाच कमलाकरभट्टवचनम् –“ननु निरीश्वरवादिनस्ते कोऽयं भक्तिमार्गप्रवेश:? पतत्वयं प्रवादाशनिरेकदेशिषु अस्माकन्त्वस्त्येवेश्वर:। तथाचादौ विश्वेश्वरनति:

“विशुद्धज्ञानदेहाय त्रिवेदी दिव्यचक्षुषे।

श्रेय: प्राप्तिनिमित्ताय नम: सोमार्धधारिणे॥” इति श्लोकवार्तिकवच: प्रमाणम्।

अतएव वेदवशादेव मोक्षार्थतयोपासनावशाद्वा ईश्वरसिद्धि: न तु युक्त्या इति भक्तिरपि तस्मिन् परमगुरौ मुक्तिहेतुरिति आवेदितम्। तथाच तत्रोक्तं गीतासु-

“नाहं योगैर्न तपसा न दानेन न चेज्यया।
शक्या एवंविधो द्रष्टुं दृष्टवानसि मां यथा।।
भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप॥” इति।

“चतुर्विधा भजन्ते मां जना: सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥

> अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्।
> लोकाध्यक्षं स्तुवन् नित्यं सर्वदु:खातिगो भवेत्॥”

अत: मीमांसकैकदेशिमते च शरणागतिरावेदिता एव।

अथाद्वैतवेदान्तमतम्- वेदान्तदर्शनं त्रिप्रस्थानमिति सुप्रसिद्धम्। किं प्रस्थानत्रये क्वापि शरणागतिरावेदिता? तत्रोच्यते तत्र श्रुतिरपि प्रमाणम्। तथाहि मुण्डकोपनिषदि आम्नातम् –

> “समाने वृक्षे पुरुषो निमग्नो अनीशया शोचति मुह्यमान:।
> जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक:॥” (३/१/२) इति।

तत्र च जुष्टमिति पदस्य व्याख्यायां शङ्कराचार्येण भाषितम् – “जुष्टं सेवितमनेकैर्योगमार्गै: कर्मिभिश्च यदा यस्मिन् काले पश्यति ध्यायमान:, अन्यं वृक्षोपाधिलक्षणाद्विलक्षणमीशम् - तदा वीतशोको भवति सर्वस्मात् शोकसागरात् विप्रमुच्यते कृतकृत्यो भवति” (३/१/२) इति। अत्र च स्पष्टमीश्वरसेवनात् मुक्तिर्घटते। सेवनञ्च यद्यपि बहुविधम्। तच्च स्पष्टमत्र

नोल्लिखितम्। तथापि शरणागतिरपि अत्र बोध्या तत्साधनत्वेनेति न केवलं श्रुतावपि न्यायप्रस्थानेऽपि आवेदितं यत् शरणागतिद्वारा अतीन्द्रियोऽपि परमात्मा प्रत्यक्षीकर्तुं शक्यत इति। तथाच "अपि च संराधने प्रत्यक्षानुमानाभ्याम्" इति सूत्रभाष्ये शङ्कराचार्येण भाषितम् – "अपि चैनं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्ति योगिनः। संराधनं च भक्तिध्यानप्रणिधानाद्यनुष्ठानम्" इति। तत्र च यद्यपि योगदर्शने भक्तिविशेषः परमेश्वरे सर्वकर्मफलत्यागो वा तदर्थत्वेन प्रणिधानं व्याख्यातं, तथापि रत्नप्रभाकरेण न्यायनिर्णयकृता च अत्र भक्तिध्यानाभ्यां प्रत्यगात्मनश्चेतसि प्रकर्षेण स्थापनमेवेश्वरप्रणिधानमिति व्याख्यातम्। किन्तु तत्र भक्तिध्याणप्रणिधाद्यनुष्ठानमि"त्यत्र आदिपदेन शरणागतिरपि विमृष्टेति नानुपपत्तिः। एवञ्च स्मृतिप्रस्थाने तु श्रीमद्भगवद्गीतायां प्रायः प्रत्यक्षरमेव तत्र प्रमाणम्। तथाहि "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज" इत्यादिपद्यं पदं पदं प्रमाणत्वेन प्रत्येतव्यमिति।

आर्हतमतम् – यद्यपि आर्हतीनां नये सर्वकर्मार्पणरूपा शरणागतिर्न स्पष्टतः वर्णिता, तथापि मोक्षघटकत्वेन

यत्रत्नत्रितयमावेदितं, तत्र आदिमं रत्नं सम्यग्दर्शनं कथञ्चित् भक्तिविशेषस्य आवेदकं भवति। तथाहि “तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्” (१/२) इति हि सूत्रम्। तत्र सम्यग्दर्शनं पुनर्द्विविधं नैसर्गिकाधिगमजभेदेन। तथाचोदितं – “तन्निसर्गादधिगमाद्वा” (२/३) इति। तथाहि अत्र व्याख्यायता स्वयमेव पूर्वपक्षं कुर्वता उक्तम् – “द्विविधं सम्यग्दर्शनमिति कल्पना नोपपद्यते। कुत:? अनुपलब्धतत्त्वस्य श्रद्धानाभावात्। कथम्? रसायनवत्। यथा अत्यन्तपरोक्षरसायनतत्त्वफलस्य न रसायने श्रद्धानं दृष्टम्। तथा अनधिगतजीवतत्त्वस्य न तत्र श्रद्धानमिति नैसर्गिकसम्यग्दर्शनाभाव: शूद्रवेदभक्तिवदिति चेन्न। वैषम्यात्। स्यादेतत् यथा शूद्रस्यानधिगतवेदार्थस्य वेदार्थ आत्यन्तिकी भक्ति: तथाऽनुपलब्धजीवादितत्त्वस्य श्रद्धानमिति तन्न किं कारणम्? वैषम्यात् युज्यते शूद्रस्य भारतादिश्रवणात्तज्ज्ञवचनानुवृत्त्यादिभिश्च वेदार्थभक्तिर्नासौ नैसर्गिकी इह तु नैसर्गिकी रुचिरिष्टेति वैषम्यम्। अथवा सम्यक्त्वाधिकारात् जीवादिपदार्थतत्त्वोपलब्धिपूर्वकेण सम्यग्दर्शनेन मोक्षकारणेनेह भवितव्यम्। न च शूद्रस्य तादृशं श्रद्धानमिति वैषम्यम्” इति। ततश्च प्रकृतेऽपि श्रद्धा भक्तिपर्य्यायेति नानुपपत्ति:।

तत्र च बौद्धमतम् – ताथागतानामपि नये त्रिविधा शरणागतिरावेदिता बुद्धधर्मसंघशरणभेदेन। तथाच एतदेव धम्मपदे बुद्धवर्गे आवेदितम् –

“बहुं वे सरणं यन्ति पव्वतानि वनानि च।
आरामरुक्खचेत्यानि मनुस्सा भतज्जिता॥
नेतं खो सरणं खेमं नेतं सरणमुत्तमम्।
नेतं सरणमागम्म सव्वदुखा पमुच्चति॥
यो च बुद्धञ्च धम्मञ्च सङ्घञ्च सरणं गतो।
चत्तारि अरियसच्चानि सम्मप्पञ्ञाय पस्सति॥
दुक्खं दुक्खसमुप्पादं दुक्खस्स च अतिक्कमं।
अरियञ्चट्ठङ्गिकं मग्गं दुक्खूपसमगामनं॥
एतं खो सरणं खेमं एतं सरणमुत्तमं।
एतं सरणं गम्म सव्वदुक्खा पमुच्चति॥” (१०-१४)

एतदेव अभिधर्मप्रदीपे चतुर्थेऽध्याये सुरगिरा आवेदितम् –

“बहव: शरणं याण्ति पर्वतांश्च वनानि च।
आरामांश्चैत्यवृक्षांश्च मनुष्या भयवर्जिता:॥
न चैतच्छरणं श्रेष्ठं नैतच्छरणमुत्तमम्।
नैतच्छरणमागम्य सर्वदु:खात्प्रमुच्यते॥

यस्तु बुद्धं च धर्मं च संघं च शरणं गत:।
चत्वारि आर्यसत्यानि पश्यति प्रज्ञया यदा॥
दु:खं दु:खसमुत्पादं दु:खस्य समतिक्रमम्।
आर्यं चाष्टाङ्गिकं मर्गं क्षेमं निर्वाणगामिनम्।
एतद्धि शरणं श्रेष्ठमेतच्छरणमुत्तमम्।
एतच्छरणमागम्य सर्वदु:खात् प्रमुच्यते॥" इति।

तत्र को बुद्ध:? इत्येतदुक्तम् – "अथ यदुक्तं – 'बुद्धं धर्मं संघं शरणं गच्छति' इति तत्के बुद्धादय:? तदिदमभिधीयते – "विगतावरणे ज्ञाने बुद्धोक्तेर्मुख्यकल्पना तदाश्रये फले चापि विज्ञेया गुणकल्पना " इति।

ननु धर्मं शरणं गच्छति इत्यत्र कोऽयं धर्म:? तदुक्तम् – "शाश्वतत्वशुभत्वाभ्यां सर्वानर्थनिवृत्तित: मुख्यकल्पनया तद्धर्मो निर्वाणमुच्यते" इति। अत: "नित्याविकृतस्वलक्षणे धारणातत्तत्प्राप्तानां चात्यन्तधारणे निर्वाणं पारमार्थिको धर्म: गुणकल्पनया तु प्रत्येकबुद्धबोधिसत्तसन्तानिको मार्ग: त्रीणि च पिटकानि धर्मो निर्वाणप्रापकत्वात्" इति। एवञ्च कोऽयं संघ:? तदुच्यते – "आर्या: शिष्यगुणा: संघस्तथैव परमार्थत:"

इति। तद्व्याख्यायाञ्च तत्रैव व्याख्यातम्– “नवानामशैक्षाणामष्टादशानाञ्च शैक्षाणां शिष्याणां सन्ताने यो मार्ग: स पारमार्थिक: संघ इत्युच्यते, संवृत्या तु पृथग्जनकल्याणकभिक्षुसंघ इत्यपदिश्यते” इति। तदेतत् शरणत्रयं तथागतधर्मे आवेदितम्। तथाच तत्रत्यसिद्धान्त: - “एतान्यो याति शरणं स याति शरणत्रयम्” इति।

शिखधर्मे – गुरुग्रन्थसाहेवग्रन्थे प्रतिपदमेव शरणागतिरावेदितेति किमुत वक्तव्यम्। तथाहि तत्र रागमाझे गुरुशरणमावेदितम् –

> “ऐथे तू है आगे आपे।
> जी जन्त्र सभि तेरे थापे॥
> तुधु विनु अव्रु न कोइ।
> करते मै धर ओट तुमारी जीउ॥”(माझमहलायाम्- ५/१) इति।

तथाहि अत्र इहलोकेऽपि त्वं तत्र अमुत्र अपि त्वम्। जीवजन्तवोऽपि सर्वे त्वया एव स्थापिता:। विना त्वां नापरमस्तीति, त्वमेव मे आधार:। त्वमेव मे शरणमिति हे

प्रभोरिति तदर्थ:। एतच्च प्राय: प्रतिपदमेव सुप्रापमिति शरणागतिस्तेषामपि दर्शने प्रतिपादितेति बोध्यमिति।

किञ्च मोहम्मोदीयदर्शनेऽपि एतत्सुलभमेव। तत्रापि आल्लाहं विना नास्ति परं तत्त्वम्। स एव सृष्टिस्थितिपालनकर्तेति मतम्। प्रत्येककर्मण: समारम्भात् प्रागेव तच्छरणं लभ्यते। तथाच तत्र तत्र विस्मिल्लाहि हेररहमानिर्-राहिम् इति पठ्यते। तथाहि आल्लाहनाम्नैव एतत्कर्म आरभ्यते, एतत्कर्म तत्साहाय्येनैव आरभ्यते, अन्यथा एतस्य कर्तुमशक्यत्वात् तन्नाम्नैव एतत्कर्मण: फलं शुभं प्राप्स्येतेति अर्थत्रितयमस्येति तदर्थ:।

किञ्च आल-फातिहासुरामध्ये सप्तमे आयाते उच्यते – "वयं तवैव उपासनां कुर्महे, केवलं तवैव साहाय्यं प्रार्थयामहे अस्मभ्यस्त्वं सरलं मार्गं प्रदर्शय" (४-६) इति। किञ्च आल्-आनाम् इति सुरायाम् पठ्यते यत्, "मम आराधनं मम त्याग: तथा मम जीवनं मरणमपि विश्वप्रतिपालकस्य आल्लाहस्य कृते एवेति" (१६२) इति। किञ्च आल्-मुयाम्मिल इति सुरामध्ये पठ्यते यत्, - "त्वं मम पालकस्य नाम स्मर तथा एकाग्रेण चेतसा तत्र समर्पय" (८) इति। एतेन नेदं नूत्नं

तत्त्वमिति बोध्यम्। ततश्च गीतामते समेषामेव निर्विशेषतया शरणागतिरेव सरलः पन्थाः संसृतिपथिकानामिति भूतैर्भाव्यमिति शम्।

# शाम्बपुराणे अलंकारविमर्शः – एका समीक्षा

**ड. शिउलिवसुः**
सहकारिणी अध्यापिका यादवपुरविश्वविद्यलयस्य

**(*निबन्धनिर्यासः*-**

उपपुराणसाहित्ये शाम्बपुराणस्य महत् स्थानमुपलभ्यते। आर. सि. हाजरा महोदयेन उपपुराणानां याः तालिकाः प्रस्तुताः कृताः, तासु तालिकासु शाम्बपुराणस्य अस्तित्वं लक्ष्यते। पुराणसमूहाः सामाजिकदृष्ट्या, धर्मीयदृष्ट्या, ऐतहासिकदृष्ट्या प्रायः व्याख्याताः जाताः पण्डितैः, परन्तु पुराणानां तथा उपपुराणानां साहित्यिकमूल्यं शब्दसौन्दर्यं विस्तृतरूपेणाद्यापि न आलोचिताः। तस्मात् हेतोः अस्मिन् प्रबन्धे आलोचनार्थं शाम्बपुराणमिति उपपुराणं मया निर्वाचितम्। कृष्णपुत्रः शाम्ब एकदा कृष्णेण अभिशप्तः सन् कुष्ठरोगेण आक्रान्तः अभवत्। परन्तु सूर्यस्तूतेः परं कुष्ठरोगात् मुक्तः अभवत्। तस्याः गाथायाः उपस्थापनकाले बहवः विषयाः, यथा दार्शनिकभावना, तन्त्रालोचना, ऐतिहासिक-विषयाः इत्यादयः। भाषायाः अलङ्करणं सौन्दर्य्यं वा विषयवर्णनया अलंकारप्रयोगेण वा बहुत्वं वर्धते। अस्मिन् विषये शाम्बपुराणमवलम्ब्य प्रबन्धोऽयं विरचितं मया।।)

संस्कृतसाहित्ये उपपुराणानि बहुनि विद्यन्ते। महापुराणानां विविधाः विषयाः बुधैः अद्यापि आलोचिताः। परन्तु उपपुराणविषये पण्डितानां प्रभूता आलोचना न दृश्यन्ते। आर. सि. हाजरा महोदयेनोक्तं यद् पाश्चात्य-पण्डिताः यथा H. H. Wilson महाभागाः, M. Winternitz महाभागा अपि च प्राच्यपण्डितः हरप्रसादशास्त्री महाभागाः उपपुराणमाश्रित्य अत्यल्पं कथितवन्तः।[1] आर. सि. हाजरा महोदयेन तदीये ग्रन्थे (STUDIES IN UPAPURĀṆAS) उपपुराणानां बहवः तालिकाः प्रस्तुताः कृताः। तेषु सर्वेषु उपपुराणेषु शाम्बपुराणस्यास्तित्वं परिलक्ष्यते। पुराणसमूहाः सामाजिकदृष्ट्या, धर्मीयदृष्ट्या, ऐतहासिकदृष्ट्या प्रायः व्याख्याताः जाताः पण्डितैः, परन्तु पुराणानां तथा उपपुराणानां साहित्यिकमूल्यं शब्दसौन्दर्यं विस्तृत-रूपेणाद्यापि न आलोचिताः अभवन्। अष्टमशतके आचार्य्येण वामनेन 'काव्यालंकारसूत्रवृत्ति' इति ग्रन्थे उक्तम् - "सौन्दर्यमलंकारः"[2]।

ग्रन्थस्थितः विषयः यदि सहृदयानामानन्दोत्पादने समर्थः भवति, तर्हि स ग्रन्थः सौन्दर्यमण्डित अलंकारशोभितः वेति कथ्यते। शाम्बपुराणं कृष्णपुत्रं शाम्बमवलम्ब्य

विरचितम्। स शाम्बः एकदा पित्रा कृष्णेन अभिशप्तोऽभवत्, अपि च कुष्ठरोगाक्रान्तः अभवत्, देवर्षिः नारदः तं शाम्बं शापमुक्तये सूर्योपासनां कर्तुं निर्दिदेश। अतः सूर्यस्तुतिरेव अस्य उपपुराणस्य मूलीभूतं विषयम्। सूर्यस्य माहात्म्यं विविधैः देवैः गीतं कथितं वा, कदा देवर्षिणा नारदेन, कदा वा ब्रह्मणा, कदा ऋषिणा वशिष्ठेन, सूर्यस्य विविधानि रूपाणि वर्णितानि जातानि, इमे वर्णनासमूहाः प्रायः श्रव्यकाव्यस्य वर्णणावत् प्रतीयते। श्रव्यकाव्ये नगरार्णवशैलर्त्तुचन्द्रादीनां वर्णना दृश्यते। काव्यतत्त्वविद्भिः यथा दण्डिणोक्तम् –

नगरार्णवशैलर्त्तुचन्द्रार्कोदयवर्णनैः
उद्यानसलिलक्रीडामधुपानरतोत्सवैः,
विप्रलम्भैः विवाहैश्च कुमारोदयवर्णनैः,
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि
अलंकृतमसंक्षिप्तं रसभावनिरन्तरम्।।[3]

वर्णितविषयस्य सौन्दर्यवर्धनाय पदानां सुष्टु प्रयोगः आवश्यकः। अस्मिन् विषये शास्त्रकारैः बहुधाः व्याकृताः, आचार्य्येण दण्डिनाऽप्युक्तं सुप्रयुक्ता वाणी अभीष्टसिद्धिदायका।

गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति।।[4]

शाम्बपुराणेषु वर्णनासौकर्येण बहवः पंक्तयः अलंकृताः जाताः, यथा भिन्नेषु ऋतुषु सूर्यस्य विचित्रं रूपं ग्रन्थकारेण वर्णितम्। प्रसादगुणमण्डिते अस्मिन् श्लोके सूर्यस्य वर्णशोभा कथिताऽत्र।

"वसन्ते कपिलः सूर्यो ग्रीष्मे काञ्चनसन्निभः
श्वेतो वर्षा सुवर्णे न पाण्डुः शरदि भास्करः
हेमन्ते ताम्रवर्णस्तु शिशिरे लोहितो रविः।।"[5]

पुनः भिन्नेषु मासेषु सूर्यः पृथक् नाम्ना अभिधीयते। तेन नाम्ना सह मासस्य कुत्रापि सुसम्बन्धः परिलक्ष्यते।

इन्द्राख्यश्चाश्विने मासे धाता भवति कार्तिके।
मार्गशीर्षे तपेन्मित्रः पौषे पूषा दिवाकरः।।[6]

अत्र ध्वनिमाधुर्यमस्ति, तद् विनाऽपि 'पौषे पूषा दिवाकरः' इत्यंशविशेषे नाम्ना सह मासस्य सम्बन्धः तात्पर्यवहः। अपि च वायुवद् सलिलवद् अग्निवद् सूर्योऽपि विविधैः रूपैः सज्जितः भवति, सादृश्यमुखेन तदेव वर्णितं ग्रन्थकारेण।

सादृशेयप्रयोगेन वर्णितस्य सौन्दर्य्यं बहुधा वर्धते, तस्य निदर्शनं शाम्बपुराणेऽपि परिलक्ष्यते। यथा शाम्बपुराणस्य ऋषिः उक्तवान् –

नभसः पतितं तोयं याति तोयान्तरं यथा।
भूमेरथ विशेषेण तथा गुणवशात्तु सः।।
यथा दिव्यविशेषाद्वा वायुरेकः पृथग्भवेत्,
दुर्गन्धा वा सुगन्धो वा तथा गुणवशात्तु सः।
यथा वा गार्हपत्योऽग्निरन्यत संज्ञान्तरं व्रजेत्
दक्षिणाहवनीयादिब्रह्माादिषु तथा ह्यसौ।।[7]

अत्र उपमेयः सूर्यः उपमानरूपेण तोय-वायु-अग्नि-इत्यादयः चित्रिताः, अपि च उपमेयोपमानयोः व्याख्याने 'एकं सद्विप्रा बहुधा वदन्ति' इति वेदस्थितभावनायाः प्रकाशः भवति।

अत्र सूर्य्यः सादृश्यवशात् तोयेन सह वायुना सह अग्निना सह सम्बन्धयुक्तः जातः, अपि च सूर्यस्य पितृरूपकल्पनाद् सोमस्य चन्द्रस्य वा मातृरूपकल्पनाद् उपमायाः सौकर्यं बहुधा वर्धते। पितरौ यथा मनुष्यानां जन्तुनां वा पालनकर्तारौ भवतः, तथैव सूर्यचन्द्रमसौ देवतानां पालनकर्तारूपेण चित्रितौ इति भावः।

स्वदोहकाले संप्राप्ते वत्सं दृष्ट्वा यथा च गौः
स्वांगादिव क्षरेत्क्षीरं तथेन्दुः क्षरतेऽमृतम्।
पितेव सूर्यो देवानां सोमो मातेव लक्ष्यते
मातुस्तनं यथा पीत्वा तृप्यन्ते सर्वजन्तवः
पीत्वामृतं तथा सोमे तृप्यन्ते पितृदेवताः।[8]

न केवलमत्र, अपि च बहुषु स्थानेषु सादृश्यप्रयोगस्य निदर्शनं लक्ष्यते, तुल्यार्थकः 'निभः' इत्यस्य पदस्य सुप्रयोगोऽपि अस्मिन्नुपपुराणे दृश्यते।

य एष मण्डले ह्यस्मिन्पुरुषो दीप्यते महान्।
एष साक्षान्महादेवो वृत्तं कुम्भनिभः शुभः।।[9]

सादृश्यमूलकेषु अलंकारेषु रूपकमन्यतमम्, आचार्य्येण विश्वनाथेनोक्तम् –

'रूपकं रूपितारोपाद् विषये निरपह्नवे'[10]

अर्थात् निरपह्नवविषये रूपितस्य उपमानस्य आरोपाद् रूपकालङ्कारः भवति।

शाम्बपुराणानां बहुषु स्थानेषु रूपकालंकाराणां प्रयोगाः परिलक्ष्यन्ते, विश्वकर्मणा सूर्यस्तुतिकाले तिमिरासव

इत्यस्य प्रयोगः अतुलनीयः अत्र तिमिरः उपमेयः अर्थात् तिमिरस्योपरि आसव इति उपमानस्य आरोपः भवति।

तवतिमिरासवपानमदाद्भवति
विलोहितविग्रहिता।
मिहिरविभामि यतः सुतरां

त्रिभुवनभावन तीक्ष्णकरैः।।[11]

अत्र सूर्यस्य कार्यद्वयं व्याख्यातं भवति, यथा अन्धकारदूरीकरणमपि च तीक्ष्णकिरणैः त्रिभुवनै आलोकप्रदानम्। तिमिरासवपाने सूर्यः स्वयं विलोहितः भूत्वाऽपि त्रिभूवनस्य मण्डलं करोति आलोकप्रदानेन, तस्मात् कारणात् ग्रन्थाकरेणोक्तम् – 'जगति विभासि तमांसि नुदन्' (13/7)। 'तिमिरासव' इत्यस्मिन् पदे रूपकस्य प्रयोगहेतोः मण्डलमस्य सूर्यस्य शोभा भुयः वर्धते।

अपि च "वृष्णिसिंहाय शोकसागरात् च इति पदेषु रूपकाणामस्तित्वं सुस्पष्टम्।

एवं दत्वा वरं तस्मै वृष्णिसिंहाय भास्करः।
प्रत्यक्षदर्शनं दत्वा तत्रेवान्तरधीयत।
पठेदिद्वज इदं स्तोत्रं त्रिकालं भक्तिमान्नरः

नारी वा दुःखशोकार्त्ता मुच्यते शोकसागरात्।।[12]

अत्रापि शोकरूपे उपमेये सागर इति उपमानस्य आरोपाद् रूपकालंकारः भवति।

रूपकेण सह व्यातिरेकालंकारस्य युगपद् उपस्थितिः दृश्यते कुत्रापि, व्यातिरेकालंकारस्य लक्षणविषये विश्वनाथेनोक्तं साहित्यदर्पणे ग्रन्थे –

आधिक्यमुपमेयस्योपमानान्न्युनताऽथवा[13]

सूर्यमण्डलस्याश्वं वर्णयितुं ग्रन्थकारेणोक्तं यद् –

यदेतन्मण्डलं शुक्लं दिव्यं ह्यजरमव्ययम्।
युक्तं मनोजवैरश्वैर्हरितैर्ब्रह्मवादिभिः।।[14]

अत्र 'मनोजवै' इत्यत्र रूपकालंकारः विद्यते, अपि श्लोकमध्ये उपमानभूतात् मनसः उपमेयभूतस्य सूर्याश्वस्य आधिक्यसूचनात् व्यातिरेकः भवति। अपि च आदित्यं त्रैलोकस्य चक्षुरूपेण कल्पनाद् उत्प्रेक्षालंकारस्य भावः दृश्यते। उत्प्रेक्षालंकारे एककोटिकः संशयः भवति। तत्र उपमेयं उपमानरूपेण (उत्कटा) ईक्षा भवति, अत्रापि

उपमेयभूतमादित्यं उपमानभूतेन त्रैलोकस्य चक्षुरूपेण ईक्षा भवति।

आदिरेव हि भूतानामादित्य इति संज्ञितः।
त्रैलोक्यचक्षुरेषोऽत्र परमात्मा प्रजापतिः।।[15]

प्रसङ्गक्रमेणोल्लेखनीयमुत्प्रेक्षायाः लक्षणं साहित्यदर्पणे यथा – भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना[16]

एककोटिक-संशयं सम्भावनाऽपि कथ्यते। सन्देहालंकारे उभयकोटिकसंशयः भवति, यथा – स्थानुर्वा पुरुषो वा।

कदापि देवतासमूहाः विविधवत्सररूपेण ग्रन्थकारेण वर्णिताः, अनेन कथनेन उपमेयभूताः देवतासमूहाः उपमानभूताः वत्सरसमूहाः चेत्यनयोरभेदप्रतिपादनात् रूपकालंकारः भवति।

संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः।
इड्वत्सरस्तृतीयश्च चतुर्थस्त्वनुवत्सरः।।
पञ्चमो वत्सरस्तेषां वायुश्चैवानुवत्सरः।
तेषु संवत्सरो ह्यग्निः सूर्यस्तु परिवत्सरः।।
सोमः इड्वत्सरस्तेषां वायुश्चैवानुवत्सरः।

रुद्रस्तु वत्सरो ज्ञेयः पश्चाद्वायोर्युगात्मकाः।।[17]

शब्दालंकारेषु अनुप्रासः मुख्यतमः, तस्यालंकारस्य विषये आचार्य्येण विश्वनाथेनोक्तम् –

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।[18]

अस्य लक्षणस्य प्रतिफलनमेव दृश्यते यथा –

"मगाश्च मामगाश्चैव मानसा मन्दगास्तथा
मगा ब्राह्मणभूयिष्ठा मामगाः क्षत्रियास्तथा।

अथवा

मामेव ते च ध्यायन्ति मां जपन्ते च नित्यशः
मद्भावना मम परा मद्भक्ता मत्परायणाः।[19]

अत्र म-प इति वर्णद्वयस्य श्लोकमध्ये पुनः पुनः प्रयोगहेतोः अनुप्रासालंकारः भवति। अत्र स्वरवर्णस्य वैसादृश्येऽपि व्यञ्जनवर्णानां सादृश्यात् अनुप्रासालंकारः भवति।

ब्रह्मणा सूर्यस्तवकाले वृत्त्यनुप्रासः प्रकाशितः भवति। यथा –

नमस्तमःपटलपटावपटिने[20]

अत्र पश्च टश्च इत्यनयोः वर्णयोः पुनरुच्चारणत्वात् अनुप्रासः भवति।

कदापि अलंकारं विनाऽपि शब्दप्रयोगस्य माधुर्य्यात् सौन्दर्यं वर्धते। तस्य निदर्शनमपि शाम्बपुराणे दृश्यते। यथा ग्रहसमूहानां वर्णनाकाले 'ऊर्ध्व' इति पदस्य पुनः पुनः प्रयोगात् विषयवस्तुः स्रगिव सज्जितः भवति। अत्रापि अनुप्रासः अस्ति । यथा –

नक्षत्रेभ्यो बुधस्तूर्ध्वं बुधादूर्ध्वं तु भार्गवः।
तस्मादङ्गारकश्चोर्ध्वं तस्माच्चोर्ध्वं वृहस्पतिः।
तस्माच्छनैश्चरश्चोर्ध्वं तस्योर्ध्वमृषिमण्डलम्।।[21]

अनुरूपभावेन 'ततः' तस्मात् वा शब्दप्रयोगात् विषयवस्तुः अतीव रमणीयः भवति।

ततस्त्वण्डकपालं तु तस्माच्च परतस्तमः।
ततोऽग्निर्वायुराकाशं ततो भूतादिरुच्यते।
ततो महान्प्रधानं च प्रकृतिः पुरुषस्ततः।
पुरुषादीश्वरो ज्ञेय ईश्वरेणावृतं जगत्।[22]

उपरि लिखितमुदाहरणद्वयं मालावत् सज्जितं भूत्वाऽपि अत्र मालोपमा न भवति, न वा अत्र मालारूपकमस्ति, न वा

माला निदर्शना भवति। तथापि इमे श्लोकाः श्रवणसुखकराः भवन्ति।

संस्कृतालंकारशास्त्रे मालोपमा माला-रूपकं वा माला निदर्शना इत्येतेषां प्रयोगाः दृश्यन्ते। प्रसङ्गक्रमेण कथनीयं विश्वनाथप्रदत्तं मालोपमायाः लक्षणं यथा –

मालोपमा यदेकस्योपमानं बहु दृश्यते[23]

उदाहरणं यथा –

वारिजेनेव सरसी शशिनेव निशीथिनी
यौवनेनेव वनिता नयेन श्रीर्मनोहरा।

मालारूपकस्योदाहरणं साहित्यदर्पणे प्रदर्शितं यथा –

मनोराजस्य सितातपत्रं
श्रीखण्डचित्रं हरिदङ्गनायाः
विराजते व्योमसरः सरोजं
कर्पूरपूरप्रभ-मिन्दुविम्बम्।।[24]

अत्र मनोजादे राजत्वाद्यारोपश्चन्द्रविम्बस्य सितात-पत्रत्वाद्यारोपे निमित्तम्।

तत्र साहित्यदर्पणे माला-निदर्शनायाः उदाहरणं दीयते विश्वनाथेन यथा –

क्षिपसि शुकं वृषदंशकवदने
मृगमर्पयसि मृगादनरदाने।
वितयसि तुरगं महिषविषाणे
निदधच्चेतो भोगविताने।।[25]

अत्र मालावत् विम्बप्रतिविम्बताक्षेपं भवति।

कुत्रापि चतुर्थीविभक्तेः सुष्टुप्रयोगात् वर्णितः विषयः काव्यगुणमण्डितः भवति। अस्य पुराणस्य बहुषु स्थानेष्वस्य प्रकाशं दृश्यते। तन्मध्ये उल्लेखयोग्यं यथा –

पावनाय शुचिपुण्यकर्मणे
नैककामविषयप्रदायिने
भास्वरामलयमुखमालिने
सर्वलोकहितकारिणे नमः।[26]

अत्र न केवलं चतुर्थीविभक्तिप्रयोगजनितं सौन्दर्य्यं वर्तते, अपि च अन्त्यवर्णानां उच्चारणसादृश्यात् श्रुतिमाधुर्य्यं विशेषेण प्रकाशितं भवति।

अर्थात् कस्यापि ग्रन्थस्य सौन्दर्यवर्धनाय अलंकरणाय अलंकारसमूहाः समर्थाः भवन्ति। तद्वद् केनाप्युपायेन ग्रन्थप्रतिपाद्यविषयः अलंकृतः भवितुं शक्यते। शाम्बपुराणे विषयेण सह सायुज्यपूर्णाः शब्दाः यथा विराजन्ते तथैव शब्दाश्रिताः अलंकाराः अर्थाश्रिताः अलंकाराः च शोभन्ते। अपि च सर्वेषु श्लोकेषु प्रसादगुणविद्यमानत्वात् अर्थस्य वैमल्यत्वं अनुभूतं भवति। तेषां प्रतिपादनाय प्रबन्धोऽयं विरच्यते।

अलमति विस्तरेण।।

## References

1. The work done by scholars on the Upapurāṇas is very meager and scarcely deserves any serious mention. H. H. Wilson, who in his essay analytical, critical and philosophical and in the preface to his translation of the Viṣṇu-Purāṇa says much on the Purāṇas, devotes only about five pages to the Upapurāṇas…; Haraprasad Shastri’s treatment of some of the Upapurāṇas in the preface (pp. CCXV) to his descriptive catalogue of Sanskrit manuscripts in the collections of the Asiatic Society of Bengal, M. Winternitz devotes on the whole about seven pages to the treatment of only a very few of the Upapurāṇas in the History of Indian Literature. (R.C. Hazra ‘Studies in The Upapurāṇas, chapter – 1, p. 1)

2. वामनाचार्य्यः, काव्यलंकारसूत्रवृत्तिः, १/१/२

3. काव्यादर्शः, १/१५, १६, १७

4. Loc. Cit. १/६
5. शाम्बपुराणम्, ८/१२
6. Loc. Cit. ९/७
7. Op. cit. ९/४९, ५०, ५१
8. Ibid. २३/ २५, २६
9. Ibid. २४/१३
10. साहित्यदर्पणः, दशमपरिच्छेदः
11. शाम्बपुराणम्, १३/८
12. Ibid. २४/ ३३-३५
13. साहित्यदर्पणः, दशमपरिच्छेदः
14. शाम्बपुराणम्, २४/८
15. Ibid. २४/९
16. साहित्यदर्पणः, दशमपरिच्छेदः
17. शाम्बपुराणम्, १८/ ३६, ३७, ३८
18. साहित्यदर्पणः, दशमपरिच्छेदः
19. शाम्बपुराणम्, २६/३०, ३४
20. Ibid. १३/३
21. Ibid. १८/४९, ५०
22. Ibid. १९/ ८, ९
23. साहित्यदर्पणः, दशमपरिच्छेदः

24. Loc. Cit.

25. Op. cit.

26. शाम्बपुराणम्, १३/४

## Bibliography

मूलग्रन्थाः (क)

शाम्बपुराणम् । सम्पा. भि. सि. श्रीवास्तवः । दिल्ली: परिमल पावलिकेशन, २०१३ । मुद्रितः ।

मूलग्रन्थाः (ख)

दण्डी । काव्यादर्शः । सम्पा. चिन्मयी चट्टोपाध्यायः । कलिकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षत्, १९९५ । मुद्रितः ।

वामनः । काव्यालंकारसूत्रवृत्तिः । श्रीगोपेन्द्रतिप्पभूपालस्य कामधेनु व्ख्याख्या सहितः । परिशोधनकारः कृष्णसूरिः । श्रीरङ्गनगरः : श्रीवाणीविलासमुद्रणालयः । १९०९ । मुद्रितः ।

विश्वनातः । साहित्यदर्पणः । सम्पा. गुरुनाथविद्यानिधि भट्टाचार्य्यः धीरेन्द्रनाथ भट्टाचार्य्यः च । कलिकाता: संस्कृत वुक डिपो । १३३१ । मुद्रितः ।

सहायकग्रन्थः -

Hazra, R. C. Studies In The Upapurāṇas, Vol – I. Calcutta: 1958. Print.

# अभिधावृत्तिमातृकायामभिधाशक्तेर्विचारः

**ड. शुभ्रजित्सेनः**

सहायकाध्यापकः गौडवङ्गविश्वविद्यालयस्य

(*निबन्धनिर्यासः*-

नवमशतकीयेन काश्मीरवास्तव्यमुकुलभट्टेन विरचितः 'अभिधावृत्तिमातृकेति' शब्दशक्तिविषयकः कश्चन दुरूहोऽलंकारो ग्रन्थः। शब्दशक्तिविषये विविधैः प्राज्ञैरालंकारिकैः इतःपूर्वं बहवो ग्रन्था विरचिताः। परन्तु केवलशक्तित्वेन अभिधायाः प्रतिष्ठा कृता दृश्यते मुकुलभट्टेन इह अभिधावृत्तिमातृकेति ग्रन्थे। ग्रन्थेऽस्मिन् लक्षणा व्यञ्जनेति शक्तिद्वितयम् अभिधान्तर्गतमिति प्रतिभाति। अभिधायाः प्रथमार्थः मुख्यार्थः, तद्भिन्नाः सर्वे अमुख्यार्थाः। मुख्यार्थसहायेन अभिधाव्यापारः अमुख्यार्थम् अवगमयति। अभिधायाः दश भेदाः, चत्वारो मुख्यार्थभेदेन षट् च अमुख्यार्थभेदात्। विवर्तमानमेतत् अभिधावृत्तम्। आचार्यो मुकुलभट्टः प्रथमतः अभिधायाः दश भेदान् व्याख्याय शब्दस्य पारमार्थिकं स्वरूपं चिन्तयित्वा निखिलम् अर्थजातं तत्सहायिकां शब्दशक्तिमपि तद्विवर्तनेन अङ्गीकरोति।)

**उपोद्घातः-**

शब्दो हि संसारस्यास्य शरीरधारिणां मानवानां सर्वव्यवहारस्याधारभूतः। संकेतेनैव मनोभावः प्रकटितो भवत्यपि अर्थस्य पूर्णा अभिव्यक्तिः शब्देनैव भवति। भारतीयचित्तनपरम्परायां शब्दविवेचनमतीव महत्त्व-पूर्णमास्ते।

वैदिकपरम्परानुसारं शब्दस्य उत्पत्तिः सृष्टेः प्रागेव भवतीति स्वीकृतम्। वैदिकसाहित्ये शब्दस्य वाणी अपौरुषेयरूपेण स्वीकृता। 'वाग्वै ब्रह्म च सुब्रह्म'(1), 'वागिति सर्वदेवाः'(2)इति, उत,

"सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते।
वाग् वै सम्राट् परमं ब्रह्म नैनं वाग्जहाति"(3)।।

इत्यादिषु वैदिकवाक्येषु वाणी ब्रह्मरूपेण उपवर्णिता।

शब्दस्य स्वरूपविषये तथा च तस्य उत्पत्तिविषये प्राचीनैर्महर्षिभिः सहस्रं वर्षेभ्यः पूर्वं ये सिद्धान्ताः गृहीताः, तच्चाद्य वैज्ञानिकं तथा प्रामाणिकमिति स्वीकृतम्।

वैयाकरणाचार्यस्य भतृहरिमते इह लोके न किमपि ज्ञानं वर्तते यच्च शब्दं विहाय नोत्पद्यते। तथाहि भर्तृहरिणा

शब्दाद्वैताख्यं नवीनप्रस्थानमेकं संस्थापितम्। अपि च दार्शनिकप्रवरोऽयं शब्दब्रह्म अस्यैव संसारस्य विवर्तरूपेण मन्यते। तदुक्तं तेन –

> ‘अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
> विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।’(4) इति

शब्दस्य विषये महाभाष्यकारेण पतञ्जलिनोक्तम् - ‘प्रतीतपदार्थको लोके ध्वनिः शब्द – इत्युच्यते। तद्यथा – शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं मानवकः इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः’(5) इति।

शब्दादर्थस्य प्रतीतिः सम्पद्यते। शब्दस्य व्यापारोऽयं शक्तिस्तथा वृत्तिर्नाम्नाभिधीयते। ननु शक्तिरियं वृत्तिः वेति कतिप्रकारका भवतीति विषये मतभेदो विद्यते। मुख्यतया अभिधा-लक्षणा-व्यञ्जनाभेदेन शब्दशक्तयः तिस्रः प्रकाराः। ‘तात्पर्यार्थोऽपि केषुचित्’ इति मम्मटः।

काव्यादर्शप्रणेता दण्डी दण्ड्यति मण्डयति च शब्दतत्त्वं निजवाग्वैभवेन । तद्यथा ---

> ‘इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।

वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।।
इदमन्धं तमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।'(6)

शब्दाद् अर्थसंप्रत्ययस्तथा चार्थसंप्रत्ययाच्च लोकव्यवहारः प्रवर्तते। शब्दो हि भावाभिव्यक्तेरुत्कृष्टतमं साधनमस्माकम्। लोकेऽस्मिन् यावन्तोऽर्थास्तावन्तः शब्दाः। तस्मादेव तत्रभवता वैयाकरणेन भर्तृहरिणोक्तम् –

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुबिद्धमिव ज्ञानं सर्वं शब्देन भासते।।'(7)

शब्दस्य स्वरूपं किमिति विषये दार्शनिका विवदमाना दृश्यन्ते। केचिच्छब्दं द्रव्यमिति कथयन्ति, केचिच्च गुणम्, गुणत्वेऽपि केचन नित्यमपरेऽनित्यमाहुः। आकाशगुणो हि शब्दो विभुर्नित्योऽभिव्यक्तिधर्मक इति प्राभाकरं दर्शनम्। श्रवणेन्द्रियजन्यं लौकिकप्रत्यक्षं शब्द इति वैशेषिका आमनन्ति।

शब्दश्रवणेनार्थबोधो भवति इति सर्वजनविदितम्। शब्दार्थयोर्मध्ये विद्यमानो नित्यः सम्बन्धः महर्षिणा जैमिनिनाङ्गीकृत – 'औत्पत्तिकस्तु शब्दस्यार्थेन

सम्बन्धः।'[8] सूत्रस्यास्य व्याख्यायां भाष्यकाराः शब्दार्थयोः नित्यसम्बन्धमङ्गीचक्रुः। अत्र औत्पत्तिकशब्दस्य नित्यः इत्यर्थः। तथाहि शवरस्वामिना तद्भाष्ये भाषितम् – 'औत्पत्तिक इति नित्यं ब्रूमः। उत्पत्तिर्हि भाव उच्यते लक्षणया। अवियुक्तः शब्दार्थयोर्भावः सम्बन्धो नोत्पन्नयोः पश्चात् सम्बन्धः'[9]। महाकविना कालिदासेन 'रघुवंशम्' इति महाकाव्यस्य प्रथमे श्लोके 'वागर्थाविव सम्पृक्तौ' इत्यनेन शब्दार्थयोर्नित्यः सम्बन्धोऽङ्गीकृतः।

नैयायिकाः वैशेषिकाश्च शब्दार्थयोः स्वाभाविकं सम्बन्धं न स्वीकुर्वन्ति। परन्तु तैरपि तयोः सामयिकसम्बन्धः स्वीक्रियते। पतञ्जलि-भर्तृहर्य्यादिवैयाकरणाः शब्दार्थयोः मध्ये तादात्म्यसम्बन्धम् अङ्गीचक्रुः। अपि च, पातञ्जलभाष्ये भणितम् –'संकेतस्तु पद-पदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थः, योऽर्थः स शब्द इति।'[10]

शब्दार्थयोः सम्बन्धो नित्योऽनित्यस्तादात्म्यरूपो वेति नास्ति सर्ववादिसम्मतं मतम्। शब्दश्रवणेन योऽर्थबोधो भवति, तं प्रति शब्द एव कारणम्। कारणे सति कार्यमवश्यमेव स्यात्। अत्र शब्दस्यार्थबोधायानुकूलः कश्चन

व्यापारोऽस्ति। शब्दस्य व्यापारोऽयमाचार्यैर्वृत्तिरित्यभि-धीयते। आचार्याः मन्यन्ते यत् यदा एकस्यार्थस्य साहाय्येनापरार्थस्य प्रतीतिर्भवति, तदा वृत्तिरियं भवत्यर्थगता।

केचनाहुः यद्वृत्तिरियं चतुर्विधा। तद्यथा – अभिधा, लक्षणा, व्यञ्जना, तात्पर्य्यञ्चेति। केचनापि कथयन्ति – केवलयाभिधया सर्वे अर्थाः निर्णीयन्त। अतः लक्षणादिवृत्तिस्वीकारेण नास्ति प्रयोजनम्। ते अभिधाया अंशतया लक्षणामङ्गीकुर्वन्ति। एते एकवृत्तिवादिनः। आचार्यो मुकुलभट्टः तेष्वालंकारिकेष्वन्यतमः। मुकुलभट्टेनाभिधावृत्तिमातृकायां कथितं यल्लक्षणा अभिधान्तर्गता।

सुप्रसिद्धस्य काश्मीरवास्तव्यस्य महिमभट्टस्य नये, शब्दस्य कश्चन व्यापारः वर्तते। महिमभट्टः केवलामभिधां वृत्तित्वेन गृहीतवान्। अभिधाव्यतिरिक्ते स्थले अर्थबोधोऽनुमित्या भवतीति तन्मतम्। अन्यैरङ्गीकृताः लक्षणपदवृत्तयः महिमभट्टस्य नये अनुमितेः अन्तर्गताः। तथाहि श्रीमता कान्तिचन्द्रपाण्डेमहोदयेन ‘Indian Aesthetics’ इति ग्रन्थे स्पष्टरूपेण उक्तम् - ‘Mahima Bhaṭṭa holds that words have only one power, that of

arousing the Conventional meaning; accordingly they have only one function. Other functions, such as that of arousing the suggested, on more correctly, the inferred meaning belong to the meaning only and not to the word.'(11) इति।

व्यक्तिविवेककारो महिमभट्टः लक्षणा अनुमितेः अन्तर्गता इति मन्यते। तथाहि वक्तुं शक्यते यन्महिमभट्टनये लक्षणायाः स्वतन्त्रमस्तित्वं नास्ति। 'Indian Aesthetics' इति ग्रन्थे उक्तम् - 'Mahima Bhaṭṭa includes the secondary meaning (Gauṇa or Lākṣanika Artha) in the inferable (Anumaya). Accordingly he demises the second power of words, technically Called Lakṣaṇā.' (12)

मुकुलभट्ट-महिमभट्टयोः मध्ये पार्थक्यं वर्तते। मुकुलभट्टः लक्षणायाः अस्तित्वं स्वीकृत्य अभिधायां तस्या अन्तर्भावं साधितवान्। किन्तु महिमभट्टेन लक्षणाया अस्तित्वमपि न स्वीक्रियते।

अन्ये आचार्याः अभिधायाः पृथग्रूपेण लक्षणावृत्तिं गृहीतवन्तः। तात्पर्यसम्बन्धे विवदमानयोः पक्षयोर्मध्ये परस्परविरोधिवादद्वितयं संलक्ष्यते – अभिहितान्वयवादः अन्विताभिधानवादश्चेति। अभिहितानां पदोपस्थितार्थानां वा

मिथः अन्वयेन वाक्यार्थः प्रतिपादित इति कृत्वायम् अभिहितान्वयवादः। दुर्गाप्रसादेन साहित्यदर्पणटिप्पन्या-मुच्यते –

‘अभिहितानां स्वस्ववृत्त्या पदैरुपस्थापितानाम-र्थानामन्वयः इति ये वदन्ति तेऽभिहितान्वयवादिनः’ इति।

आचार्यो कुमारिलभट्टस्तथा च तदनुगामिनो मीमांसका अभिहितान्वयवादस्य समर्थकाः। प्राचीननैयायिकाः वैशेषिकाश्च अभिहितान्वयवादिरूपेण सुपरिचिताः। अभिहितान्वयवादिनां मते पदार्थ एव वाक्यार्थः। आचार्यो कुमारिलभट्टः अभिहितान्वयवादस्य प्रतिष्ठातृरूपेण प्रसिद्धः। किन्तु – तात्पर्यवृत्तिः नोल्लिखिता तेन। प्राचीनानां नैयायिकानां मते, पदगता अन्वयबोधजनिका काचन स्वरूपवती शक्तिर्विद्यते सा च शक्तिः तात्पर्यनाम्ना परिचीयते।

अन्विताभिधानवादिनो मते, शब्दस्य उच्चारणेनैव अर्थबोधो न भवति किन्तु यस्य कस्यापि पदस्य श्रवणमात्रेणैव इतरान्वितस्वार्थस्यानुभवो भवति। अर्थात् पदम् अन्वितार्थस्य अनुभावकं भवतीति हेतोः वादोऽयम्

अन्विताभिधानवादः। प्रभाकरास्तथा तदनुयायिनश्च मीमांसकाः अन्विताभिधानवादस्य समर्थकाः।

नैयायिकाः अभिधा लक्षणा चेति वृत्तिद्वयं स्वीकृतवन्तः। तेषां मते, अभिधा लक्षणा चेति वृत्तिद्वयं व्यतिरिच्य तृतीयार्थः अनुमित्यैव उपलब्धो भवति। अत एव व्यञ्जनावृत्तिस्वीकारेण नास्ति प्रयोजनम्।

मीमांसकानां मते, वृत्तिः त्रिविधा यथा – अभिधा, लक्षणा, गौणी चेति। तथाहि वेदान्तपरिभाषायाम् उक्तम् - 'पदार्थश्च द्विविधः – शक्यो लक्ष्यश्चेति' इति।

आलंकारिकाणां मते, गौणीवृत्तिः लक्षणायाः भेदमात्रम्। वैदान्तिका अपि वृत्तिविषये मीमांसकानां मतं स्वीकुर्वन्ति। तेषां मतेऽपि वृत्तिः त्रिविधा – अभिधा, लक्षणा, गौणी चेति। अद्वैतवैदान्तिकाः कुमारिलभट्टस्य सिद्धान्तं गृहीतवन्तः। कुमारिलभट्टेन लक्षणायाः पृथग्रूपेण गौणीवृत्तिः स्वीकृता। उपर्युक्तमतस्वीकारादद्वैतवैदान्तिकाः अपि स्वतन्त्रगौणीवृत्तेः समर्थकाः आसन् इति वक्तुं युज्यते। तच्च वैयाकरणानाञ्च मतानुसारि। वेदान्तपरिभाषायामुक्तम् -

'वाक्यजन्यज्ञाने चाकाङ्क्षा-योग्यता-आसत्तयस्तात्पर्य-ज्ञानञ्चेति चत्वारि कारणानि'(13) इति।

नागेशभट्टादयः विशिष्टवैयाकरणाः व्यञ्जनावृत्तेरस्तित्वं स्वीचक्रुः - 'सा वृत्तिस्त्रिधा – शक्तिर्लक्षणा व्यञ्जना च' इति। आचार्यस्य नागेशभट्टस्य मते, सर्वैः वैयाकरणैर्व्यञ्जनावृत्तिरङ्गीकर्तव्या।

वृत्तिविषये आलंकारिकानां मध्येऽपि मतपार्थक्यं वर्तते। आचार्यो धनिकस्तस्य 'काव्यनिर्णया'ख्ये ग्रन्थे व्यञ्जनावृत्तिं न स्वीकृतवान्। तन्मते, अभिधां लक्षणां च व्यतिरिच्य यो रसाद्यर्थो विद्यमानः, तात्पर्यवृत्त्या तज्ज्ञानं भवति। धनिकेन उच्यते यत्तात्पर्यवृत्तेः निर्दिष्टा सीमा नास्ति। प्रयोजने सति तात्पर्यवृत्तिः यं कमप्यर्थं प्रकाशयितुमलम्। तथाहि भणितम् काव्यनिर्णये - 'यावत् कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्' इति।

आनन्दवर्धनाद्यालंकारिकाः तात्पर्यवृत्तिं न स्वीकृतवन्तः। तेषां मतानुसारेण अभिधा-लक्षणयोः अगोचरेण योऽर्थोऽस्ति स व्यञ्जनावृत्त्या प्रकाशयोग्यः। मम्मटविश्वनाथादयः आचार्याः पुनः वृत्तिचतुष्टयं

स्वीकृतवन्तः - 'अभिधा-तात्पर्य्य-लक्षणात्मक-व्यापार-त्रयातिवर्त्ती ध्वननादिव्यापारोऽनपह्नवनीय एव' इति।

न केवलं संस्कृतभाषायाम्, अपि तु आङ्गलभाषायां शब्दार्थतत्त्वस्यालोचनाप्रसङ्गेन वृत्तिरङ्गीकृता। आङ्गल-भाषायाम् 'Primary Sense' इति अभिधाया नामान्तरं तथा च 'Secondary Sense' चेति लक्षणायाः। तथाहि लेडि-ओयेरलि-महाभागस्तस्य 'Signifies and Language' इति ग्रन्थे शब्दस्य त्रिविधम् अर्थम् अङ्गीकुर्वन्ति। तथाहि तेनोक्तम् - 'The one Crucial question in all expression is its special property, first of Sense, that in which it is used, then of meaning as the intention of the user, and most for reaching and momentous of all, of implication, of ultimate Significance.'(14) इति।

## मुकुलभट्टस्य अभिधावृत्तिमातृका-

मुकुलभट्टेन अभिधावृत्तिमातृका इति शब्दशक्तिविषयकः स्वतन्त्रो ग्रन्थो विरचितो यो ह्येतद्विषयकः साहित्यशास्त्रीय आद्यो ग्रन्थः। मुकुलभट्टस्यायं ग्रन्थः उत्तरवर्तिनाम् आचार्यानां कृते आदर्शरूपेण प्रतिष्ठितः, यम् अनुसृत्य मम्मटेन

'शब्दव्यापारविचारः', अप्पयदीक्षितेन 'वृत्तिवार्तिकम्', आशाधरभट्टेन 'कोविदानन्दः', त्रिवेणिका' च, श्रीकृष्णेण च 'वृत्तिदीपिका' चेत्यादयः शब्दशक्तिविषयका ग्रन्था व्यरच्यन्त। एतदतिरिच्य साहित्य-व्याकरण-मीमांसादिशास्त्रेषु प्रायः सर्वेः आचार्यैः यथाप्रसङ्गं शब्दशक्तिः विचारिता।

केचन अभिधावृत्तमातृका इति, अन्ये च अभिधावृत्तिमातृका इति नाम्ना अभिदधाति ग्रन्थममुम्। तत्र अभिधा, वृत्तिः वा वृत्तं तथा मातृका इति त्रयाणां पदानां समन्वयो दृश्यते ग्रन्थेऽस्मिन्। अभिधा चासौ वृत्तिरित्यभिधावृत्तिः तस्याः मातृका नाम मातृकल्पा। वृत्तिर्नाम व्यापारः। पक्षे अभिधायाः वृत्तं नाम प्रकरणं समूहो वा तेषां मातृका नाम मातृकल्पा। ग्रन्थेऽस्मिंश्च वृत्तमिति वृत्तिरिति चोभयमप्यभिधानं प्रयुक्तं दृश्यते।

मुख्यस्य अभिधावृत्तस्य प्रकाराश्चत्वारः, लाक्षणिकस्य तु षडित्येवं दशप्रकारमभिधावृत्तमत्र विवेचितम्। अधुना फलमेतस्य दर्शयति 'दशविधेन अनेन अभिधावृत्तेन समग्रस्य वाक्यपरिस्पन्दस्य व्याप्तत्वादनेन' (अभिधावृत्तिमातृका, पृः - 84) इत्यादिषु स्थलेषु च वृत्तपदं

प्रयुक्तं दृश्यते। परम् एतेषु स्थलेषु वृत्तपदस्य अर्थः प्रकरणं समूहो भेदा वेति। ग्रन्थकारश्चाभिधामेकमेव शब्दव्यापारं स्वीकरोति, वाच्यार्थवैविध्येन च तस्य दश भेदान् प्रपञ्चयति।

**अभिधावृत्तिमातृकायामभिधाशक्तेर्विचारः-**

क) अभिधाशक्तेः उपादेयत्वम्

न्यायमते षोडश पदार्थाः स्वीकृताः। तथाहि उच्यते तर्कभाषायाम् - 'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वं ज्ञानान्निःश्रेयसाधिगमः।' इति।

षोडशपदार्थानां भोगापवर्गसाधनभूतत्वात् निर्णये एव प्रयोगयोग्यतादशायां निबन्धं कारणम्। पदार्थानां प्रयोगयोग्यता तन्निश्चयात्मकज्ञानाधीना एव। न हि पदार्थनिश्चयम् अन्तरेण तत्प्रयोगं कर्तुं शक्यते इति कृत्वा तन्निश्चयात्मकज्ञानम् अपरिहार्यम्। तेषां पदार्थानां निर्णयः च शब्दसंभेदेन वर्णात्मकशब्दस्पर्शद्वारा अर्थं वाच्यादिकं प्रत्याययति। पदार्थनिश्चयः शब्दद्वारेण एव भवति। शब्दः च अर्थं बोधयति। शब्दस्य पदार्थप्रतिपादकस्य वर्णात्मकस्य ध्वन्यात्मकस्य वा मुख्येन लाक्षणिकेन वाऽभिधाव्यापारेण

अर्थावगतौ कारणत्वम् शब्दोऽभिधाव्यापारद्वाराऽर्थं बोधयति इत्यर्थः। स च अभिधाव्यापारो मुख्यो लाक्षणिकः चेति भेदेन द्विविधः।

ख) <u>मुख्यलाक्षणिकयोः अभिधाव्यापारयोः स्वरूपम्</u>

शब्दः अभिधाव्यापारद्वारा अर्थं बोधयति। स चाभिधाव्यापारः मुख्य-लाक्षणिकत्वेन द्विविधः। कः पुनः मुख्यः, को वा लाक्षणिकः अभिधाव्यापार इत्याशङ्क्य विशेषोपदर्शनद्वारेण मुख्यलाक्षणिकौ शब्दव्यापारौ निर्णेतुमाह आचार्यो मुकुलभट्टः –

‘शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते।।’(15) इति

यस्य मुख्यार्थस्य प्रतीतिस्थानं शब्दव्यापारतो भवति, तस्यार्थस्य मुख्यता। शब्दश्रवणानन्तरमव्यवधानेन यस्य अर्थस्य प्रतीतिर्जायते स मुख्यार्थः इति।

शब्दव्यापाराद्यस्यार्थस्यावगतिर्ज्ञानं तस्यार्थस्य मुख्यता। स हि यथा सर्वेभ्यः हस्तादिभ्योऽवयवेभ्यः पूर्वं मुखमवलोक्यते, तद्वदेव सर्वेभ्यः प्रतीयमानेभ्योऽर्थान्तरेभ्यः पूर्वमवगम्यते। तस्मान्मुखमिव मुख्य इति शाखादियान्तेन

मुखशब्देनाभिधीयते। तस्योदाहरणम् - 'गौरनुबन्ध्य' इति। अत्र हि गोशब्दव्यापाराद्यागसाधनभूता गोत्वलक्षणा जातिरवगम्यते। अतः तस्याः मुख्यता। तदेवं शब्दव्यापारगम्यः मुख्योऽर्थः।

मुख्यार्थस्य पर्यालोचनया ज्ञानं लाक्षणिकत्वम्। यथा पूर्वस्मिन्नेवोदाहरणे 'गौरनुबन्ध्य' इत्यत्र व्यक्तेः नाम गोव्यक्तिविशेषस्य प्रतीतिः जायते। सा हि व्यक्तिः गोरूपा न शब्दव्यापाराज्ज्ञायते 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायात्। अभिधाशक्तिर्हि गोत्वजातिरूपं बोधयित्वा विरता भूत्वा तत्र न गोव्यक्तिं बोधयितुं पुनरपि समर्थ्यं भवति - 'शब्दबुद्धिकर्मणां विरम्य व्यापारभाव' इति न्यायात्। तत्र शब्दप्रत्यायित-जातिसामर्थ्यात् जातेः आश्रयभूता 'निर्विशेषं सामान्यम्' इति न्यायात्सामान्यस्याश्रये विशेषस्त्वस्त्येव। तेनासौ गोव्यक्तिः लाक्षणिकीत्यर्थः। शब्दस्यायमभिधाव्यापारो द्विविधः प्रतिपादितः यथा – मुख्यो लाक्षणिकश्चेति। स च निरन्तरार्थविषयः सान्तरार्थनिष्ठश्चेति। अन्तरेण व्यवधानेन रहितं निरन्तरम्, यो विषयो स निरन्तरार्थविषयो मुख्योऽभिधाव्यापारः। शब्दार्थयोर्मध्ये व्यवधानाभावा-

न्मुख्यस्याभिधाव्यापारस्य निरन्तारार्थविषयत्वं बोध्यम्। व्यवधानेन रहितः सान्तरो योऽर्थस्तन्निष्ठस्तदाधारितो व्यापारो सान्तरार्थनिष्टो लाक्षणिकत्वेनाभिधीयते। अत्र च गोशब्दो गोव्यक्तिमध्ये गोत्वजातिरूपस्य मुख्यार्थस्य व्यवधानाल्लाक्षणिकस्य व्यापारस्य सान्तरार्थनिष्ठत्वम् इत्यर्थः। अर्थात् एवं वक्तुं शक्यते –

'गोशब्दः – गोत्वजातिः (मुख्यार्थः) – गोव्यक्तिः (लक्ष्यार्थः)'

सारांशस्त्वयमेव – यः साक्षात्तया शब्दव्यापारः स निरन्तरार्थविषयोऽभिधाव्यापारो मुख्यः. यश्च अभिधेयार्थ-सहकारितयान्यार्थस्य प्रतीतिः स सान्तरार्थनिष्ठोऽमुख्यः। तस्यैव लाक्षणिकत्वम्।

ग) <u>मुख्याभिधाव्यापारस्य प्रकारचतुष्टयम्</u>

यया शब्दशक्त्या अव्यवधानेन संकेतितार्थो बोध्यते सा अभिधेति स्पष्टम्। तेष्वपि अभिधाविहिते संकेतग्रहविषये भिन्नानि मतानि परिदृश्यन्ते। तेषामभिधाबोध्यार्थेषु अनेकानि मतानि सन्ति। तद्यथा --

- जैनानुसारम् आकृतिवादः

- केषाञ्चन नैयायिकानां व्यक्तिवादः
- प्राचीननैयायिकानां जात्याकृतिव्यक्तिवादः
- बौद्धानाम् अपोहवादः
- मीमांसकानां जातिमात्रवादः
- महिमभट्टस्य तत्त्वापत्तिरूपक्रियावादः
- वैयाकरण-साहित्यिकानाञ्च जातिगुणक्रियायदृच्छावादः।

संक्षेपेण एतेषां मतानां प्रतिपाद्यमुल्लिख्यते।

क) आकृतिवादः – जैना आकृतावेव संकेतं स्कीकुर्वन्ति।

ख) व्यक्तिवादः – नैयायिकेषु केचन आकृतिवादममुं निराकुर्वन्तो व्यक्तिवादं स्थापयन्ति। तदुक्तं न्यायमञ्जर्य्याम्

"व्यक्तिरेव पदार्थत्वं तस्मादभ्युपगम्यताम्।
तथा च बुद्धिस्तत्रैव श्रुतशब्दस्य जायते (16)"।।

ग) जात्याकृतिव्यक्तिवादः – न्यायसूत्रकारेण गौतमेन तदनुयायिभिश्च प्राचीनैः जातिम्, आकृतिं व्यक्तिञ्च यथावसरं

पदार्थं मन्यन्ते। तदुक्तं - 'व्यक्त्याकृतिजातयस्तु पदार्थः' (17)। यत्र जातेराकृतेश्च संभावना न भवति तत्र केवलव्यक्तिरेव पदार्थः इति।

घ) अपोहवादः – बौद्धानां मते, जातिः पदार्थः, नापि व्यक्तिः, न च जातिविशिष्टव्यक्तिरपि तु अतद्व्यावृत्तिरेव पदार्थः।

ङ) जातिमात्रवादः – मीमांसकानुसारं जातावेव संकेतः।

च) तत्त्वापत्तिरूपक्रियावादः – व्यक्तिविवेककारो महिमभट्टः तत्त्वापत्तिरूपां क्रियामेव सर्वेषां नामपादानां प्रवृत्तिनिवृत्तत्वेन स्वीकरोति।

छ) जात्यादिचतुष्टयवादः – वैयाकरणाः शब्दस्य संकेतो जातौ, गुणे, क्रियायां, यदृच्छायाञ्च चतुर्षु स्वीकुर्वन्ति। तदुक्तं महाभाष्यकारेण भगवता पतञ्जलिना 'चतुष्टयी हि शब्दानां प्रवृत्तिः। जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः'(18)।

आचार्या मुकुलभट्टास्तथा काव्यशास्त्रस्य विद्वांसः प्रायेणैव वैयाकरणानां मतमिदमनुसृत्य अभिधाव्यापारस्य

मुख्यलाक्षणिकत्वेन द्वैविध्यं प्रतिपाद्य च मुख्यस्य अभिधाव्यापारस्य चातुर्विध्यं दर्शितवन्तः –

'तत्र मुख्यश्चतुर्भेदो ज्ञेयो जात्यादिभेदतः' (19) इति ।

ननु के तावज्जात्यादयः? किं च प्रमाणं मुख्यार्थस्य जात्यादिभेदन चतुर्धात्वेन? इत्यादिकां जिज्ञासां शमयितुं वृत्तिकारः प्राह – तयोः मुख्यलाक्षणिकयोः अर्थयोः मध्यात् मुख्यार्थस्य चत्वारः भेदाः जात्यादिभेदात्। 'चतुष्टयी हि शब्दानां प्रवृत्ति'र्भगवता महाभाष्यकारेण उपवर्णिता जातिशब्दाः गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्चेति। तथाहि सर्वेषां शब्दानां स्वार्थाभिधानाय प्रवर्तमानानामुपाध्युपरञ्जितविषयविवेकत्वादुपाधिनिबन्धाना प्रवृत्तिर्ह्युपाधिः। यश्च द्विविधो वक्तृसन्निवेशितो वस्तुधर्मश्च। कश्चित् खलु वक्त्रा तस्मिंस्तस्मिन् वस्तुनि उपाधितया सन्निवेश्यते, कश्चित्तु वस्तुधर्मः एव। तत्र यो वक्त्रा यदृच्छया तत्तत्संज्ञिविषयद्वारेण तस्मिंस्तस्मिन् संज्ञिनि संनिवेश्यते स वक्तृसंनिवेशितः। वस्तुधर्मो द्विविधः साध्यः सिद्धश्चेति। साध्योपनिबन्धनाः तत्र क्रियादिशब्दाः यथा पचतीति। पुनः सिद्धः द्विधा विभक्तः - जातिगुणभेदात्। जातिः सिद्धस्य उपाधेः पदार्थस्य प्राणप्रदधर्मः। तथाहि

हरिकारिकायामुक्तम् – 'गौरिति न हि गौः स्वरूपेण गौः नाप्यगौः, गोत्वाभिसम्बन्धात्तु गौः' इति। गुणस्तु उपाधिलब्धस्वरूपस्य वस्तुनो विशेषाधानहेतुः, यथा शुक्लादिः।

मुकुलभट्टेन जातिवादिनां पक्षो भृशं दूषितः। तन्नये सर्वेषां गुणक्रियायदृच्छाशब्दानां जातिनिबन्धनत्वं यत्केषामपि अभिमतं तन्न युक्तग्राह्यम्। तथाहि 'अभिधावृत्तिमातृका'यामुदितम् –

"गुणक्रियाशब्दसंज्ञिव्यक्तीनामेव तत्तदुपाधिनिबन्धनभेद-जुषामेकाकारतावगतिनिबन्धनत्वम्, न तु जातेरिति भगवतो महाभाष्यकारस्यात्राभिमतम्। यथा हि एकमेव मुखं तैलखड्गोदकादर्शादीनां प्रतिबिम्बावगतिनिबन्धनानां भेदान्नानाकारत्वेन प्रत्यवभासते तथैवैकैव शुक्लादि-व्यक्तिर्देशकालावच्छिन्ना तत्तत्कारणसामग्र्युपजनित-शङ्खाद्याश्रयविशेषवशेन नानारूपतयाभिव्यक्तिमासादयन्ती भिन्नाश्रयसमवेतत्वात् शुक्लत्वादिजात्यभावान्न शुक्लादि-शब्दानां जातित्वम्"(20) इति।

अतः शब्दप्रवृत्तिनिमित्तानाञ्चातुर्विध्यान्मुख्यः शब्दार्थश्चतुर्विधः इति सिद्धम्।

घ) <u>अमुख्याभिधाव्यापारस्वरूपम्</u>

यत्राभिधेयस्य सहकारितयामुख्यार्थः प्रतीयते, तत्र लक्षणानाम्नी शब्दस्यामुख्या शक्तिः भवति। इयं शक्तिर्न अर्थस्य परमवश्यमेव शब्दस्य सहकारिता। अयं शब्दव्यापारः सान्तरार्थनिष्ठ इति मुकुलभट्टस्य नयः।

अमुख्याभिधाव्यापारस्य नाम लाक्षणिकस्य द्विभेदत्वमुपदर्शयितुमाहाचार्यो मुकुलभट्टः –

'शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता।'(21) इति

१. शुद्धा लक्षणा

लक्षणा शुद्धात्वेन उपचारमिश्रात्वेन च प्रथमं द्विधा। शुद्धा तावत् लक्षणा 'गङ्गायां घोषः' इति। अत्र हि घोषं प्रति स्रोतविशेषस्य आधारता न उपपद्यते इति। गङ्गाशब्दः स्वाभिधेयस्य श्रोतोविशेषस्य यः समीपभूततटः तं लक्षणया अवगमयति। उपचारमिश्रा तु यत्र वस्त्वन्तरे उपचर्यते, यथा 'गौर्वाहीकः' इत्यत्र गोत्वं वाहीकत्वं च परस्परं सर्वथा

भिन्नम्। परं च उभयोः जाड्यत्व-मान्द्यत्वादिसादृश्यधर्मयुक्तात् परस्परं भेदप्रतीतिस्थगनं जायते तेन वाहीके गोत्वम् आरोप्यते। एवं गोगत-वाहीकगतधर्मयोः साजात्यादेकाधिकरण्येन प्रयोगः संगच्छते।

उपादानलक्षणात्वेन लक्षणलक्षणात्वेन च शुद्धा लक्षणा द्विविधा। क्वचित् खलु अर्थान्तरोपादानेन लक्षणा प्रवर्तते, क्वचित् तु अर्थान्तरलक्षणेन। किं पुनः अर्थान्तरस्य उपादानं, किं वा तस्य लक्षणमित्याशङ्क्याह –

‘स्वसिद्धयर्थतयाक्षेपो यत्र वस्त्वन्तरस्य तत्।
उपादानं लक्षणं तु तद्विपर्यासितो मतम्।।’(22) इति।

i) उपादानलक्षणा

यत्र स्वसिद्ध्यर्थतया वस्त्वन्तरस्याक्षेपो भवति तत्र उपादानम्। उदाहरणं यथा - ‘गौरनुबन्ध्यः’ इत्यत्र हि गौत्वस्य यागं प्रति साधनत्वं शाब्दं व्यक्त्याक्षेपमन्तरेण नोपपद्यते। अतः तत्सिद्ध्यर्थतया व्यक्तेराक्षेपः।

किञ्च, ‘पीनो देवदत्तो दिवा न भुङ्क्ते’ इत्यत्र पीनत्वं दिनाधिकरणभोजनाभावविशिष्टतया अवगम्यमानस्य एव

कार्यत्वात् स्वसिद्ध्यर्थत्वेन कारणभूतं रात्रिभोजनम् आक्षिपति। अत्र शब्दाक्षेपपूर्वकतया प्रमाणस्य अपरिपूरणस्य परिपूरणात् श्रुतार्थापत्तित्वं भवतु। अथवा कारणस्य एव रात्रिभोजनस्य आक्षेपः इति सर्वथा स्वसिद्ध्यर्थत्वेन अर्थान्तरस्य आक्षेपपूर्वकतया अन्तर्भावाद् उपादानत्वमिति मुकुलभट्टस्य मतम्।

ii) लक्षणलक्षणा

यत्र तु अर्थान्तरसिद्ध्यर्थत्वेन स्वार्थस्य समर्पणं भवति तत्र लक्षणलक्षणा। यथा- 'गङ्गायां घोषः' इत्यत्र अर्थान्तरभूतं तटमवगमयितुं गङ्गाशब्देन स्ववाच्यभूतः स्रोतोविशेषोऽत्र समर्प्यते इति अर्थान्तरसिद्ध्यर्थत्वेन स्वार्थसमर्पणमिति लक्षणलक्षणेति।

२. सोपचारा लक्षणा

यत्र वस्त्वन्तरं वस्त्वन्तरे उपचर्यते तत्र सोपचारा लक्षणा भवति। उपचारमिश्रा चतुर्विधेति निरूपयितुमाह -

'आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः।
प्रत्येकं भिद्यमानत्वादुपचारश्चतुर्विधः।।'(23) इति

उपचारो द्विविधः - शुद्धः गौणश्चेति तथा च आरोपाध्यवसानाभ्यां सह चतुर्विधो भवति।

क) शुद्धोपचारः

तत्र शुद्धो यत्र मुलभूतस्य उपमानोपमेयभावस्य अभावेन उपमानगतगुणसदृशगुणयोगलक्षणासंभावात् कार्यकारण-भावादिसंबन्धात् लक्षणया वस्त्वन्तरे वस्त्वन्तरमुपचर्यते।

आरोपाध्यवसानाभ्याम् उपचारो द्विविधः १. शुद्धः सारोपः २. शुद्धः साध्यवसानश्चेति।

१) शुद्धोपचारा सारोपा लक्षणा

यत्र वस्त्वन्तरं वस्त्वन्तरे अध्यारोप्य-आरोपविषययोः भेदम् अनपह्नुत्य उपचर्यते तत्र अनपह्णुतस्वरूप एव वस्त्वन्तरे वस्त्वन्तरस्य अधिकस्य आरोप्यमानत्वाद् अध्यारोपः। यथा - 'आयुर्घृतम्' इति। अत्र हि आयुषः करणे घृते तद्गतकार्यकारणभावात् लक्षणापूर्वकत्वेन आयुष्ट्वं कार्यं तच्छब्दश्च इत्युभयम् उपचरितम्। तस्मात् शुद्धः अयमुपचारः।

२) शुद्धोपचारा साध्यवसाना लक्षणा

यत्र तु उपचर्यमाणविषयस्य उपचर्यमाणे अन्तर्लीनतया विवक्षितत्वात् स्वरूपापह्नवः क्रियते, तत्र अध्यवसानम्। कार्यकारणभावसम्बन्धात् अध्यवसानं यत्र तत्र शुद्धा साध्यवसाना लक्षणा भवति। उदाहरणं तावत् पाञ्चालाः इति। अयम् अध्यवसानगर्भः शुद्धोपचारः।

ख) गौणोपचारः

गौणः पुनरुपचारो यत्र मुलभूतोपमानोपमेयभावसमाश्रयेण उपमानगतगुणसदृशगुणयोगलक्षणं पुरस्सरीकृत्य उपमेयः उपमानशब्दः तदर्थः चाध्यारोप्येते। स हि गुणेभ्य आगतत्वात् गौणशब्देन अभिधीयते। यथा 'गौवाहीक' इति।

आरोप-अध्यवसानाभ्याम् अयं गौणोपचारो द्विविधः – अ) सारोपो गौणोपचारः आ) साध्यवसानो गौणोपचारश्चेति।

तत्र उपमानगतगुणानाम् उपमेयस्य उपरि आरोपः क्रियते चेत् गौणोपाचारा सारोपा। यथा गौर्वाहिकः। पुनः यत्र तु उपचर्यमाणविषयस्य उपचर्यमाणे अन्तर्लीनतया स्वरूपाह्नवः क्रियते तत्र अध्यवसानम्। गुणसादृश्ययोगात् तत्र लक्षणायाः गौणी साध्यवसाना चेति भेदो जायते। यथा 'राजा'। राजशब्दः प्रयोगदर्शनात् क्षत्रिये मुख्यया वृत्त्या

प्रयुक्तः सन् शुद्रादौ क्षत्रियगतजनपदपरिपालनसदृश-जनपदपरिपालनयोगलक्षणापूर्वकतया गौणवृत्त्या युज्यते। अत्र अध्यवसानगर्भो गौण उपचारः।

अतो मुकुलभट्टानुसारं लक्षणाया निम्नप्रकारेण षट् प्रकारकत्वं भवति –

1. उपादानलक्षणा (गौरनुबन्ध्यः)
2. लक्षणलक्षणा (लक्षणलक्षणा)
3. शुद्धोपचारा सारोपा लक्षणा (आयुर्घृतम्)
4. गौणोपचारा सारोपा (गौर्वाहिकः)
5. शुद्धोपचारा साध्यवसाना (पञ्चालाः)
6. गौणोपचारा साध्यवसाना (राजा)

एवम् मुख्यार्थश्चतुर्विधः परं षड्विधश्चामुख्यार्थः इति सर्वमाहत्याभिधाया दश भेदाः भवितुमर्हन्ति। अत्रेदमवधार्यं यन्मुकुलभट्टस्येयं लक्षणाभिधावृत्तेरेवाङ्गभूता। नासौ लक्षणां स्वतन्त्रवृत्तिकारेण स्वीकरोति सः।

ङ) <u>लक्षणायाः भेदाः</u>


लक्षणा
शुद्धा
सोपचारा
उपादान-
लक्षणा
लक्षणलक्षणा
सारोपा
साध्यवसना
शुद्धोपचारा
सारोपा
(गौरनुबन्ध्यः)
(आयुर्घृतम्)
गौणोपचारा
सारोपा
(गङ्गायां
घोषः)
(गौर्वाहिकः)
शुद्धोपचारा
साध्यवसना
गौणोपचारा
साध्यवसना

च) <u>लक्षणाया विषयविभागः</u>

लक्षणा अध्यारोपात् अध्यवसानात् शुद्धत्वाच्च त्रिस्कन्धा इति मुकुलभट्टेनाभिधावृत्तिमातृकायां प्रतिपादितम्। तेषां स्कन्धत्रयाणां विषयविभागस्तेन कृतः –

"तटस्थे लक्षणा शुद्धा स्यादारोपस्त्वदूरगे।

निर्गीर्णेऽध्यवसानं तु रूढ्यासन्नतरत्वतः"(24)।। इति।

अर्थात् शुद्धा लक्षणा भवति तटस्थे। तटस्थं नाम भिन्नत्वेनोभयोः लक्ष्यलक्षकयोः प्रतीतिः। यथा गङ्गायां घोषः इति। यदा लक्ष्यलक्षकयोः कश्चित् संबन्धो विवक्षितस्तदा शुद्धा लक्षणा भवति। अदूरवर्तिनि नाम सामीप्ये लक्ष्यलक्षकयोरध्यारोपः। लक्षके लक्ष्यं यदा निगीर्णं भवति तदाध्यवसानं भवति। अध्यवसानं तु रुढ्यासन्नतरत्वतः तच्चाध्यवसानं रूढित्वेनासन्नतरत्वेन चेति द्विविधम्।

छ) <u>लाक्षणिकार्थस्य सापेक्षत्वम्</u>

निश्चिते सम्बन्धे सति कस्मादपि शब्दादर्थप्रतीतिस्तदैव सम्भवति। शब्दस्य मुख्यार्थेन सह शब्दस्य निश्चितः सम्बन्धो भवति। तथाहि मुकुलेन वृत्तावुक्तम् -- 'मुख्यार्थे शब्दस्य सम्बन्धावधारणात्

प्रतिपादकत्वमुपपद्यते।'(25) इति। सम्बन्धस्य तात्पर्यः संकेताद्भवति। संकेतग्रहणेनैव 'गङ्गायां घोषः' इत्युदाहरणे गङ्गाशब्दस्य प्रवाह इति शब्दनिर्धारणप्रक्रियायां सर्वप्रथममुच्चारितयोरखण्डवाक्य-वाक्यार्थयोर्मध्ये कार्य-कारणभावस्य निश्चय एव भवति। तदनन्तरं शनैः शनैः असकृत् उच्चारणादन्वयव्यतिरेकाभ्यां स्वतन्त्राणां शब्दानामर्थज्ञानं जायते। अनेन प्रकारेण शब्दार्थयोर्मध्ये कार्यकारणभावः निर्धारितो भवति। तदुक्तं भट्टमुकुलेन - 'सम्बन्धावधारणसमये व्यवहर्तृगतयोस्तावत् शब्दप्रयोगार्थ-प्रतिपत्योरविभक्तोद्देशवाक्यवाक्यार्थनिष्ठतया पूर्वं हेतुफल-भावावसायो भवति। तदनन्तरं च त्रिचतुरादिदर्शने-भ्योऽन्वयव्यतिरेकाभ्यां वाक्यवाक्यार्थोद्देशप्रविभागगते ये शब्दप्रयोगार्थप्रतिपत्ती तन्निष्ठकार्यकारणभावावधारणम् तदुत्तरकालं च व्यवहर्तृगतार्थप्रतिपत्यन्यथानुपपत्या शब्दार्थसम्बन्धावगतिः।'(26) इति

मुख्यार्थस्य केवलं शब्देन सह सम्बन्धो भवति। किन्तु लाक्षणिकार्थस्य अनेन प्रकारेण साक्षात् सम्बन्धो न भवति। यदा लाक्षणिकार्थस्य शब्देन सह साक्षात्सम्बन्धो भवति, तदा स मुख्यार्थः इति। स लाक्षणिकः - 'न हि लाक्षणिकार्थेन सह

शब्दस्य सम्बन्धः। मुख्येनैवार्थेन परिदृश्यते। तथाभावे हि सति तस्य मुख्यत्वमेव स्यान्न लाक्षणिकत्वम्।'(27) इति।

ननु लक्ष्यमाणस्यार्थस्य प्रतीतिः कथं भवति इति चेदुच्यते मुकुलभट्टेन - 'अथ शब्दस्य मुख्यो योऽसावर्थस्तेन सह सम्बन्धो लक्ष्यमाणस्यार्थस्य दृष्ट इति तद्द्वारेण शब्दात् तस्यावगतिरित्यभिधीयते, एवं सति यदि निरपेक्षः स्वार्थप्रतिपादनद्वारेण लक्ष्यमाणमर्थमवगमयति तदा सर्वदा तमर्थमवगमयेत्, अथ सापेक्ष...।'(28) इति

तस्य कारणत्रितयं वर्तते – वक्तृ-वाक्य-वाच्यभेदात्। यथा – वक्ता वाक्यं वाच्यं चेति त्रिविधस्य कारणस्य पुनः समस्तव्यस्ताभ्यां विभागद्वयमस्ति। तदुक्तं मुकुलभट्टेन –

"वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात्।
लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषिभिः"(29)।।

वक्ता, वाक्यम्, वाच्यं चेति प्रकारत्रितयमध्ये सम्बन्धः वर्तते। वक्तुः अर्थस्य यः परप्रतिपत्तये वाक्यमुच्चारति स वक्ता --'यः परप्रतिपत्तये वाक्यमुच्चारयति स वक्ता।'(30) इति।

ज) <u>वक्तृनिबन्धनेन लाक्षणिकार्थपरिग्रहस्य उदाहरणम्</u>

लक्षणायाः विचारप्रसङ्गे मुकुलभट्टः लक्ष्यार्थस्य वक्तृ-वाक्यादिकारणसत्त्वात् लक्ष्यार्थस्य ज्ञानं भवतीति उक्तवान्। एतदर्थं मुकुलभट्टेन यदुदाहरणं प्रदत्तं, तत्रापि व्यञ्जनाविरोधिमतानां संकेतः परिप्राप्यते। मुकुलभट्टः वक्तादिसापेक्षत्ववशात् लक्षणाया त्रीणि उदाहरणानि प्रदत्तानि तत्र --

"दृष्टिं हे प्रतिवेशिनि, क्षणमिहाप्यस्मद्गृहे दास्यसि,
प्रायो नैष शिशोः पिताऽस्य विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि तद् वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रा वपुरालिखन्तु जरठच्छेदा नलग्रन्थयः"(31)।।

इत्युदाहरणे भाविरत्याः अपह्नवः लक्ष्यार्थः। किन्तु मुकुलभट्टो वक्तृनिबन्धनायाः लक्षणायाः विषयत्वं प्रतिपादितवान्। यतो समुपनिबद्धार्थस्य जलानय-नालीकार्थस्य बाधत्वेन प्रतीतेरनन्तरं वैपरीत्य-सम्बन्धेन परपुरुसम्भोगरूपोऽर्थोऽवगम्यते। अतोऽत्रोपादाना-त्मिका लक्षणा मुकुलभट्टाभिमता। एवं ध्वनिविरोधिना मुकुलभट्टेन ध्वनिवादिनां वस्तुध्वनिः वक्तृनिबन्धनायां लक्षणा-यामन्तर्भावितः।

झ) <u>वाक्यनिबन्धनेन लाक्षणिकार्थपरिग्रहस्य दृष्टान्तः</u>

'प्रापश्रीवेषः कस्मात् पुनरपि मयि तं मन्मथखेदं विदध्या-
न्निद्रामप्यस्य पूर्वामनलसमनसो नैव संभावयामि।।
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयात-
स्त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः'(32)इति

उदाहरणे मुकुलभट्टो नृपे वासुदेवस्य स्वरूपाध्यवसानं मन्यते इति कृत्वा अतिशयोक्त्यलंकारो हि लक्ष्यः। भगवद्वासुदेवविषयेषु यथायोगं तत्तत्कार्यनिराकरणहेतु-गर्भतया प्रवर्तमानेषु वासुदेवता आक्षिप्ता। तेनात्र उपादानात्मिका लक्षणा। वासुदेवरूपतया अत्र नृपतेः अध्यवसानगर्भो गौणोपचारः। अतो वाक्यनिबन्धनात्र लक्षणा मुकुलेनाभिमतासीत्।

ञ) <u>वाच्यनिबन्धनेन लाक्षणिकार्थपरिग्रहस्य उदाहरणम्</u>

"दुर्वारा मदनेषवो दिशि दिशि व्याजृम्भते..." (33) इत्युदाहरणे वाच्यस्वरूपविचारेण तत्र विप्रलम्भशृङ्गारस्य आक्षेपाद् उपादानात्मिका लक्षणा वाच्यनिबन्धना। विप्रलम्भशृङ्गारस्य आक्षिप्यमानस्यापि वाच्यापेक्षया चारुत्वम् इति मुकुलभट्टस्य आशयः।

एवं भट्टमुकुलेन वक्तृ-वाक्य-वाच्यानाम् आश्रयेण लक्षणायाः भेदत्रयं सोदाहरणं प्रतिपाद्य पुनरेतेषां मिथो योजनया अन्येऽपि चत्वारः भेदाः उल्लिखिताः। इत्थं उदाहरणत्रितयेन मुकुलभट्टः वस्तु-अलंकार-रसध्वनीनाम् अन्तर्भाव एव लक्षणायाम् इति प्रमाणितवान्। उक्तोदाहरणत्रयेण लक्ष्यार्थस्य प्रतीतिः उपादान-लक्षणया भवति। मुकुलभट्टः आक्षेपो हि उपादान-लक्षणेति इत्युक्तवान्। अनेन प्रतीयते यत् व्यङ्गार्थः आक्षेपलभ्यः।

ट) <u>लक्षणायाः हेतवः</u>

मुख्यार्थात् परं लक्ष्यार्थस्य प्रतीतये कारणत्रयं मुकुलभट्टः स्वीकृतवान् --

'मुख्यार्थासम्भवात् सेयं मुख्यार्थासत्तिहेतुका।
रूढेः प्रयोजनाद् वापि व्यवहारे विलोक्यते।।'(34)

ठ) <u>लक्षणायां वाच्यार्थस्य स्थितिः-</u> लक्षणायां क्वचिद् वाच्यस्य अतितिरस्कारः, क्वचिद् विवक्षितत्वं, क्वचिद्वा अविवक्षितत्वम् इत्येवंविधाः त्रयः प्रकाराः सहृदयैः उपदर्शिताः। तदुक्तम् मुकुलेन –

"सादृश्ये वैपरीत्ये च वाच्यस्यातितिरस्किया।
विवक्षा चाविवक्षा च सम्बन्धसमवाययोः।।
उपादाने विवक्षात्र लक्षणे त्वविवक्षणम्।
तिरस्क्रिया क्रियायोगे क्वचित्तद्विपरीतता (35)"।।

· **उपसंहृतिः-**

मुकुलभट्टस्य अभिधावृत्तिमातृकायाः सिद्धान्ताः संक्षेपेण उच्यन्ते –

- एकैव शब्दवृत्तिः स्वीकृता, सा च अभिधा
- अभिधायाः प्रथमार्थः मुख्यार्थः, तद्भिन्नाः सर्वे अमुख्यार्थाः
- मुख्यार्थसहायेन अभिधाव्यापारः अमुख्यार्थम् अवगमयति
- अभिधायाः दश भेदाः, चत्वारो मुख्यार्थभेदेन षट् च अमुख्यार्थभेदात्
- विवर्तमानमेतत् अभिधावृत्तम्

आचार्यो मुकुलभट्टः प्रथमतः अभिधायाः दश भेदान् व्याख्याय शब्दस्य पारमार्थिकं स्वरूपं चिन्तयित्वा निखिलम् अर्थजातं तत्सहायिकां शब्दशक्तिमपि तद्विवर्तनेन अङ्गीकरोति। वस्तुतः शब्दः एक एव, स च नित्यः अक्षरः शब्दब्रह्मेति ख्यातः शब्दाद्वैतवादिनां राद्धान्तः। भर्तृहरिणा 'वाक्यपदीये' शब्दतत्त्वस्येदं तत्त्वं प्रतिपादितम् –

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"(36)।। इति।

अर्थस्य तद्विषयविभागस्य च प्रतीतिर्न पारमार्थिकी परं शब्दब्रह्मणश्च पारमार्थिकी स्थितिः शाश्वती। अर्थस्य शब्दाद्भिन्नसत्ताको बोधो विवर्त एव। विवर्तमानः पदार्थः त्रिकालावाधितो न भवति वितथत्वात्। यावत्तस्य प्रतीतिः तावत्तस्य कश्चिद्वाचकः, कश्चिद्वाच्यः, कश्चिच्चोभयोर्नियामकः सम्बन्धोऽवश्यमेव भासते। शब्दतत्त्वमद्वैतमेकमेव च वर्तते। परं तदर्थभावेन विवर्तमानं सद्दशविधैरभिधाव्यापारै- र्विलोक्यते। यत्र तु तेषां क्रमभेदानां संहारो भवति तत्र तेषामभिधाभेदानां नैव प्रसरो भवति।

मुख्यस्याभिधाव्यापारस्य जातिगुणक्रियायदृच्छा- त्वेन चत्वारः प्रकाराः तथा च लाक्षणिकस्याभिधाव्यापारस्य

प्रथमं शुद्धा मिश्रा चेति भेदद्वयं प्रतिपाद्य शुद्धायाः उपादान-लक्षणलक्षणात्वेन भेदद्वयं, उपचारमिश्रायाश्च शुद्धगौणो-पचारत्वेन द्विधा विभक्तायाः सारोपासाध्यवसानत्वेन चतुर्धेत्येवं सम्मिल्य अभिधावृत्तस्य दश भेदाः भवन्ति। एतेषु पदवाक्यप्रमाणशास्त्रेषु दशविधम् अभिधावृत्तं प्रतिबिम्बितं दृश्यते। दशविधस्यास्याभिधावृत्तस्य प्रयोजनं दर्शयितुमाह मुकुलो यत् यः साहित्यादौ सकललोकव्यवहारदर्पणप्रक्षे सञ्चारयति स वाचि क्रमेण प्रसीदन्त्यां वागीश्वरो भवति – 'यो योजयति साहित्ये तस्य वाणी प्रसीदति'(37)।

मुकुलभट्टः ध्वनिसिद्धान्त-व्यञ्जनाशक्ति-व्यङ्गार्थैः सह परिचितोऽपि अभिधायामेव समस्तं ध्वनिप्रपञ्चं समाविष्टवान्। व्यङ्गार्थो हि लक्ष्यार्थः इति कृत्वा व्यञ्जनायाः स्वतन्त्राम् आवश्यकतां न स्वीकरोति सः। मुकुलभट्टस्य मतानुसारं हृदयाह्लादकः अर्थ आक्षेपात् प्रतीयते। अस्यार्थस्य प्रतीतये 'व्यञ्जना' नाम्ना शक्त्या प्रयोजनं नाङ्गीचकार मुकुलभट्टः। उपर्युक्तपर्यालोचनया एतदेव प्रतीयते यन्मुकुलभट्टो बभूव ध्वनिध्वंसकारी आलंकारिकः। ध्वनिविरोध्यालंकारिकेषु मुकुलभट्टस्य स्थानं सर्वोच्चस्तरे सगौरवं प्रोथितमासीदिति मन्ये। मुकुलभट्टेन ग्रन्थेऽस्मिन् महाभाष्यकारस्य, शबरस्वामिनः,

भर्तृमित्राचार्यस्य, भर्तृहरेः, भट्टकुमारिलस्य, भट्टकल्लटस्य प्रसङ्गक्रमेण नाम तथा च तेषां राद्धान्तान् पूर्वम् उल्लिख्य युक्तिपुरःसरं विचार्य च स्वमतानि दृढतया सन्निविष्टानीत्यत्रापि संस्कृतालंकारशास्त्रे स्वतन्त्रपथ-प्रवर्तकत्वेन भट्टमुकुलस्य महदवदानं वरीवर्ति इत्यलं विस्तरेण।

**अन्त्यटीका -**

1. ऐतरेयब्राह्मणम् (6/3) (द्रष्टव्यम् - अभिधावृत्तिमातृका एवं शब्दव्यापारविचारः, पृष्ठा x)
2. जैमिनीयोपनिषत्, 1/9/219 (द्रष्टव्यम् तत्रैव)
3. बृहदारण्योपनिषत्, 8/2 (द्रष्टव्यम् तत्रैव)
4. वाक्यपदीयम्, 1/1
5. महाभाष्यस्य प्रथमाह्निकम्, 1/1
6. काव्यादर्शः (1/3-4)/1
7. वाक्यपदीयम् (1.114)
8. मीमांसासूत्रम् (1/1/5)
9. शावरभाष्यम् 1/1/5
10. पातञ्जलभाष्यम्
11. Indian Aesthetics, page-302
12. तत्रैव

13. वेदान्तपरिभाषा
14. Signifies and Language (1911), page – 9
15. अभिधावृत्तिमातृका (सुज्ञानकुमारमाहान्तिसम्पादिता), कारिका -1, पृष्ठा –6
16. न्यायमञ्जरी
17. न्यायसूत्रम् (2/1/63)
18. महाभाष्यस्य ऋलृक्सूत्रभाष्यम् (1.1.2.2)
19. अभिधावृत्तिमातृका (रेवाप्रसादद्विवेदीसम्पादिता), पृष्ठा 26
20. तत्रैव, कारिका 2, पृष्ठा 29
21. तत्रैव, कारिका 3, (पृष्ठा 33)
22. तत्रैव, कारिका 3-4
23. तत्रैव, कारिका 4 (पृष्ठा 15)
24. तत्रैव
25. तत्रैव (पृष्ठा 24)
26. तत्रैव
27. तत्रैव
28. तत्रैव
29. तत्रैव
30. तत्रैव (कारिका 6)
31. तत्रैव, (पृष्ठा 24)

32. तत्रैव (पृष्ठा 31)

33. तत्रैव (पृष्ठा 92)

34. तत्रैव (कारिका 9)

35. तत्रैव (कारिका 10-11)

36. वाक्यपदीयम् (ब्रह्मकाण्डः) (प्रथमः श्लोकः)

37. अभिधावृत्तिमातृका (रेवाप्रसादद्विवेदीसम्पादिता), कारिका- 14

## सहायकग्रन्थसूची -

•मुकुलभट्टः - 'अभिधावृत्तिमातृका' (सुबोधिनीसंस्कृतवृत्तियुता) – (वृत्तिकारः सम्पादकश्च) सुज्ञानकुमारमाहान्तिः, वाराणसी : चौखाम्बा कृष्णदास अकाडेमी, 2008. मुद्रिता.

•... - 'अभिधावृत्तिमातृका' (हिन्दीभाष्यसहिता) – (सम्पा.) रेवाप्रसादद्विवेदी, वाराणसी : चौखाम्बा विद्याभवन, 1973. मुद्रिता.

•त्रिपाठी, निरुपमा – 'अभिधावृत्तिमातृका एवं शब्दव्यापारविचार' . दिल्ली : इष्टर्न बुक् लिंकर्स, 2007. मुद्रित.

•मम्मटः – 'काव्यप्रकाशः' (प्रथमादिषष्ठोल्लासान्तः), (अनुवादकः व्याख्यातश्च) ड. विमलाकान्तमुखोपाध्यायः, (सम्पा.) विपदभञ्जनपालः, कोलकाता : संस्कृतपुस्तकभाण्डारः, 1427 (प्रथमः प्रकाशः). मुद्रितः.

•... - 'काव्यप्रकाशः' (बालबोधिनीयुता वामनभट्टविरचिता). पुणा : भाण्डारकर-ओरियेन्टाल रिसार्च इनस्टीट्युट, 1983. मुद्रितः.

•दण्डी – 'काव्यादर्शः' (प्रेमचन्द्रतर्कवागीशकृतः मालिन्यप्रोञ्छनीटीकासमेतः) - (सम्पा.) चिन्मयीचट्टोपाध्यायः, कलिकाता: पश्चिमवङ्गराज्यपुस्तकपर्षद्,, 1995. मुद्रितः.

•भामहः – 'काव्यालंकारः' (सम्पा.) वटुकनाथशर्मा वलदेव-उपाध्यायश्च, वाराणसी: चौखाम्वासंस्कृतसंस्थानम्, 1981(द्वितीयसंस्करणम्). मुद्रितः.

•आनन्दवर्धनः – 'ध्वन्यालोकः' (लोचनटीकासहितः), प्रथमश्च द्वितीय उद्योतः, (सङ्कलितोऽनूदितो व्याख्यातः) ड. विमलाकान्तमुखोपाध्यायः, (सम्पा.) अशोककुमारमुखोपाध्यायः, कलकाता: संस्कृतपुस्तकभाण्डारः, 2008 (परिमार्जितं संस्करणम्). मुद्रितः.

•भरतः – 'नाट्यशास्त्रम्' (अभिनवभारतीटीकोपेतम्) - (सम्पा.) आर्.एस्.नागरः, देहली: परिमलपावलिकेशन्, 2003 (पुनः प्रकाशितम्). मुद्रितम्.

•विश्वनाथः – 'साहित्यदर्पणः' (कुसुमप्रतिमाटीकोपेतः) - (सम्पा.) हरिदाससिद्धान्तवागीशः, कोलकाता, 1967 शकाब्दः (चतुर्थसंस्करणम्) . मुद्रितः.

•मम्मटः – 'शब्दव्यापारविचारः'(सम्पा.) अरुणकुमारमण्डलः, शान्तिनिकेतन, 2002. मुद्रितः.

# “अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्”

## इत्यत्र ‘यथार्थ’पदविवेकः


**ड. अञ्जन-दासः**

सहाध्यापकः रामकृष्णमिशन्-विद्यामन्दिरस्य



(***निबन्धनिर्यासः-***

तत्त्वचिन्तामणौ हेत्वाभासस्य त्रिषु लक्षणेषु प्रथमलक्षणं हि “अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्।” लक्षणस्यास्य अर्थस्तावत् अनुमितौ कारणीभूतो योऽभावस्तस्य प्रतियोगि यद् यथार्थज्ञानं तद्विषयत्वमित्यर्थः। तथा च ह्रदो वह्निमानित्यत्र वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः – ह्रदो वह्निमानिति, तत्कारणीभूताभावः वह्न्यभाववान् ह्रद इति बाधनिश्चयाभावः, तत्प्रतियोगि यथार्थज्ञानं - वह्न्यभाववान् ह्रद इति ज्ञानं, तद्विषयत्वस्य वह्न्यभाववद्ध्रदे सत्त्वात्। एवमेव व्यभिचारादावपि – अनुमितिकारणीभूताभावः वह्निव्यभि-चारिवान् ह्रदः इति निश्चयाभावः, तत्प्रतियोगियथार्थ-ज्ञानविषयत्वस्य वह्निव्यभिचारिजलादौ सत्त्वाल्लक्षणसमन्वय इति।अत्र ‘यथार्थ’पदस्य कीदृशं सार्थक्यमस्ति तदध्यत्र निबन्धे उपस्थापितं मया।)

नव्यनैयायिकैर्गङ्गेशोपाध्यायैस्तदीये तत्त्वचिन्तामणिरिति ग्रन्थे हेत्वाभासस्य त्रीणि सामान्यलक्षणानि कृतानि। तत्र "अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्"[1] इति प्रथमहेत्वाभाससामान्यलक्षणे यथार्थपदानुपादाने 'पर्वतो वह्निमान्' इत्यत्र वह्न्यभाववत्पर्वतरूपबाध-भ्रमविषये वह्न्यभावादावतिव्याप्तिर्भवेत्। तथा हि अनुमितिः 'पर्वतो वह्निमान्' इति, तत्कारणीभूताभावो 'वह्न्यभाव-वान्', 'पर्वत' इति भ्रमाभावः, तत्प्रतियोगिज्ञानविषयत्वस्य वह्न्यभावादौ सत्त्वादिति। यथार्थपदोपादाने तु वह्न्यभाववान् पर्वत इति ज्ञानस्य न यथार्थत्वमिति न दोषः। चन्द्रकलाटीकायामेवमाटीकितम् – "यथार्थपदानुपादाने पर्वतो वह्निमान् धूमादित्यादौ पर्वतादौ वह्न्यभावादौ चातिव्याप्तिः, पर्वतो वह्निमान् इत्यनुमितौ पर्वतो वह्न्य-भाववानित्याकारकभ्रमात्मकनिश्चयाभावस्यापि कारणतया अनुमितिकारणीभूताभावप्रतियोगितादृशभ्रमविषयतायाः प-र्वतादौ सत्त्वात्। एवं वह्न्यभाववद्वृत्तित्वादावप्यतिव्याप्तिः प्रकृतानुमितेर्व्याप्त्यादिविषयकत्वेन व्याप्तिविषयकानुमिति-प्रतिबन्धकवह्न्यभाववद्वृत्तिर्धूम इत्याकारकभ्रमविषयताया वह्न्याद्यभाववद्वृत्तित्वादावनपायात् न केवलं व्यतिरेकि-साध्यकस्थल एवातिव्याप्तिः केवलान्वयिसाध्यकप्रमेयमभि-

धेयत्वादित्यादावपि मेयत्वाभिधेयत्वादौ अतिव्याप्तिः, घटत्वाद्यभावादौ प्रतियोगितासम्बन्धेन मेयत्वभ्रमात्मकमेयत्वाभाववद्वृत्त्यभिधेयत्वम् इत्याकारकज्ञानस्यापि मेयत्वव्याप्तिविषयकानुमितिप्रतिबन्धकतया तद्विषयत्वस्य मेयत्वादौ सत्त्वात्, यथार्थपददाने तु न तत्र तत्रातिव्याप्तिः, पर्वतादौ वह्न्यभावादेर्ज्ञानस्य भ्रमात्मकतया यथार्थत्वासम्भवाद्"[2] इति।

अत्र दीधितिकारो भ्रमत्रयं प्रदर्श्य यथार्थपदं सार्थकयति, तथा हि १) पर्वतो वह्न्यभाववान्, २) धूमो वह्नेर्व्यभिचारी, ग) अभिधेयत्वं प्रमेयत्वस्य व्यभिचारि – "पर्वतो निर्वह्निर्धूमो वह्नेरभिधेयत्वं मेयत्वस्य व्यभिचारीत्यादिभ्रमादनुमितिप्रतिबन्धादाह यथार्थेति"[3] इति। अत्र प्रथमोऽनुमितौ साध्यवत्तांशे प्रतिबन्धकः, द्वितीयतृतीयौ च साध्यव्याप्यवत्तांशे विरोधिनौ। तत्रापि द्वितीये जलादौ प्रसिद्धस्य वह्निर्व्यभिचारित्वस्य धूमे भ्रमः। तृतीये तु कुत्राप्यप्रसिद्धस्यैव प्रमेयत्वव्यभिचारित्वस्य अभिधेयत्वे भ्रम इति वैलक्षण्याद् भ्रमत्रयप्रदर्शनमिति। तदुक्तं गदाधरभट्टाचार्यैः– "पर्वतो वह्निमानित्यादिसद्धेतुस्थले बाधादिभ्रमविषये अतिव्याप्तिवारकतया यथार्थपदं

सार्थकयति पर्वतो निर्वह्निरिति। अत्र इतिपदस्य त्रितयस्थले सम्बन्धाद् भ्रमत्रयलाभः। प्रत्येकभ्रममादायातिप्रसङ्ग-सम्भवात् समूहालम्बनभ्रमपर्यन्तानुधावन-वैफल्यात् तत्प-रत्वासङ्गतिरिति ध्येयम्।

प्रथमभ्रमोऽनुमितौ विरोधी अन्त्यौ च तज्जनकज्ञाने तथा, तयोरपि अन्यत्र प्रसिद्धस्य साध्याभाववद्वृत्तित्वस्य धूमाद्यंशे भ्रमत्वम्, अन्त्ये च प्रमेयत्वाभाववद्वृत्तित्वस्य अप्रसिद्ध्या न तद्भ्रमत्वं, किन्तु अभावांशेऽनुयोगिता-विशेषसम्बन्धेन साध्यस्य भ्रमत्वमित्येतादृशविशेषमाहृत्य शिष्यव्युत्पादनायानेकविधभ्रमकथनम्"[4] इति।

ननु एकत्र प्रसिद्धस्यैव अन्यत्र भ्रम इति नियमात् तृतीयस्थलेऽभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्यत्र भ्रमत्वमेव कथम्? इत्याशङ्क्य प्रमेयत्वाभावाधिकरणनिरूपित-वृत्तित्वमित्यत्र अभावांशे अनुयोगित्वविशेषसम्बन्धेन प्रमेयत्वस्य भ्रम इति। तदुक्तं गदाधरभट्टाचार्येण – "अभिधेयत्वं मेयत्वस्य व्यभिचारी इत्यत्र स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस-म्बन्धेन प्रमेयत्वभ्रमो वाच्यः"[5] इति।

ननु साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिता-कत्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकमात्रावच्छिन्नप्रकारता-निरूपिताभावविषयतानिरूपिताधिकरणविषयतानिरूपितवृ-त्तित्वविषयतानिरूपिताभावविषयतानिरूपितहेतुविषयता-निरूपितपक्षविषयताशालिनिश्चयत्वेन अनुमितिहेतुत्वोक्तौ भ्रमस्य नानुपपत्तिः, स्वरूपसम्बन्धावच्छिन्नप्रतियोगिता-कत्वसम्बन्धेन प्रमेयत्वस्य अभावांशे भ्रमत्वसम्भवादिति चेन्न, एवं सति गुणकर्मान्यत्वोपलक्षितसत्ताभाववदवृत्तित्वज्ञानात् शुद्धसत्तात्वावच्छिन्नविधेयताकानुमित्यनुपपत्तेः, उपलक्षणी-भूतधर्मस्यापि प्रकारतावच्छेदकत्वात्, अतः प्रति-योगितायामेव साध्यतावच्छेदकमात्रावच्छिन्नत्वं देयमुप-लक्षणीभूतधर्मस्य प्रतियोगितानवच्छेदकत्वेन तादृशानुप-पत्तिवारणसम्भवादिति।

अथ व्युत्पत्तिवादे संसर्गतावच्छेदकांशे भ्रमत्वं भट्टाचार्येणैव स्वीकृतं व्याप्तिपञ्चके च जगदीशेन संसर्गप्रकारसाधारणविशेष्यविशेषणभावस्य भ्रमत्वघटकत्वा-दित्युक्तमुभयत्र का युक्तिरिति चेन्न, संसर्गतावच्छेदकांशे भ्रमत्वमङ्गीकुर्वतामयमाशयः, संसर्गांशे भ्रमत्वानभ्युपगमे प्रमात्वस्यापि तत्रास्वीकारापत्तेः, निर्विकल्पकान्यज्ञानस्य भ्रमत्वप्रमात्वान्यतरनियमेन संसर्गांशे तसस्वीकारे

अनुभवविरोधात्, अत एव संसर्गांशे प्रकारविशेष्य-भावविरहेऽपि विशेष्यविशेषणभावोऽस्ति, परन्तु संसर्गता-वच्छेदकीयविषयताया विशेषणज्ञानजन्यतानवच्छेदकत्वेन तत्र प्रकारत्वं नाभ्युपगम्यते, एवञ्च तदभावव-न्निष्ठविशेष्यतानिरूपिततन्निष्ठविशेषणताकज्ञानत्वमेव भ्रमत्वं पर्यवसितम्। संसर्गांशे भ्रमत्वमनभ्युपगच्छतां तावदय-माशयः, संसर्गांशे विशेष्यविशेषणभावोऽपि नास्त्येव, संसर्गतावच्छेदकत्वेनैव संसर्गगतधर्माणां भानं न तु विशेषणत्वेन, विशिष्टबुद्धावपि संसर्गांशे प्रमात्वं किमपि नास्तीत्यभिप्रेत्य भट्टाचार्येणात्र भ्रमत्वं खण्डितम्, परन्तु प्रकारांशे प्रमानिरूपितसांसर्गिकविषयत्वमेव संसर्गे अभ्युपगम्यत इति ध्येयम् – "अभिधेयत्वं मेयत्वस्य व्यभिचारीत्यत्र स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रति-योगिताकत्वसम्बन्धेन प्रमेयत्वभ्रमो वाच्यः, प्रतियोगितांशे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकावच्छि-न्नतयोः साध्याभाववदवृत्तित्वरूपव्याप्तिघटकतया तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञानविरोधित्वात्, एवञ्च भेदादौ प्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस्य प्रसिद्धावपि स्वरूपसम्बन्धावच्छिन्नतादृशप्रतियोगिताकत्वा-प्रसिद्ध्या तादृशसम्बन्धेन भ्रमत्वानुपपत्तिः। प्रतियोगितांशे

सम्बन्धविशेषावच्छिन्नत्वस्य भ्रम इत्यपि न युक्तम्। तस्य सम्बन्धघटकतया तत्प्रकारकत्वघटिततद्भ्रमत्वानुपपत्तेः। न च तेन रूपेण प्रतियोगिताप्रकारक एवात्र भ्रमो विवक्षितः न तु तदवच्छिन्नप्रतियोगितासंसर्गक इति वाच्यम्"[6] इति।

ननु प्रतियोगिताप्रकारकज्ञानस्य एव आनुमितिहेतुत्वे लाघवम्, साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताघटितधर्मेण तद्धेतुत्वे तु साध्यतावच्छेदकस्य द्विधा प्रवेशेन गौरवम्। न च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नप्रकारतात्वेनैव प्रकारतायाः कारणतावच्छेदककोटौ प्रवेशो न तु साध्यतावच्छेदकावच्छिन्नत्वेनेति वाच्यम्, वह्नित्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन घटाभाववदवृत्तिधूमवान् पर्वत इति परामर्शात्पर्वते वह्न्यनुमित्यापत्तेरिति चेन्न्, प्रतियोगिताप्रकारकज्ञानस्य अनुमितिकारणत्वे प्रतियोगित्वनिष्ठसांसर्गिकविषयतायाः प्रतियोगिताकुक्षिप्रविष्टसाध्यतावच्छेदकधर्मावच्छिन्नत्वादिनिष्ठप्रकारताया अपि किञ्चित् सम्बन्धावच्छिन्नतया तत्सम्बन्धनिष्ठसांसर्गिकविषयतायाः च अनुमितिजनकतावच्छेदककोटौ प्रवेशे महागौरवात्।

अथैवं महानसीयवह्निमानित्यनुमितौ तद्व्याप्यवत्ताज्ञानस्य केन रूपेण कारणता? यदि वह्नित्वमहानसीयत्वधर्मद्वयनिष्ठप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यताघटितधर्मेण, तदा क्वचित् महानसीयवह्निमान् क्वचित् वह्निमहानसीयवान् इत्यनुमितिभेदो न स्यादिति चेन्न, परामर्शांशः यत्र अभावविशेषणतापन्नवह्न्यंशे वह्नित्वं धर्मितावच्छेदकीकृत्य महानसीयत्वं भासते तत्र धर्मिपारतन्त्र्येण सामानाधिकरण्यसम्बन्धेन महानसीयत्वस्य वह्नित्वेऽपि भानात् महानसीयत्वावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकत्वसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यताघटितधर्मेण महानसीयवह्निमान् इत्यनुमिति-कारणत्वम्, एवं यत्र महानसीयत्वं धर्मितावच्छेदकीकृत्य वह्नित्वं भासते तत्र महानसीयाभाववदवृत्तिधूमवानितिपरामर्शस्य वह्नित्वावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताकप्रतियोगिताकत्वसम्बन्धावच्छिन्नमहानसीयनिष्ठप्रकारतानिरूपिताभावत्वावच्छिन्न-विशेष्यताघटितधर्मेण वह्निमहा-नसीयवान् इत्यनुमितौ कारणत्वमिति न काप्यनुपपत्तिः।

विशेष्यताविशिष्टप्रकारत्वानिरूपकत्वमेव सर्वांशे भ्रमभिन्नत्वम्, वैशिष्ट्यञ्च स्वनिरूपितत्वस्वाश्रयनिष्ठाधिकरणतानिरूपिताधेयतावदन्यत्वोभयसम्बन्धेन। आधेयता-

वत्त्वं च स्वानवच्छेदकानवच्छिन्नत्वस्वसामानाधिकरण्यस्वा-वच्छेदकसम्बन्धावच्छिन्नत्वस्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन। स्व -वृत्तित्वञ्च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनेति तु तत्त्वमिति।

ननु प्रकारान्तरानुसरणे इत्यस्य यद्रूपा-वच्छिन्नविषयत्वं प्रकृतानुमितिप्रतिबन्धकतायाः अनतिरिक्त-वृत्ति तद्रूपत्वमित्यर्थकताया वक्तव्यतया तादृशयद्रूपाव-च्छिन्नविषयतायाः संशयादौ सत्त्वेन प्रकृतानुमिति-प्रतिबन्धकतातिरिक्तवृत्तितया असम्भववारणाय एव यथार्थपदसार्थक्यसम्भवे कथं तस्य व्यर्थत्वमभिहितमिति चेन्न, जलं वह्न्यभावविरोधीतिज्ञानकालीनस्य ह्रदो जलवान् वह्न्यभाववान् वेत्यादिज्ञानस्य संशयत्वात्तस्य च सर्वांशे यथार्थतया तदीयविषयिताया अनुमितिप्रतिबन्धकता-तिरिक्तवृत्तित्वेन असम्भववारणाय यद्रूपावच्छिन्नविषयि-तायां निश्चयवृत्तित्वविशेषणस्य आवश्यकतया संशयमादाय दोषासम्भवेन यथार्थपदस्य सुतरां वैयर्थ्यात्। न चाहार्याप्रामाण्यज्ञानास्कन्दितज्ञानवारणाय तत्सार्थक्यमिति वाच्यम्, वह्निमान् ह्रद इतिज्ञानोत्तरं यत्रेच्छाप्रयोज्यं वह्न्यभाववान् ह्रद इतिज्ञानं जातं तादृशज्ञानस्यापि सर्वांशे यथार्थात्मकताहार्यतया तद्वारणाय अनाहार्यत्वस्य, यत्र भाविज्ञानमप्रमेत्यप्रामाण्यज्ञानं ततो वह्न्यभाववान् ह्रद इति

निश्चयः ततोऽतीतज्ञानमप्रमेतिज्ञानं तत्राप्रामाण्यज्ञानद्वय-पुटितबाधनिश्चयस्य यथार्थस्य वारणायाप्रामाण्यज्ञानाना-स्कन्दितत्वस्यापि निश्चयविशेषणताया आवश्यकत्वात् तद्वारणायापि तत्सार्थक्यासम्भवादिति ध्येयम्।

अत्र स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताक-पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वह्निनत्वादिगतैकत्व-वृत्तिर्या विशेष्यता तन्निरूपितदोषपदप्रयोज्यप्रकारतायां प्रमानिरूपितत्वापत्तिरिति पर्यवसितार्थः। आपत्त्याकारस्तु तादृशविशेष्यतानिरूपितदोषपदप्रयोज्यप्रकारत्वं यद्यनुमिति-कारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वावच्छिन्नं स्यात् तदा प्रमानिरूपितं स्यादिति।

ननु अखण्डाभावघटकतयैव सार्थक्यसम्भवे कथं तस्य वैयर्थ्याभिधानमिति चेन्न, प्रकृतानुमितिप्रतिबन्धकता-वृत्तिर्योऽभावस्तदीया या अवच्छेदकत्वनिष्ठा प्रतियोगिता तन्निरूपितप्रतियोगितात्वावच्छिन्नावच्छेदकतानिरूपितभेद-त्वावच्छिन्नावच्छेदकतानिरूपिता आधेयतात्वावच्छेदकता-निरूपिता या याथार्थ्यसमानाधिकरणा निश्चयत्वाव-च्छिन्नावच्छेदकता तन्निरूपितविषयितात्वावच्छिन्नावच्छेद-कतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्मव -त्त्वं हेत्वाभासत्वमेतादृशलक्षणानुसारेण वैयर्थ्यमाशंकितं न तु अभावप्रतियोगितावच्छेदकतया याथार्थ्यस्य निवेशानु-

सारेणेति। तदुक्तं दीधितिकृता – “अथ विशिष्टविषयकं ज्ञानं प्रतिबन्धकम्, तद्घटकं च न विशिष्टमिति चेत्, तर्हि यथार्थेति व्यर्थं भ्रमविषयविशिष्टस्याप्रसिद्धत्वाद् इत्यनुशयेनाह यदिति।”[7]

केचित्तु संशयान्यत्वस्य अनाहार्यत्वस्य अप्रामाण्यज्ञानानास्कन्दितत्वस्य च तत्तद्व्यक्तित्वेनाभावप्रवेशे गौरवम् अतोऽभावविशिष्टान्यत्वमेव यद्रूपावच्छिन्नविषयकनिश्चयविशेषणम्, वैशिष्ट्यञ्च स्वाभाववत्त्वस्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयितानिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपकताकविषयितावत्त्वोभयसम्बन्धेन, एवञ्च अप्रामाण्यज्ञानद्वयपुटितबाधनिश्चयवारणाय अभावविशिष्टान्यत्वस्य लाघवान्निवेशनीयतया तत एव यथार्थपदवैयर्थ्यमिति प्राहुः। वस्तुतो अभावविशिष्टान्ययद्रूपावच्छिन्नविषयताशालिनिश्चयत्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमित्येवं यथार्थपदाघटितं लक्षणं वक्तव्यम्। तादृशविषयतायामभाववैशिष्ट्यञ्च स्वप्रतियोगिमन्निष्ठत्वस्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन, प्रतियोगिता च विशेष्यत्वसामानाधिकरण्योभयस्वरूपान्यतरसम्बन्धेनेत्यपि वदन्ति।

ननु आद्यस्य दुष्टहेतुलक्षणत्वे दोषेषु अतिव्याप्तिः, तेषामपि अनुमितिविरोधियथार्थज्ञानविषयत्वात्। न च ह्रदादिपक्षकवह्न्यादिसाध्यस्थले वह्न्यभाववद्ध्रदादिरूप-दोषाणामपि दुष्टहेतुतया दुष्टत्वमेवेति वाच्यम्, तद्रूपावच्छिन्नपक्षकतद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुक-स्थले तेन रूपेण दुष्टस्य लक्षणं यदि तद्रूपावच्छिन्न-पक्षसाध्यहेतुकानुमितिविरोधियथार्थज्ञानविषयत्वमात्रं तदा ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्न-हेतुकानुमितिप्रतिबन्धकप्रमाविषयवह्न्यभाववद्ध्रदादीनां धूमत्वादिना दुष्टत्वाभावादतिव्याप्तिरित्याशङ्का परिजिहिर्षुः तादृशाभावप्रतियोगिनां ज्ञानमिति षष्ठीसमासमाश्रीत्य तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वमर्थं व्या-ख्यास्यति, तच्च ज्ञायमानदोषस्य प्रतिबन्धकतामते एव सङ्गच्छते। तदुक्तं दीधितौ, “तत्र तृतीयमिव प्रथममपि ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य। तदर्थश्च तादृशाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थ-ज्ञानविषयत्वम्”[8] इति।

तृतीयलक्षणस्य सर्वमते एव ज्ञायमानदोषप्रति-बन्धकतामताभिप्रायकतया दृष्टान्तत्वेनोपन्यासः। प्रतियोग्य-न्तेन व्यभिचारादिदोषानादाय लक्षणं सङ्गमनीयमिति

दर्शयितुं व्यभिचारादय इति, न तु तेन रूपेण लक्षणघटकत्वमित्यवधेयम्। एवं च यथार्थपदानुपादाने दुष्टत्वभ्रममादाय प्रकृतहेतुभिन्नेऽतिप्रसङ्ग इति यथार्थपदसार्थक्यम्। तदुक्तं चन्द्रकलाटीकायाम् – "यद्यपि प्रतियोगित्वमपि प्रतियोगिभेदेन भिन्नमेवेति एकोपादानेऽपरस्यासंग्रहो दुष्परिहारस्तथापि प्रतियोगि-तायाः प्रतियोगितावच्छेदकस्वरूपत्वमभिप्रेत्य एवेत्यमभि-हितमिति ध्येयम्। यथार्थपदानुपादाने पर्वतो वह्निमान् धूमादित्यादिसद्धेतौ पर्वते वह्निसाधने धूमो दुष्ट इति व्यवहारस्तु न सम्भवति, व्यवहारं प्रति व्यवहर्त्तव्यज्ञानस्य जनकतया व्यवहर्त्तव्यस्य पर्वतपक्षकवह्निसाध्यकधूम-हेतुकानुमितिप्रतिबन्धकप्रकारकज्ञानविशेष्यत्वस्य तादृशानु-मितिप्रतिबन्धकव्यभिचारबाधाद्यप्रसिद्ध्याप्रसिद्धत्वेन तादृ-शव्यवहर्त्तव्यज्ञानासम्भवादिति यथार्थपदसार्थक्यमि"[७]ति।

यद्यपि पर्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नसाधने धूमत्वावच्छिन्नो दुष्टः इत्यादेः सद्धेतौ दुष्टत्वव्यवहारस्य नापत्तिः, तत्र तत्पक्षसाध्यहेतुकानुमितिप्रतिबन्धकरूपदोष-प्रकारकज्ञानविषयत्वस्यैव प्रत्येतव्यत्वात्, तादृशानुमिति-प्रतिबन्धकबाधव्यभिचारादेश्च अप्रसिद्धत्वात्, ह्रदादौ वह्न्यादिसाधनमादाय च सर्वत्र दुष्टत्वव्यवहार इष्टः, तथापि

धूमसाधने वह्निनत्वेनायं दुष्ट इत्यादौ वह्निनत्वावच्छिन्न-हेतुकधूमाद्यनुमितिप्रतिबन्धकदोषप्रकारकज्ञानविषयत्वस्य प्रत्ययात् वक्ष्यमाणसम्बन्धावच्छिन्नतादृशानुमितिप्रति-बन्धकधूमाभाववद्वृत्तित्वविशिष्टवह्न्यादिरूपदोषप्रकारता-शालिभ्रममादाय रासभादितात्पर्येणापि तथा व्यवहारः स्यात्। तदुक्तं चन्द्रकलायाम् – “धूमाभाववद्वृत्तित्व-विशिष्टवह्न्यादिरूपव्यभिचारस्य स्वज्ञानविषयप्रकृतहेतुता-वच्छेदकवत्त्वसम्बन्धेन वह्न्यादावेव वर्त्तमानतया तेन सम्बन्धेन तादृशव्यभिचाराभाववति रासभे तत्सम्ब-न्धावच्छिन्नव्यभिचारप्रकारताकभ्रमीयविशेष्यत्वरूपदुष्टत्वस्य रासभे सत्त्वात् रासभतात्पर्येण धूमसाधने अयं दुष्ट इति व्यवहारः स्यात्, यदि यथार्थपदोपादानं न स्यादित्याशयः”[10] इति।

ननु धूमसाधने वह्निनत्वेनायं दुष्टः इत्यादौ वह्निनत्वपदोत्तरं तृतीयार्थो वैशिष्ट्यं तच्च समवायरूपं तस्य च अनुयोगितासम्बन्धेन इदन्त्वावच्छिन्ने विशेष्ये रासभ एव अन्वयस्यावश्यकतया रासभे च तादृशवह्निनत्व-समवायानुयोगित्वस्यासत्त्वात् व्यवहर्तव्यस्याप्रसिद्ध्या कथं तादृशव्यवहार इत्याशंकते गदाधरः, “न च विशेष्ये तृतीयान्तार्थवह्निनत्ववैशिष्ट्यभावाद्रासभे तद्बाधेन नायमति-प्रसङ्ग इति वाच्यम्, तथा सति दोषपदार्थघटकानुमितौ

वह्निनत्वाववच्छिन्नहेतुकत्वालाभात् तल्लाभानुरोधेन हेतु-प्रकारकज्ञानजन्यानुमितिप्रतिबन्धकरूपदोषपदार्थघटकहेतौ वह्नित्ववैशिष्ट्यरूपतृतीयान्तार्थस्य, तत्प्रकारतायां वाव-च्छिन्नत्वार्थकतृतीयान्तलभ्यवह्नित्वावच्छिन्नत्वस्यान्वयेति अस्यैव उपगन्तव्यत्वात्। न च विशेष्ये वह्नित्वा-दिधर्मवैशिष्ट्यबोधकपदसमभिव्याहारस्थले दोषार्थक-धातोरेव वह्नित्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकोऽर्थः, अथवा अनुमित्यर्थकसाधनशब्दस्यैव वह्नित्वाद्यवच्छिन्न-हेतुकानुमितिरूपविशेषलाक्षणिकत्वम्, दुष्धात्वर्थे अनुमित्य-न्तर्भावे साधनपदार्थानन्वयप्रसङ्गात्, तथा च विशेष्य एव तृतीयार्थवैशिष्ट्यान्वयोपगमान्नोक्तातिप्रसङ्ग इति वाच्यम्, एवमपि वह्निना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारस्य भ्रममादाय अतिप्रसङ्गादि"[11] ति यथार्थपदसार्थक्यम्।

अत्र मन्मतं हि यद्यपि भ्रमविषये साध्याभावादौ अतिव्याप्तिवारणाय यथार्थपदसार्थक्यमिति भणितं तथापि तन्न युक्तियुक्तम्। कारणं हि तुल्यरीत्या प्रमाविषयेऽपि साध्याभावादौ अतिव्याप्तिः स्यात्। यथा अनुमितिकारणीभूताभावप्रतियोगिवह्न्यभाववान् पर्वत इति भ्रमविषयत्वं वह्न्यभावे वर्तते तथैव अनुमिति-कारणीभूताभावप्रतियोगिवह्न्यभाववान् ह्रद इति

प्रमाविषयत्वमपि वह्न्यभावे वर्तते। तत्रत्यातिव्याप्तिवारणाय यो हि प्रकारोऽनुष्ठीयते तेनैव भ्रमविषये साध्याभावादौ अतिव्याप्तिवारणं सम्भवति, अतः यथार्थपदमनावश्यकम्। यद्वा प्रत्येकं साध्याभावादेर्हेत्वाभासतापत्तिः स्यात्। तथाहि तत्र प्रतिबन्धकीभूतप्रमाविषयत्वस्य सत्त्वादतो यथार्थ-पदाघटितं किमपि लक्षणं करणीयं, तच्च गङ्गेशोपाध्यायस्य द्वितीयहेत्वाभाससामान्यलक्षणं "यद्विषयकत्वेन लिङ्ग-ज्ञानस्यानुमितिविरोधित्वं तत्त्वम्"[12] इति शम्।

## तथ्यसूत्रम्-

1. सामान्यनिरुक्तिप्रकरणम्। सम्पा. सुधाकरमालवीय, पृ.-०९
2. सामान्यनिरुक्तिप्रकरणम् (चन्द्रकला-कलाविलासटीकाद्वयसमेतम्), पृ.-५५
3. तदेव
4. सामान्यनिरुक्तिः। सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ.-१५८५
5. तदेव, पृ.-१५८५-१५८६
6. प्रागेव। सम्पा. सुधाकरमालवीय, पृ.-७२-७५
7. प्रागेव। सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ.-१५८५
8. तदेव

9. प्रागेव (चन्द्रकला-कलाविलासटीकाद्वयसमेतम्), पृ.-७३-७४

10. तदेव

11. प्रागेव। सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ.-१५८९

12. सामान्यनिरुक्तिप्रकरणम्। सम्पा. वामाचरणभट्टाचार्य, पृ.-०३

## परिशिलीतग्रन्थाः -

१. गौतम। न्यायसूत्र(१)। सम्पा. फणिभूषण तर्कवागीश। कोलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २०१२ । मुद्रित।

२. गदाधरभट्टाचार्य। गादाधरी। सम्पा. प. श्रीकीर्त्यानन्द झा। बाराणसी: चौखाम्बा संस्कृत सीरीज, २०१० ।

३. गादाधरीसामान्यनिरुक्तिः। सम्पा. डा. सुधाकरमालवीय। बाराणसी: चौखाम्बा संस्कृत भवन, २००७ ।

४. तर्कालंकार, जगदीश। सामान्यनिरुक्तिप्रकरणम्। सम्पा. यादवेन्द्रनाथ भट्टाचार्य। कोलकाता : संस्कृत ग्रन्थालय, १९६५ ।

५. न्यायपञ्चानन, विश्वनाथ। न्यायसिद्धान्तमुक्तावली। सम्पा. श्रीकृष्णावल्लभाचार्य। बाराणसी : चौखाम्बा संस्कृत सीरीज, २०११ ।

६. सामान्यनिरुक्तिसौगन्ध्यम्। सम्पा. डा. राजाराम शुक्ल। बाराणसी: सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, २००३ ।

७. सामान्यनिरुक्तिप्रकरणम्। सम्पा. वामाचरण भट्टाचार्य। बाराणसी: श्री साधुवेला आश्रम, विजया दशमी सम्बत् २०१० ।

# वैयाकरणदिशा कर्तृस्वरूपविमर्श:

**चिरञ्जित् घोष:**

विद्यावारिधि-शोधच्छात्र: रामकृष्णमिशन्विद्यामन्दिरस्य

**(*निबन्धनिर्यासः*-**
स्वातन्त्र्यं प्रधानीभूतधात्वर्थं प्रत्याश्रयत्वमिति दीक्षितमतस्य तथा च धात्वर्थव्यापाराश्रयत्वमिति कौण्डभट्टमतस्य तत्तट्टीकाकारानुसारेण विमर्शोऽत्र विहित:। नागेशेन तु ते मते खण्डिते भाष्यप्रमाणमुपदर्श्य। नागेशेन न्यायमतमपि खण्डितम्। तत्खण्डनखण्डनविषये नैयायिकानां युक्तिमध्ये किञ्चिद्वैषम्यमस्ति। तन्मध्ये भवानन्दस्य मते एव चारुत्वमस्ति। तथापि अचेतने कर्तृत्वविषये लक्षणास्वीकरणरूपगौरवन्तु स्थास्यत्येव। प्राचीनवैयाकरणानां तथा च कृत्याश्रयत्ववादिनां मतं खण्डयित्वा नागेशेन स्वमतमुपस्थापितम्। प्राचीनवैयाकरणमतापेक्षया तन्मतं कथं ग्रहणीयमिति विषये अत्र चर्चा वर्तते। किञ्च, अत्र चर्चायां नागेशप्रदत्तव्याख्यानस्य तात्पर्यार्थ: आलोचितो विद्यते।)

कर्तृकारकविषये आचार्यपादेन पाणिनिना सूत्रद्वयं विरचितम्। तत्रैकं तावत् 'स्वतन्त्र: कर्ता'[1], अपरञ्च 'तत्प्रयोजको हेतुश्च'[2] इति। परवर्तिनि काले सूत्रद्वयमधिकृत्य बहुविधं व्याख्यानं समुपस्थापितम्। एतेषां व्याख्यानानां सुस्पष्टतया विश्लेषणेन कर्तृकारकस्य विवर्तनं विज्ञायते।

स्वतन्त्रस्य तथा च तत्प्रयोजकस्यापि कर्तृत्वात् किं नाम स्वातन्त्र्यमिति पृच्छायां दीक्षितेन तदीयायां प्रौढमनोरमायामुच्यते– 'प्रधानीभूतधात्वर्थं प्रत्याश्रयत्वं स्वातन्त्र्यम्'[3] इति। अतो धातोर्य: प्रधानार्थस्तदाश्रय: एव स्वतन्त्र:। धातो: प्रधानार्थस्तु व्यापार:। तेन व्यापाराश्रयत्वं स्वातन्त्र्यमिति फलति।

ननु प्राधान्यं नाम मुख्यविशेष्यताश्रयत्वमिति चेन्न प्रयोज्यव्यापारे तदभावात्। तथा हि प्राधान्यपरिष्करणविषये हरिदीक्षितेन शब्दरत्ने उक्तं- 'प्राधान्यञ्च कर्तृप्रत्यय-समभिव्याहारे धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताना-श्रयधात्वर्थत्वम्'[4] इति। अत्र धात्वर्थनिष्ठप्रकारतानिरूपित-विशेष्यताश्रयत्वमित्येतावन्मात्रोक्तौ तु 'गो: पयो दोग्धि चैत्र:' इत्यत्र पयस: कर्तृत्वापत्तिर्विभागावच्छिन्नक्षरणानु-कूलव्यापारस्य दुहधात्वर्थत्वेन पयसो विभागनिष्ठप्रकारता-

निरूपितविशेष्यतारूपक्षरणाश्रयत्वात्। तद्वारणाय प्रकारतानाश्रयत्वमिति निवेशः। तेन धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वमिति। क्षरणस्य तु विभागनिष्ठप्रकारताश्रयत्वात् तदाश्रयस्य पयसो न कर्तृत्वापत्तिः। ननु प्रकारतानाश्रयत्वमित्येवोपादीयते चेन्न प्रयोज्यव्यापारे तदभावात्। विशेष्यतानिरूपितप्रकारतानाश्रयत्वमित्येतावन्मात्रोक्तावपि दोषः तदवस्थ एव। किञ्च, धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वमित्युक्तेऽपि न तद्दोषान्मुक्तिः। तस्मात् धात्वर्थत्वमित्यन्ते निवेशनीयम्।[5] अत्र च प्रत्यासत्तिन्यायेन तत्त्वं निवेशनीयम्।[6] तेन धातौ तत्त्वं निवेश्य तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमित्येव समीचीनम्। तत्त्वाभावे तु 'यज्ञदत्तेन देवदत्तः तण्डुलं पाचयति' इत्यादौ णिजन्तधातुविषये प्रयोज्यव्यापारस्य प्रयोजकव्यापाराधीनत्वात् णिजन्तस्य धातोः प्रकृतौ प्राधान्याभावस्तथा च तदाश्रयस्यापि कर्तृत्वाभावः। अत्र तत्त्वनिवेशे तु णिजन्तस्य तत्प्रकृतिकधातोश्चोभयोर्धात्वर्थव्यापारयोः स्वस्वार्थं प्रति स्वातन्त्र्यात् प्रयोज्यस्यापि कर्तृत्वं सिद्ध्यति। तेन ण्यन्तपाचिधात्वर्थप्रधानीभूतव्यापाराश्रयस्य तथा च अण्यन्तपच्धात्वर्थप्रधानीभूतव्यापाराश्रयस्योभयोरेव कर्तृसंज्ञा। अतो

ण्यन्तपाचिधातोर्व्यापारस्य तथा चाण्यन्तपच्धातोर्व्यापारस्य प्रधानत्वेन विवक्षणात् 'यज्ञदत्तेन देवदत्त: तण्डुलं पाचयती'त्यत्र ण्यन्तव्यापाराश्रयस्य यज्ञदत्तरूपप्रयोजकस्य तथा चाण्यन्तव्यापाराश्रयस्य देवदत्तरूपप्रयोज्यस्योभयो: कर्तृसंज्ञा। ननु पाचिधातोर्दशगण्यामुपदेशाभावात् विक्लित्त्य-नुकूलव्यापारानुकूलव्यापाररूपो य: प्रधानीभूतव्यापार: स तु नैव धात्वर्थस्तथा चात्र पचेर्प्रधान्याभाव इति चेन्न 'सनाद्यन्ता धातव:'[7] इत्यनेन पाचेरपि धातुसंज्ञाविधानात्।[8] तथा चात्र पचेर्प्राधान्यन्तु धातौ तत्त्वनिवेशनेनैव प्रतिपादितम्। ननु स्वतन्त्रत्वेन प्रयुक्तस्य पच: धातुसंज्ञास्ति। अत्र धातु: 'पाचि' इत्येव, न तु 'पच्' इति। यद्यपि पाचिमध्ये एव पजस्ति तथापि प्रत्ययविशिष्टपाचेरेव धातुसंज्ञा न तु तदन्तर्भूतस्वतन्त्रस्य पच:। तर्हि तत्तद्धात्वर्थेति पङ्क्तिः कथमिति चेदुच्यते, विषयेऽस्मिन्तत्तद्धातुत्वं योग्यताव-च्छेदकवत्त्वेन बोध्यम्। तेन पच: मध्येऽपि धातुत्वरूपयोग्यतासत्त्वात् तदर्थभूतव्यापाराश्रयस्य कर्तृत्वे न काप्यनुपपत्ति:। किञ्च, 'पाचि' इत्यत्रान्तर्भूतस्य पचे: धातुत्वमुपजीव्य-विरोधन्यायेनापि सिद्ध्यति इति मन्ये। तथोक्तं भट्टोजिदीक्षितेन 'हेतुमति च' इति सूत्रस्य वृत्तौ-

'प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात्' इति। अत्र धातुत्वमुपजीव्यं णिच्प्रत्ययस्तु उपजीवक:। उपजीवकस्तु स्वोपजीव्यस्य विघातक: भवितुं नार्हति। तेन 'सनाद्यन्ता धातव:' इत्यनेन णिजन्तपाचे: धातुसंज्ञायामपि मूलभूतपचि: धातुत्वं न जहात्येव।

ननु 'तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रय-तद्धात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति चेन्न 'देवदत्तेन तण्डुल: पच्यते' इत्यादौ कर्मप्रत्ययस्थले प्रधानीभूत-व्यापाराश्रयतण्डुलादौ कर्तृत्वापत्तिप्रसङ्गात्। अत्र नैयायिका देवदत्तवृत्तिव्यापारजन्यविक्लित्त्याश्रयस्तण्डुल इत्येवं शाब्दबोधं स्वीकुर्वन्ति। 'देवदत्तवृत्तिव्यापारजन्या तण्डुल-निष्ठा विक्लित्ति:' इति तु वैयाकरणनव्या:। तेन प्रधानीभूतव्यापाराश्रयस्य तण्डुलस्य कर्तृसंज्ञा स्यादिति चेन्नानिष्टप्रसङ्गात्। तथा हि 'कर्तृप्रत्ययसमभिव्याहारे' इति निवेशनीयम्। तेन 'देवदत्त: पचती'त्यादौ कर्तृप्रत्यय-समभिव्याहारस्थले पच्यर्थप्रधानीभूतव्यापाराश्रयो देवदत्त एव न तु तण्डुल:। अतो देवदत्तस्यैव कर्तृसंज्ञा न तु तण्डुलस्य। अत्र स्मर्तव्यं यत् स्वातत्र्यनिरूपणप्रसङ्गे कर्तृप्रत्यय-

समभिव्याहाररूपविशेषणन्तु दीक्षितेन नोक्तम्। शब्दरत्नकारप्रयुक्तविशेषणमिदं नागेशेनापि दीक्षितकृत-व्याख्यानस्याशयरूपेण स्वीकृत्य व्याख्यातम्। नन्वत्र कर्तृप्रत्ययस्य ज्ञानं कर्तुर्ज्ञानाधीनम्। तथा च कर्तुर्ज्ञानं कर्तृप्रत्ययज्ञानाधीनं यदि स्यात्तर्ह्यत्रान्योन्याश्रयो दोष: इति चेन्न, कर्तृप्रत्ययसमभिव्याहारेण सर्वत्र कर्तृत्वनिर्णयाभावात्। कर्माभिधानविषये प्राप्तस्य कर्तृत्वस्य वारणायैवैतत्। अधुना 'देवदत्तेन तण्डुल: पच्यते' इत्यत्र तु कर्मप्रत्ययो वर्तते। बुद्धिविपरिणामेनात्र कर्तृप्रत्ययप्रदानादनन्तरं देवदत्तस्यैव प्रधानधात्वर्थव्यापाराश्रयत्वं प्रतीयते। अतोऽन्योन्याश्रयदोष-प्रसङ्गो निरस्त:। अत: सिद्धान्तकौमुद्यां तत्तट्टीकाकारा-नुसारेण चरमस्वतन्त्रार्थ: 'कर्तृप्रत्ययसमभिव्याहारे तद्धा-त्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थव्यापारा श्रयत्वं स्वातन्त्र्यम्' इति इत्थं निरूपित:।

कौण्डभट्टेन तदीये वैयाकरणभूषणसारे सुबर्थनिर्णय-प्रकरणे तृतीयाविभक्तेरर्थनिर्णयप्रसङ्गे स्वातन्त्र्यं प्रतिपादितम्। तन्नये तृतीयार्थ आश्रय:। तेन धात्वर्थ-व्यापाराश्रयस्यैव कर्तृत्वम्। तथा च स्वातन्त्र्यमपि।[९] ननु स्वातन्त्र्यमितरव्यापारानधीनव्यापारवत्त्वमिति चेन्न 'स्थाली

पचती'त्यादौ स्थालीस्थधारणरूपव्यापारस्य देवदत्तादिचेतनव्यापाराधीनत्वात्। तेन स्वातन्त्र्यं व्यापाराश्रयत्वमिति चेन्न करणस्यापि व्यापाराश्रयत्वात्। अतो व्यापाराश्रये करणेऽतिव्याप्तिवारणाय धात्वर्थ: इति पदं निवेशनीयम्। ननु धात्वर्थाश्रयं स्वातन्त्र्यमित्युक्तं चेन्न कर्मण्यतिप्रसङ्गात्। अत: लक्षणे क्रमेणोभयोर्धात्वर्थव्यापारयो: सन्निवेश:। तेन धात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति फलितम्। तथोक्तं हरिणा - 'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते'[10] इति। अत्र क्रियापदं प्रधानव्यापारपरम्। अतो धात्वर्थरूपप्रधानव्यापारस्याश्रयो यस्तस्यैव कर्तृसंज्ञा। तेन स्थाल्यादीनामचेतनानामपि कर्तृसंज्ञा। तथा च स्थाल्यादीनामचेतनानां कृत्याश्रयत्वाभावात् कृत्याश्रयवादिनैयायिकानां मतमपि निरस्तं, कृते: चेतननिष्ठत्वात्। कृधातो: तृचि सौ कर्ता इति रूपम्। कृधातोरर्थ: कृति:, तृजर्थ आश्रय:। तेन कृत्याश्रय: कर्ता। वैयाकरणास्तु आश्रयस्तृतीयार्थ:। प्रसङ्गेऽस्मिन्नेव नैयायिकवैयाकरणयोर्मध्ये विवाद: कृतिर्यदि तृतीयार्थ: स्यात्तर्हि 'रथेन गम्यते' इत्यादावचेतने रथे कृतेरभावेऽपि कथं तृतीया? नैयायिकै: अत्र लक्षणा स्वीक्रियते तत्तु वैयाकरणनये

गौरवायैव। धात्वर्थव्यापाराश्रयत्वस्य कर्तृत्वस्वीकारे तु अचेतने पदार्थे लक्षणाया: प्रयोजनं नास्ति।

अत: कर्तृत्वं विवक्षाधीनमेव। बुद्धिविपरिणामेन विवक्षया वैकस्यैव पदार्थस्यावस्थाभेदात् कर्तृकर्मादि-विशिष्टसंज्ञा भवितुमर्हन्ति। इदमत्रावधेयं यत् कौण्डभट्टेनापि कर्तृप्रत्ययसमभिव्याहाररूपविशेषणविषये किमपि नोक्तम्। भूषणसारदर्पणकारेण हरिवल्लभेन तु 'अन्ये तु'[11] इत्यादिग्रन्थे 'कर्तृप्रत्ययसमभिव्याहार' इति पदं निवेश्य स्वातन्त्र्यं व्याख्यातम्। किञ्च, तेन नागेशप्रदत्तं व्यापारतावच्छेदकसम्बन्धरूपविशेषणमपि व्याख्यातम्। विषयेऽस्मिन् मन्यते क्रियाया: कालाधारत्वात् देशाधारत्वाद्वा कालदेशादावतिव्याप्त्यादिदोषवारणाय व्यापारतावच्छेदक-सम्बन्धादिविशेषणेनैव स्वतन्त्रार्थपरिष्करणमावश्यकम्। अत: कौण्डभट्टप्रदत्ते व्याख्याने न्यूनता वर्तते। परन्तु तट्टीकाकारेण तदीयलक्षणस्याशयपरिष्करणप्रसङ्गे तत्त-त्पदानां निवेशनं कृतम्।

प्रसङ्गेऽस्मिन्नुल्लिख्यते यद्धातूत्तराख्यातेन यगाद्य-समभिव्याहृतेन यद्धात्वर्थान्वितयादृशधर्मवत्त्वं बोध्यते तादृशधर्मवत्त्वमेव तत्क्रियाकर्तृत्वमिति वैयाकरणानामा-

शयरूपेण कारकचक्रकारेण यदुक्तं तत्तु भट्टोजिदीक्षितस्य तथा च कौण्डभट्टस्य मतानुयायि इति मन्ये। स्थाल्याद्यचेतनपदार्थे साक्षात्कर्तृत्वमादाय मतमिदं तेन दूषितम्। वैयाकरणमते अचेतनपदार्थस्यापि साक्षात्कर्तृत्वमस्ति। कृत्याश्रयत्ववादिनां नैयायिकानां नये तु तन्न, तत्राभियुक्तानां लक्षणां विना कर्तृपदाप्रयोगात्।[12] वस्तुतस्तु कृते: चेतननिष्ठत्वात् स्थाल्यादावचेतने तदभावात् तेषां नये तत्र लक्षणा स्वीकर्तव्या। वैयाकरणनये तु अचेतनेऽपि व्यापारसत्त्वात् तत्र सक्षात्कर्तृत्वस्य नानुपपत्ति:। अत: वैयाकरणपक्षे एव लाघवं, नैयायिकानां लक्षणापक्षे तु गौरवमस्ति, यदि मुख्यतयैव प्रयोगस्यास्योपपत्ति: भवेत् तर्हि लक्षणाया: प्रयोजनं नास्ति।

पुन: कारकचक्रकारेण 'कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वमि'तिकर्तृकारकान्तरयोर्मध्ये सम्बन्धविषयकं यल्लक्षणमुक्तं तत्तुनैयायिकानाम्। मतमेतदव्याप्तिदोषेण दूषयता कारकचक्रकारेण खण्डितं-सर्वेषामीश्वरप्रयोज्यानां कारकान्तराप्रयोज्यत्वाभावात्।[13] परवर्तिनि काले स्वतन्त्रत्वविषये गदाधरभट्टाचार्यप्रदत्तस्य लक्षणस्यापि उपर्युक्तलक्षणेन सह सादृश्यमस्ति। तद्यथा- 'स्वतन्त्रत्वञ्च कारकान्तरव्यापारानधीनव्यापारवत्त्वे सति

कारकत्वमि'ति। परन्तु, अत्र मन्ये भट्टाचार्यपादस्य मतस्य यदि 'कारकान्तरव्यापारानधीनत्वेन विवक्षिते सति व्यापारवत्त्वम्' इत्येवं रूपेण व्याख्यानं भवेत्तर्हि न तद्दोषावकाश: इति, सर्वेषां ईश्वरप्रयोज्येऽपि व्यवहारदशायां तदविवक्षितत्वात्।

नागेशेन तदीयायां लघुमञ्जूषायां सुबर्थविचारप्रकरणे तृतीयाविभक्तेरर्थनिर्णयप्रसङ्गे कर्तु: स्वरूपमुपस्थापितं, 'कर्तृकरणयोस्तृतीया' इत्यनेन तृतीयाविभक्ते: कर्त्रर्थत्वात्। 'स्वतन्त्र: कर्ते'त्यनेन कर्तृसंज्ञाबोधितकर्तृत्वशक्तिमत्त्वं हि कर्तृत्वम्। तन्नये सा शक्तिश्च कर्तृप्रत्ययसमभिव्याहारे व्यापारतावच्छेदकसम्बन्धेन तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रये वर्तते।[14] ननु सूत्रे 'स्वतन्त्र: कर्ता' इत्येतावन्मात्रोक्ते: कथमुक्तप्रकारकतया बोध इति चेत्तत्रोच्यते उक्तप्रकारेण धात्वर्थाश्रयत्वमेव स्वातन्त्र्यम्।

उपर्युक्तलक्षणे प्रकारतानाश्रयेति धात्वर्थविशेषणम्। विशेषणरहितशुद्धधात्वर्थाश्रयस्यैव स्वातन्त्र्यम्। 'देवदत्तस्तण्डुलं पचति' इत्यत्र पचेरर्थ: विक्लित्त्यनुकूलव्यापार:। धात्वर्थनिष्ठो यो विशेष्य:

(व्यापार:), तत्र स्थिता या विशेष्यता (व्यापारता) तन्निरूपित: (व्यापारतानिरूपित:) य: प्रकार: (विक्लित्ति:) तन्निष्ठा प्रकारता (विक्लित्तिता) तदाश्रयो विक्लित्ति: तदनाश्रय: व्यापार:। अतो व्यापाराश्रयस्य देवदत्तस्यैव कर्तृसंज्ञा। विषयेऽस्मिन् चेतनाचेतनयोर्मध्ये न कोऽपि भेदो वर्तते। तेनाचेतनस्थालीस्थयत्नविषये पचेर्विवक्षा यदि भवेत्तर्हि तस्य स्वतन्त्रत्वविषये न कापि विप्रतिपत्ति:। तेन 'रामो गच्छति' इतिवत् 'स्थाली पचती'त्यस्यापि प्रयोग:।

कस्यापि पदार्थस्य धात्वर्थत्वाश्रयत्वन्तु कालिकाद्यवच्छेदकसम्बन्धेनैव; क्रियाया: कालाश्रितत्वात् देशाश्रितत्वाद्वा। तेन 'घटो भवती'त्यत्र कालस्य देशस्यापि वा कर्तृत्वं स्यात्, कालस्य देशस्य वा सर्वाश्रयत्वादिति चेन्न, तत्र 'व्यापारतावच्छेदकसम्बन्धेन' इति विशेषणं निवेशनीयम्। तेन तत्सम्बन्धेनैव धात्वर्थाश्रयत्वं न तु कालिकाद्यवच्छेदकसम्बन्धेन।[15] तद्यथा 'घटो भवति' इत्यत्र व्यापारवत्त्वाद्घटस्यैव कर्तृसंज्ञा, न तु कालादे:, तेषां व्यापारतावच्छेदकसम्बन्धेन कार्याजनकत्वात्। कालादि-

विशिष्टशब्देन तद्व्यापारनिर्देशे तु तेषां कर्तृत्वे न काप्यापत्ति:। तद्यथा 'काल: पचति भूतानी'ति।

ननु सामग्रीसाध्यायां क्रियायां सर्वेषां साधनानां स्वस्वव्यापारे स्वातन्त्र्यात् 'स्वतन्त्र: कर्ता' इत्यत्र 'स्वतन्त्र:' इति पदं कथमन्यव्यावर्तकमिति चेत्तत्रोच्यते प्रागुक्तेन व्यापारतावच्छेदकसम्बन्धेन धात्वर्थाश्रयत्वे तु स्वतन्त्रस्यान्यव्यावर्तकत्वमवश्यमेवास्ति प्रागुक्तस्य स्वातन्त्र्यस्य युगपत्सर्वेष्वभावात्। व्यापारता-वच्छेदकसम्बन्धेन धात्वर्थाश्रयस्त्वेकस्मिन् वाक्ये एक एव पदार्थ: भवितुमर्हति। तेन तस्यैव स्वतन्त्रसंज्ञा नान्येषाम्। अतो यस्य व्यापारो धातुनाभिधीयते तस्यैव कर्तृसंज्ञा।

'रूपवन्तं गच्छती'त्यत्र रूपमस्यास्तीति रूपवान्, तं रूपवन्तं, कर्मणि द्वितीयाविभक्ति:। नन्वत्र धात्वर्थसंयोगरूपफलाश्रयत्वात् कर्मणो रूपवत: कर्तृत्वं प्रसक्तमिति चेत् मैवं, गम्यर्थसंयोगे धात्वर्थत्वसत्त्वेऽपि तदर्थव्यापारनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वात् तदना-श्रयत्वाभावाच्च संयोगरूपगम्यर्थाश्रयत्वेऽपि रूपवति कर्तृत्वस्य नातिव्याप्ति:। अतस्तद्धात्वर्थनिष्ठविशेष्यता-निरूपितप्रकारतानाश्रयेति विशेषणं प्रदेयम्।[16] किञ्च,

रूपवत्पदार्थैकदेशरूपाश्रयत्वेनापि कर्मणो रूपवत: कर्तृत्वं निवारितम्। तत्र रूपे रूपवन्निष्ठविशेष्यतानिरूपित-प्रकारताया अभावात् तादृशप्रकारतानाश्रयत्वात् कर्तृत्वं स्यादिति चेत् मैवं, रूपस्य धात्वर्थत्वाभावात्।

कस्यापि पदार्थस्य व्यापारतावच्छेदकसम्बन्धेन तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रय त्वेऽपि स्वातन्त्र्यनिरूपणन्तु कर्तृप्रत्ययसमभिव्याहारे एव। कर्मप्रत्यये तथा भावप्रत्यये कर्तृत्वन्तु बुद्धिस्थ-कर्तृप्रत्ययमवलम्ब्य उक्ततद्धात्वर्थाश्रये एव वर्तते। तद्यथा 'पक्वस्तण्डुलो देवदत्तेने'त्यत्र 'पक्व' इति पचे: कर्मणि क्त:। अत्र देवदत्तीय-व्यापारजन्यविक्लित्त्याश्रयाभिन्नस्तण्डुल इति बोध:। अत्र देवदत्तगतव्यापारस्य तद्धात्वर्थविक्लित्तिनिष्ठ-विशेष्यतानिरूपितप्रकारताश्रयत्वात् कर्तृत्वं न स्यादिति चेत्तत्रोच्यते कर्तृप्रत्ययसमभिव्याहारे व्यापारनिष्ठविशेष्यता-निरूपितप्रकारतानाश्रयत्वात् कर्तृत्वमसन्दिग्धम्।[17] प्राचीन-वैयाकरणनये तु कर्मप्रत्ययेऽपि व्यापारस्यैव विशेष्यत्वात् तत्र दोषाभाव:। हरिदीक्षितेन तदीये शब्दरत्ने कर्तृप्रत्यय-समभिव्याहारे इत्यस्य प्रयोग: कृत:। नागेशेनापि हरिदीक्षितमतमनुसृतवान्।

नैयायिकनये कृत्याश्रय: कर्ता। तत्राश्रय: प्रकृतेरर्थ:, कृतिस्तृतीयार्थ:। वैयाकरणनये तु तन्न कृतेरपि धातुलभ्यत्वात् 'रथेन गम्यते' इत्यादावचेतने कृत्याश्रयत्वाभावाच्च। ननु शाब्दिकनये कृतेरपि धातुलभ्यत्वात् गुरुतरभारोत्तोलनादिविषये क्रियाया: अनिष्पत्तावपि तत्र कृतिसत्त्वात् तदाश्रयत्वाच्च कर्तृत्वापत्तिरिति चेन्न, कर्तृसंज्ञाविषये सति सम्भवे तद्धात्वर्थकृतिव्यापारोभयाश्रयत्वसमानाधिकरण एव कर्तृताशक्तिस्वीकरणात्।[18] तद्धात्वर्थकृतिव्यापारोरुभयाश्रयत्वन्तु चेतने एव न त्वचेतने, कृतेरभावात् तत्र व्यापाराश्रयत्वेनैव कर्तृत्वम्। चेतने चैत्रादौ तु गुरुतरभारोत्तोलनादिविषये उभयाश्रयत्वेनैव कर्तृत्वम्। तत्र कृतिसत्त्वेऽपि क्रियाया: अभावो यदि स्यात्तर्हि तत्र न कर्तृत्वापत्ति: इति वैयाकरणनव्या:। ननु नैयायिकनये तत्रापि कर्तृत्वापत्ति: स्यात् कृत्याश्रयत्वादिति चेन्न, तेषां नये तत्र कृतिसत्त्वे मानाभावात्। अत्राशयपरिष्करणप्रसङ्गे लघुमञ्जूषाया: कलाकारेणोक्तम्– '...यत्नस्यातीन्द्रियतया कार्यानुमेयत्वेन उक्तविवक्षाया अनुयोगम्...'[19] इति। अत्र गुरुतरभारोत्तोलनादिविषये कृतिसत्त्वे मानाभावात् तदाश्रयत्वाभावाच्च कर्तृत्वाभाव:। मन्येऽत्र नैयायिकयुक्तौ

सूक्षेक्षिकाया: अभावो वर्तते। अत्र कृतिसत्त्वमनुभवसिद्धं, तदभावे तु तद्व्यापारे प्रवृत्तेरभावात्। प्रसङ्गेऽस्मिन् कारकचक्रकारस्य भवानन्दस्याशयस्तु तद्विषयककृतित्वेऽपि क्रियानिष्पत्तेरभावादेवात्र कर्तृत्वाभाव:। तथोक्तं तेन- 'तत्क्रियानुकूलकृतिमत्त्वं कर्तृत्वम्'[20] इति। मन्ये तद्विषये कृतिसत्त्वे मानाभावरूपयुक्त्यपेक्षया भवानन्दमहोदयस्य युक्ति: अधिका चारुतरा।

वैयाकरणनये कृतिव्यापारोभयाश्रयत्वसमानाधिकरणस्य कर्तृत्वस्वीकारे तु 'मत्तो भूतं न तु मया कृतमि'त्यस्यानुपपत्ति:, अत्र कृतिव्यापारोभयाश्रयत्वसमानाधिकरणत्वेन कर्तृत्वस्यानिषेधात्। तथा च पिष्टकभक्षणकाले नान्तरीयकतया पिष्टकमध्यस्थशर्कराभोक्तरि कर्तृत्वव्यवहार: स्यात्। अस्या: शङ्काया: निराकरणाय कृत्यर्थपरिष्करणं कृतं वैयाकरणनव्यै:। धात्वर्थकृतिस्त्वत्र साध्यत्वाख्यविषयतया कृतिविषयैव ग्राह्या।[21] धात्वर्थकृतेर्विषय: तत्साध्यफलम्। अत: साध्यत्वाभिन्नविषयतायुक्ता हि कृति:। अत: 'मत्तो भूतं न तु मया कृतमि'त्यत्र साध्यरूपकार्ये कृतिविषयत्वाभावत्वमस्त्येव। तेनोभयसमानाधिकरणत्वाभावात् कर्तृत्वनिषेधाच्च प्रयोगस्य

नानुपपत्ति:। तथा च नान्तरीयकृतिसाध्यत्वेऽपि साध्यत्वाख्यविषयत्वाभावात् पिष्टकमध्यस्थशर्कराभक्षणे नातिव्याप्ति:। अत्र साध्यत्वाख्यविषयत्वन्तु पिष्टके एव। तेन पिष्टकभोजने एव तस्यासक्ति: न तु शर्कराभक्षणे। यदि शर्कराभक्षणे तस्यासक्ति: स्यात्तर्हि शर्करागुणान्वितस्य यस्य कस्यापि पदार्थस्य भक्षणे एव तस्यासक्ते: समाप्ति: सञ्जाता, तर्हि पिष्टकेन किमपि प्रयोजनं न स्यात्, विशेषाभावात्। तत्तु न। पिष्टकभोजने एव साध्यत्वाख्यविषयत्वसत्त्वात् 'पिष्टकभोजनं करोमी'त्यस्य प्रयोगो, नान्तरीयसाध्यत्वेऽपि साध्यत्वाभिन्नविषयताभावात् शर्करायां नातिव्याप्ति:। वस्तुतस्तु चैत्रादिकर्तृमध्ये पिष्टकमध्यस्थशर्कराभक्षणे बाह्यप्रचेष्टारूपव्यापारत्वेऽप्यान्तरचेष्टाविशेषरूपकृतिस्तु पिष्टके एव। अत: साध्यत्वरूपविषयतायुक्तकृत्याश्रयस्य कर्तृत्वस्वीकरणात् यत्र कर्मणि तत्साध्यत्वाभिन्नविषयता वर्तते तत्रैव 'कृत:' इति प्रयोगो, न त्वन्यत्र। व्याख्यानेनानेन कृतिव्यापारयोरभेदवादिनां मतमपि निरस्तम्, आन्तरचेष्टाविशेषस्यैव कृत्यर्थकत्वात्।

कृत्याश्रयत्ववादिनां खण्डनादनन्तरमेव भट्टपाद: नागेश: प्राचीनवैयाकरणानां मतं खण्डयितुं प्रवर्तते। प्राचीनास्त्वत्र दीक्षितभूषणकारादय:।[22] नागेशनये स्वातन्त्र्यविषये तेषामाशयस्त्वेवं 'कर्तृप्रत्ययसमभिव्याहारे व्यापारतावच्छेदकसम्बन्धेन तद्धात्वर्थनिष्ठविशेष्यता-निरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रयत्वं स्वातन्त्र्यमि'ति। सर्वस्यास्य विशेषणपदस्य तत्तद्व्याख्यानेऽसत्त्वेऽपि अव्याप्त्यादिदोषदूरीकरणाय तत्तदवश्यमेव निवेशनीयं व्याख्यानप्रामाण्यात्। परन्तु, भट्टपादेन नागेशेन दीक्षितसम्प्रदायस्य तथा च कौण्डभट्टस्य स्वातन्त्र्यपरिष्करणं नैव स्वीकृतम्। स्वातन्त्र्यविषये एतेषां खण्डनात् पूर्वं तेन स्वमतमुपस्थापितम्। भाष्यप्रामाण्यमाधारीकृत्य स्वातन्त्र्यांशे स्वसिद्धान्तं द्विधोपस्थापितं तेन। आदौ तु 'तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं स्वातन्त्र्यमि'ति।[23] 'तद्धात्वर्थ:' नाम प्रकृतपचादिधातो: विक्लित्त्याद्यर्थ:। तद्धात्वर्थीयस्तु तद्धात्वर्थसम्बन्धी। अत: विक्लित्त्या-दिधात्वर्थसम्बद्धकर्मादिसाधनान्तराणां प्रवर्तक: स्वतन्त्र:। एतदर्थस्तु 'कारके'ति सूत्रभाष्यात् प्रतीयते। तत्र राजामात्ययो: दृष्टान्तेन स्वातन्त्र्यं परिष्कृतम्। राज्ञ: समवाये

अमात्यस्य परतन्त्रत्वेऽपि स्वनिष्ठव्यापारविषये तस्य स्वातन्त्र्यमस्त्येव। एतेन प्रयोजकेसन्निहितेऽपि प्रयोज्यस्य स्वातन्त्र्यं प्रतिपादितम्। कर्ता एव प्रधान:। कर्मादीनां साधनान्तराणां प्रवर्तयिता स एव। तथा च स प्रवृत्तिविषये किञ्च निवृत्तिविषयेऽपि स्वेच्छाधीन:। अत: प्रवृत्तिनिवृत्तिविषये स्वेच्छाधीनत्वेऽपि तन्मध्ये स्वातन्त्र्यमस्ति। तथोक्तं नागेशेन स्वतन्त्रस्य द्वितीयस्वरूपम्। तद्यथा 'स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि स्वातन्त्र्यम्' इति।[24] प्रयोजके सन्निहितेऽपि प्रवृत्त्यादिक्रियाविषये स्वातन्त्र्यात् प्रयोज्यस्य कर्तृत्वम्। किञ्च, प्रयोजकेसन्निहितेऽपि तत्क्रियायां प्रयोज्यस्य स्वप्रयोजनमस्त्येव। यदि स्वप्रयोजनं न स्यात्तर्हि प्रयोजके सन्निहितेऽपि तस्य प्रवृत्तिरपि न स्यात्। सर्वमेतत् भाष्ये 'कारके' इति 'स्वतन्त्र: कर्ता' चेति सूत्रव्याख्यानप्रसङ्गे आलोचितं, तत्तु पूर्वं मयापि व्याख्यातम्। तथा च वाक्यपदीयेऽपि भाष्याशय: सुस्पष्टतया प्रतिपादित:। अत: तन्नये कारकचक्रप्रयोक्तरि स्वेच्छाधीनप्रवृत्तिनिवृत्तिके च स्वतन्त्रशब्दप्रवृत्ति:। तत्रैव कर्तृता। स्वतन्त्रस्यार्थोऽयन्तु लोकादेव प्रतीयते न तु व्याकरणात् कोशाद्वा।

वस्तुत: स्वतन्त्रस्त्वकृत्रिम:। यदि कृत्तिम: स्यात्तर्हि टिघुभादिवत् स्वतन्त्रस्यापि संज्ञिनिर्देश: स्यात्। स तु नात्र विहित:। अत: लोकप्रसिद्धार्थ एवात्र विवक्षित:। अत: व्याकरणशास्त्रे अन्यत्राविधानात् स्वतन्त्रस्य लौकिकार्थस्यैव ग्रहणं न तु कस्यापि पारिभाषिकार्थस्य। यद्यपि स्वातन्त्र्यं प्रधानीभूतधात्वर्थं प्रत्याश्रयत्वमिति दीक्षितमतेन तथा च धात्वर्थव्यापाराश्रयत्वमिति कौण्डभट्टमतेन सह नागेशमतस्य किमपि विशिष्टवैसादृश्यं नास्ति तथाप्याभ्यां मताभ्यां स्वातन्त्र्यं पारिभाषिकमित्यर्थ: सूच्यते। परन्तु मुनित्रयेनात्र लौकिकार्थस्य स्वीकरणात् तथा च लौकिकार्थस्वीकारे लाघवात् पुन: पारिभाषिकार्थस्वीकार: अनावश्यक:। किञ्च, अनयोर्लक्षणयोर्न्यूनताप्यस्ति, कर्तृप्रत्ययसमभिव्याहार-रूपविशेषणाभावात्। तत्तु मनोरमाटीकाकारेण शब्दरत्न-कारेण तथा च भूषणटीकाकारेण हरिवल्लभेन किञ्च नागेशेनापि तदीये लघुशब्देन्दुशेखरे स्वीकृत्य व्याख्यातम्। निष्कर्षोऽयं यत् बोधसौकर्य्यात्, लाघवात्, त्रिमुनि-विरोधाभावाच्च कारकचक्रप्रयोक्तरि तथा स्वेच्छाधीन-प्रवृत्तिनिवृत्तिके चैव स्वतन्त्रशब्दस्य प्रवृत्ति:। किञ्च, वाक्यपदीयकारेणापि अर्थस्यास्यैव परिष्करणं कृतम्।

स्वतन्त्रशब्दस्य लौकिकार्थत्वस्वीकारेऽपि स्वेच्छाधीनप्रवृत्तिनिवृत्तिरूपस्वतन्त्रस्य मुनित्रयाभिप्रेतस्याशयं वक्तुकामेन भट्टपादेन नागेशेन यद्व्याख्यानं प्रस्तुतं तत्तु किञ्चिद्विचारणीयमस्ति इति मन्ये। इच्छाया: चेतननिष्ठत्वेन 'स्थाली पचति', 'रथो गच्छति' इत्यादावचेतने स्वेच्छाधीनत्वाभावात् कर्तृत्वं कथमत्र संगच्छते? नन्वत्र स्वनिष्ठव्यापारापेक्षया स्वातन्त्र्यसत्त्वात् स्वतन्त्रस्य पारिभाषिकार्थ: एव स्यान्न तु लौकिकार्थ: इति चेन्न त्रिमुनिविरोधप्रसङ्गात्। परन्तुलौकिकार्थे स्वीकृतेऽपि नागेशेन यदुक्तं तत्त्वचेतनादावभावात् कथं संगच्छते? पारिशेष्यन्यायेन किमत्र नैयायिकरीत्या लक्षणा स्वीकर्तव्या? तन्न, विषयेऽस्मिन्मन्यते 'धातो: कर्मण: समानकर्तृकादिच्छायां वा'[25] इति सूत्रस्य व्याख्यायाम् 'आशङ्कायामचेतनेषूपसंख्यानमि'ति[26] न्यूनतापूर्तिवार्तिकप्रसङ्गे 'सर्वस्य वा चेतनवत्त्वादि'ति[27] वार्तिकमस्ति। अत्रात्माद्वैतदर्शनेन सर्वस्य चेतनवत्त्वं स्वीकृतम्।[28] तेन सर्वस्य चेतनत्वेन स्थाल्यादिष्वपि इच्छासत्त्चात् न काप्यनुपपत्ति:। प्रसङ्गेऽस्मिन्नुल्लिख्यते स्वातन्त्र्यस्यारोपितानारोपितभेदेन द्वैविध्यं समुपस्थापितं नागेशेन।[29] तत्र स्थाल्यादावारोपित-

स्वतन्त्रता, पुरुषे अनारोपितस्वतन्त्रता। यस्य स्वातन्त्र्यं विवक्ष्यते तद्व्यापार एव धातुना प्राधान्येनोच्यते। यथा स्थाली पचतीत्यादौ स्थाल्यां सम्भवनक्रियाकर्तृत्वरूपं धारणक्रियाकर्तृत्वरूपं च स्वातन्त्र्यं विवक्ष्यते। तथाहि सम्भवनधारणरूपतद्व्यापार एव पचिर्वर्तते। अत्र त्वारोपितकर्तृत्वमारोपितव्यापारसमुदायाश्रयात्। अत्र सम्भवनधारणरूपव्यापारे व्यापारसमुदायारोपो वर्तते। अनारोपितव्यापारसमुदायस्याश्रयो भवति वास्तविककर्ता। ननु 'धातो: कर्मण:..' इति सूत्रभाष्यप्रामाण्यात् सर्वस्यापि चेतनवत्त्वात् स्थाल्यादावपि मुख्यकर्तृता स्यात्, तेनारोपितानारोपितभेदस्वीकारे सति भाष्यविरोध: स्यादिति चेन्न, सर्वस्मिन् चैतन्यमात्मसाक्षात्कारापेक्षत्वात्। तत्र समानत्वन्त्वात्मसाक्षात्कारपेक्षया। तेन सर्वेषां जनानां व्यवहारार्थं पक्षोऽयम्। तेन स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं स्वातन्त्र्यमित्यत्र स्वेच्छाधीनत्वेन प्रवृत्तिनिवृत्ती यत्र विवक्ष्यतेतत्रैव स्वातन्त्र्यमित्येवं व्याख्यातव्यम्। तेन ईश्वरेच्छाधीनत्वेऽपि स्वेच्छाधीनत्वेन विवक्षायां कर्तृत्वं सिद्ध्यति। किञ्चात्र प्रवृत्तिनिवृत्ती यत्रान्यनिरपेक्षत्वेन विवक्ष्येते तत्रैव स्वातन्त्र्यमित्येवं तात्पर्यार्थोऽपि स्वीकर्तुं शक्यते व्याख्यानसामर्थ्यात्। तेन रथादावचेतनेऽपि न कोऽपि संशयावकाश:। एतेन आत्माद्वैतदर्शनमनवलम्ब्यैव

चेतनाचेतनोभयत्रापि मुख्यतयैव कर्तृता सम्भवति। अत: विषयेऽस्मिन् सिद्धान्तोऽयं यत् स्वतन्त्रस्य लौकिकार्थस्यैव स्वीकरणं कर्तव्यं, न कस्यापि पारिभाषिकार्थस्य। तथा च 'स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं स्वातन्त्र्यमि'ति नागेश-प्रदत्तस्य स्वतन्त्रार्थस्य 'प्रवृत्तिनिवृत्त्यो: अन्यनिरपेक्षत्वेन विवक्षितं स्वातन्त्र्यमि'त्यर्थे तात्पर्यं स्वीकरणीयमिति शम्।

**तथ्यसूत्राणि -**

1. अष्टाध्यायां१/४/५४।
2. तत्रैव १/४/५५।
3. प्रौढमनोरमायां ८७९ तमे पृष्ठे, द्वितीय संस्करण वैक्रमाब्द २०५१।
4. तत्रैव शब्दरत्ने।
5. तत्रैव भावप्रकाशे।
6. तत्रैव भावप्रकाशे।
7. अष्टाध्याय्यां ३/१/३२।
8. लघुशब्देन्दुशेखरे १६४ तमे पृष्ठे, २००२।
9. वैयाकरणभूषणसारे १६६ तमे पृष्ठे, २०१३।
10. तत्रैव।
11. तत्रैव दर्पणटीकायाम्।
12. कारकचक्रे २५ तमे पृष्ठे, २००८।

13. कारकचक्रे २२ तमे पृष्ठे, २००८।

14. वैयाकरणसिद्धान्तलघुमञ्जूषायां द्वितीयभागे १२४२ तमे पृष्ठे, २००४।

15. तत्रैव।

16. तत्रैव।

17. तत्रैव।

18. वैयाकरणसिद्धान्तलघुमञ्जूषायां द्वितीयभागे १२४३ तमे पृष्ठे, २००४।

19. तत्रैव।

20. कारकचक्रे २५ तमे पृष्ठे, २००८।

21. वैयाकरणसिद्धान्तलघुमञ्जूषायां द्वितीयभागे १२४३ तमे पृष्ठे, २००४।

22. तत्रैव कलाटीकायां १२४५ तमे पृष्ठे ।

23. तत्रैव १२४४ तमे पृष्ठे।

24. तत्रैव १२४५ तमे पृष्ठे।

25. अष्टाध्यायां ३/१/७।

26. महाभाष्ये तृतीयखण्डे २८ तमे पृष्ठे, २०१४।

27. तत्रैव २९ तमे पृष्ठे।

28. तत्रैव प्रदीपटीकायाम्।

29. महाभाष्ये द्वितीयखण्डे उद्योतटीकायां २७९ तमे पृष्ठे, २०१४।

## अवलोकितग्रन्थाः -

१. अमरसिंह. अमरकोष. सम्पा. गुरुनाथविद्यानिधि भट्टाचार्य. कोलकाता: संस्कृत पुस्तक भाण्डार, १४१७.

२. उमाशंकर शर्मा ऋषि. संस्कृत-व्याकरण में कारक तत्त्वानुशीलन. वाराणसी: चौखाम्बा सुरभारती प्रकाशन, २०११.

३. एन्. एस्. रामानुजताताचार्य. शाब्दबोधमीमांसा. निउ दिल्ली: राष्ट्रिय संस्कृत संस्थान, २००६.

४. कौण्डभट्ट. वैयाकरणभूषणसार. सम्पा. चन्द्रिका प्रसाद् द्विवेदी. वाराणसी: चौखाम्बा संस्कृत प्रतिष्ठान,२०१३.

५.नागेशभट्ट. लघुशब्देन्दुशेखर. सम्पा. तेजःपालशर्मा. वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालय,२००२.

६. नगेशभट्ट. वैयाकरणसिद्धान्तलघुमञ्जूषा. सम्पा. नन्दिता वन्द्योपाध्याय. कोलकाता: संस्कृतपुस्तकभाण्डार, २००४.

७. पतञ्जलि. व्याकरणमहाभाष्यम्. सम्पा. भार्गव शास्त्री जोशी. दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, २०१४.

८. पाणिनि. अष्टाध्यायी. सम्पा. तपनशङ्कर भट्टाचार्य. कलकाता: संस्कृत वुक डिपो, २०१२.

९. भट्टाचार्य, गदाधर. व्युत्पत्तिवाद. सम्पा. हरेरामत्रिपाठी. निवदेहली: राष्ट्रियसंस्कृतसंस्थानम्, २००६.

१०. भट्टाचार्य, जगदीशतर्कालङ्कार. शब्दशक्तिप्रकाशिका. सम्पा. दुण्डिराजशास्त्री. वाराणसी: चौखाम्बा प्रकाशन, २०१३.

११. भट्टाचार्य, भवानन्द सिद्धान्तवागीश. कारकचक्रम्. सम्पा. अशोककुमार वन्द्योपाध्याय. कोलकाता: सदेश, २००८.

१२. भट्टोजिदीक्षित. प्रौढमनोरमा. सम्पा. रमाकान्त पाण्डेय. वाराणसी: चौखम्भा विद्याभवन, २००७.

१३. भट्टोजिदीक्षित. प्रौढमनोरमा. सम्पा. पण्डित भूपाल शास्त्री नेने (व्याकरणाचार्य) वाराणसी: चौखाम्बा संस्कृत संस्थान, २०५१ वैक्रमाब्द.

१४. भट्टोजिदीक्षित. वैयाकरणसिद्धान्तकौमुदी. सम्पा. गुरुप्रसादशास्त्री, सीतारामशास्त्री, बालशास्त्री. वाराणसी: चौखाम्बा सुरभारती प्रकाशन, २०१२.

१५. भर्तृहरि. वाक्यपदीयम्. सम्पा.‘पद्मश्री’पण्डितरघुनाथशर्मा. वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०००.

१६. भर्तृहरि. वाक्यपदीयेसाधनसमुद्देश. सम्पा. मृणालकान्ति गङ्गोपाध्याय. कलकाता: संस्कृत वुक डिपो, २०१३.

१७. वामनजयादित्य. काशिका. सम्पा. जयशङ्करलालत्रिपाठी, सुधाकर मालवीय. वाराणसी: ताराबुक एजेन्सी, १९८५.

१८. हालदार, गुरुपद. व्याकरणदर्शनेर इतिहास, कलकाता: संस्कृत वुक डिपो, २००६.

# वेदान्तव्याख्याने प्रणववादस्याभिनवत्वम्


## सेविका-नागः

कलिकाताविश्वविद्यालयीया संस्कृतविभागीया शोधच्छात्रा
अंशकालीनाध्यापिका च राजा-पियारी-मोहन-महाविद्यालयस्य



(*निबन्धनिर्यासः*-

वेदान्तदर्शने प्राक्शांकरदर्शनादचिन्त्यभेदाभेदवाद-पर्यन्तं सुविस्तृता अस्माकं भारतीयदर्शनपरम्परा। आधुनिकतमायां विंशशताब्द्यामपि सा प्राचीना धारा प्रवहति। श्रीओंकारनाथदेवेन (१८९१-१९८२ खिस्टाब्दः) अभिनवदर्शनमेकं प्रचारितं यद् विद्वत्समाजे प्रणववादरूपेण ख्यातम्। वस्तुतः प्रणववादोऽयं चरमाद्वैतवादः एव । येषु ग्रन्थेषु तस्य प्रणवतत्त्वमिदं प्रतिष्ठितमस्ति ते- (१) ब्रह्मसूत्रस्य ओंकारभाष्यम् (२) गीतायाः प्रणवप्रेमपीयूष-भाष्यम् (३) श्रीचण्ड्याः प्रणवप्रेमामृतभाष्यम् (४) उपनिषदां सद्गुरुकृपामृतभाष्यम् (५) ब्रह्मानुसन्धानम् (६) ओंकार-सहस्रगीतिः (७) पुरुषोत्तमश्च । अपि च प्रणवतत्त्वमिदं तस्य सार्धशताधिकेषु ग्रन्थेषु इतस्ततः विक्षिप्तरूपेण विधृतम्। मूलप्रबन्धे मूलतः ब्रह्मसूत्रोपरि कृतमोंकारभाष्यं, गीतायाः प्रणवप्रेमपीयूषभाष्यं, ब्रह्मानुसन्धानञ्चाधारीकृत्य वयमग्र-सराः

भवामः। आकरभाष्यग्रन्थस्य वैचित्र्यबाहुल्याद् विशालायतनस्य च हेतोः वयं ब्रह्मसूत्रस्य समन्वयाध्यायस्यैव कतिपयानि निर्वाचितानि सूत्राणि अवलम्ब्य तत्र पूज्यपादेन ओंकारनाथेन प्रवर्तितस्य प्रणववादस्याभिनवत्वप्रदर्शनार्थं प्रबन्धेऽस्मिन् प्रवृत्तिपरायणाः भवामः।)

भारतीयदर्शनशास्त्रपरम्परायां वेदान्तस्यावस्थानं सुप्राचीनम्। प्रस्थानत्रय्यां ये भाष्यकारास्ते आचार्या इति सामाजिकैः स्वीक्रियन्ते। यथा शंकर-रामानुज-मध्व-वल्लभ-निम्बार्कादीनां धाराः वेदान्तशास्त्रस्यान्तर्गता इति स्वीकृतम्। अतीव आमोदकारणं यत् ता धाराः अद्यावधि प्रवहति। यथा प्राचीना सन्ति तथैव नवीना धारा अपि आविर्भूय वेदान्तशास्त्रम् अद्यापि समर्धयति। तत्र श्रीसीतारामदासस्य धारापि अभिनवैका। तत्कृते ब्रह्मसूत्रग्रन्थस्योपरि रचिते ओंकारभाष्ये ओंकारवाद अभिनवप्रणववादो वा सुप्रतिष्ठापितः। प्रणवप्रसंगोऽयमुपनिषत्साहित्ये भर्तृहरिकृते वाक्यपदीये चास्माभिर्लभ्यते। कुत्र कुत्र तु प्रणवोऽयमभिनव इत्यस्माकं विचारणीयः।

ओंकारनाथमते ओंकारः प्रणवो वा पर-अपर-उभयब्रह्म। तैत्तिरीयोपनिषदि भृगुः स्वपितरं पप्रच्छ--'अधीहि भगवो ब्रह्मन्'।[१] भृगुः प्रत्युवाच--'यतो वा इमानि

भूतानि जायन्ते येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति, तद् विजिज्ञासस्व। तद् ब्रह्मेति।'[२] ईशोपनिषदि उक्तम्--'ईशा वास्यमिदं सर्वम्, यत्किञ्च जगत्यां जगत्'[३] इति। तत्र ईश शब्दस्यार्थः सर्वात्मबोधक ओंकार इति। श्रीओंकारनाथदेवमते उपनिषदां मध्ये अत्रैव ओंकारस्य प्रथमदर्शनं प्राप्यते।[४] कठोपनिषदि नचिकेतसः प्रश्नोऽयम्--अन्यत्र...तदुत्तरञ्च एवं लभ्यते--'सर्वे वेदाः यत् पदमामनन्ति, सर्वाणि तपांसि च यद् वदन्ति, यदिच्छन्तः ब्रह्मचर्यं चरन्ति, तत् पदं ते संग्रहेण ब्रवीमि ओमित्येतद्' इति। एतदेव अक्षरं हि अपरं ब्रह्म, एतदेव अक्षरं हि परं ब्रह्म। एतदेव अक्षरं हि ज्ञात्वा यो यदिच्छति तस्य तद् भवति। एतदालम्बनमपि श्रेष्ठं परमपरञ्च। एतदालम्बनं ज्ञात्वा साधकः ब्रह्मलोके महीयते। केनोपनिशदि तु ब्रह्मजिज्ञासा इत्थं दृश्यते--'केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।

'केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति॥'[५]

तत्र शंकराचार्यकृता व्याख्या यथा--'तस्माद्दृष्टादृष्टेभ्यो वाह्यसाधनसाध्येभ्यो विरक्तस्य प्रत्यगात्मविषय ब्रह्मजिज्ञासेयं केनेषितमित्यादिश्रुत्या प्रदर्श्यते।'[६] केन प्रेरितः

सन् मनः स्वविषयं प्रतिगच्छति श्रेष्ठः प्राणश्च कस्य नियोगेन गमनागमनं करोति, कस्येच्छया वा सर्वे वाक्यमुच्चारयन्तीति प्रश्नावसरे ओंकारभाष्ये उच्यते यदोंकारस्वरूपस्य ब्रह्मणः निर्देशेनैव तत्सर्वमपि सम्भवति। सः ओंकारः सर्वेषां भजनीयः।

प्रश्नोपनिषदि पिप्पलादस्योपदेशः--ऋचा, यजुर्मन्त्रेण साममन्त्रेण च विद्वांसः यं लोकं जानन्ति तद्ब्रह्मलोक ओंकारसाधनेन एव लभ्यः। यं शान्तमजरममरं चाभयं परब्रह्म सः ओंकारसाधनेनैव प्राप्तुं शक्यते इति। माण्डूक्यश्रुतावपि कथितमस्ति यद् 'ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्वमोंकार एव । यच्चान्यं त्रिकालतीतं तदप्योंकार एव।'[७] नारदपरिव्राजकोपनिषदि उक्तं यत् सर्वासामुपनिषदां मुख्यार्थ ओंकार इति। तथा चोक्तं-- 'सर्वश्रुत्यत्तमो मृग्यः सकलोपनिषन्मयः'।[८] अपि च—

'भूतं भव्यं भविष्यद् यत् त्रिकालोदितमव्ययम्।
तदप्योंकारमेवायं विद्धि मोक्षप्रदायकम्॥'[९]

मुण्डकोपनिषदि उपमया ओंकारमहिमा वर्णिता यथा--

'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन बेद्धव्यं शरवत्तन्मयो भवेत्॥'[१०] इति।

प्रणव ओंकारो धनुः। मन्त्रेऽस्मिन् जप्यः मध्यमा-ओंकारप्रसंगः प्रत्यक्षतया कथितः। छान्दोग्यपोनिषदि अपि ओंकारमहिमा परिलक्ष्यते--' य उद्गीथः स प्रणवः यः प्रणवः स उद्गीथः।'[११] 'स एष रसानां रसतमः परमः परार्द्धाऽष्टमो यदुद्गीथः।'[१२] श्रीओंकारनाथमते बृहदारण्यकोपनिषदः 'पूर्णमदः' इति मन्त्रेण ओंकारस्य सर्वात्मकत्वमेव स्थापितम्। 'पूर्णमदः' इति पदस्य परः प्रणवः सर्वव्यापीत्यर्थः तेन स्वीकृतः। 'पूर्णमिदम्' अस्यार्थश्च अपरः प्रणवः अनन्त इति। 'पूर्णात् पूर्णमुदच्यते' अर्थात् परप्रणवादपरप्रणव उद्भूतो भवति। 'पूर्णस्य पूर्णमादाय' अर्थादपरप्रणवस्यपूर्णत्वे सर्वव्यापित्वे वा गृहीते 'पूर्णमेवावशिष्यते' परप्रणव एव अवशिष्यते इत्याशयः। एवमीश-केन-कठ-माण्डूक्य-तैत्तिरीय-छान्दोग्य-बृहदारण्य-कादिश्रुतीः पर्यालोच्य श्रीओंकारनाथदेवः स्वसिद्धान्त-मुन्मोचयति- तदोंकार एव ब्रह्म। स निर्गुण-निर्वि-कार-नित्य-शुद्ध-बुद्ध-मुक्त-सत्य-ज्ञान-आनन्दस्वरूप इति। अपि च

अपरप्रणव एव ब्रह्मशक्तिः, हिरण्यगर्भ अस्य नामान्तरम्। अयमेव सूत्रात्मा, सगुण-ब्रह्म, मायाधीश्वर इत्यादिभिः नामभिः दर्शनान्तरे ख्यातः। अतः 'एकस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवति' इति न्यायेन अनेन ओंकारविज्ञानेनैव सर्वं विज्ञातं भवतीति श्रुत्याशयः अभिनवप्रणववादे उन्मोचितः। ब्रह्मसूत्रस्योंकारभाष्येऽपि स्पष्टतया उक्तं पुरुषोत्तमः ओंकार एव परब्रह्म, अपरब्रह्म आत्मा, अवताराः, निखिलदेववृन्दश्चेति स्थावरजंगमात्मकञ्च जगत्।

महारसायनमिति ग्रन्थे तेनोक्तम्-- विश्वस्य आदिस्पन्दनं प्रणव[१३] इति। अस्मात्प्रणवात् सकला सृष्टिर्जायते। जगच्च रसतम-शब्दब्रह्म-ओंकारस्य घनीभूता मुर्तिरिति। 'जन्माद्यस्य यतः'[१४] इति सूत्रस्य ओंकारभाष्येऽप्युक्तम्-- चराचर-प्रपञ्चस्यास्य सृष्टिर्भवति ओंकारादेव। तन्मते इयं पृथिवी, आकाशोऽयं, स्वर्गः, नक्षत्रं, वाक्यम्, ऋषिः, गौः, अजाश्वादयश्च सर्वमेव छन्दसः स्पन्दनादुत्पद्यन्ते। शब्दं विना स्पन्दनं न भवति। आदौ शब्दः, ततःपरं स्पन्दनं भवति। अतः अयमोंकार एव समग्रां सृष्टिं धारयति, अस्मिन्नोंकारे चैव सर्वं प्रलीयते।[१५] विचित्र-चिदचिन्मिश्र-सुखदुःखोपभोगः अस्मि-

न्नोंकारे च सम्यगवस्थितः। सृष्टेर्प्राक् केवलं परब्रह्म परप्रणवो वा आसीत्। तस्माद् अव्यक्त-एकाक्षर-ओंकारः संभूतः, तस्मादोंकारात् महत्, महतोऽहंकारः, अहंकारात् पञ्चतन्मात्रम्, पञ्चतन्मात्रायाः भूतान्युत्पद्यन्ते। ओंकारः तैरावृतः। अक्षरोऽयमोंकारः। अयञ्च अजरममरमभयममृतरूपं ब्रह्म इति। ओम् नित्यं शुद्धं बुद्धं निर्विकल्पं निरञ्जनं निराख्यातमनादिनिधनमेकं तुरीयम् यद्भूतं भवद् भविष्यत् परिवर्तमानं सर्वदाऽनवच्छिन्नं परं ब्रह्म। तस्माज्जाता परा शक्तिः स्वयं ज्योतिरात्मिका। तदात्मरूपब्रह्मणः प्रणवाद्वा आकाशः संभूतः। श्रुतिरपि इदं समर्थयति। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। एतेषां पञ्चभूतानां पतयः पञ्च। ते सदाशिवेश्वररुद्रविष्णुब्रह्माणश्चेति। तेषां मध्ये ब्रह्मविष्णुरुद्राश्च उत्पत्तिस्थितिलयानां कर्तारः। राजसो ब्रह्मा, सात्त्विको विष्णुः, तामसश्च रुद्रः।

अत्र उल्लेखनीयं यदयमोंकारः प्रणवो वा द्विविधः-- (१) परप्रणवः (२) अपरप्रणवश्चेति। कठोपनिषदा अपि एतत्प्रकारान्तरेण समर्थ्यते।[१६] अस्य परप्रणवस्य चतुर्विधाः पादाः विद्यमानाः सन्ति। ते यथा-- (१) अविद्यापादः (२) विद्यापादः (३) आनन्दपादः (४) तुरीयपादश्चेति।[१७] यदा

ब्रह्म अनुपहितं निष्क्रियं भवति तदा तस्य परब्रह्मेति संज्ञा भवति। तद्रूपो प्रणवोऽपि तदा परप्रणव इत्यभिधीयते। अनुपहिते च चैतन्ये अपरप्रणवस्यांगसकलमेव लीयते। अतस्तदा अवाङ्मनसगोचरः परब्रह्मस्वरूपात्मकः परप्रणवः जीवन्मुक्तेन योगयुक्तेन वा अनुभाव्यः।

यदा च ब्रह्म प्रकृत्या उपहितं वा प्रकृतिस्वरूपं सृजति वा तदा प्रकृति-पुरुष-महत्तत्त्व-अहंकारतत्त्व-ब्रह्मा-विष्णु-महेश्वरादि-पर्यन्तं स्थूलजगच्च सर्वमेव सगुण-ब्रह्म इति। एतदात्मकः प्रणवस्तदा अपरप्रणवः शब्दब्रह्मेति कथ्यते।[१८] श्रीमदोंकारनाथदेवेन आत्मनः पादचतुष्टयेन सह मात्राचतुष्टयस्य तादात्म्यं प्रदर्श्य प्रणवस्य आत्मनश्चाभिन्नत्वं प्रतिपादितम्। जाग्रत्-स्वप्न-सुषुप्ति-तुरीया इति आत्मनः चतस्र अवस्थाः शास्त्रप्रसिद्धाः, 'पाद'-पदेनापि परिचिताश्च। ओंकारनाथेनापि तद्वत् अ-कारः, उ-कारः, म-कार इति मात्रात्रयम् अमात्रस्वरूपा चतुर्थमात्रा च स्वीकृतम्। तत्र जाग्रदवस्थायाम् आत्मा बहिःप्रज्ञः अर्थात् बाह्यविषयस्य ज्ञाता, शब्दादिस्थूलविषयभोगी वैश्वानर इत्यभिहितम्। तस्यात्मनः प्रथमपादः ओंकारस्य वा प्रथममात्रा जाग्रदवस्थायाः अधिष्ठाता। अ-कारेण यथा समुदायवाक्यं व्याप्तं वर्तते तथा वैश्वानरेण जगत् सर्वं व्याप्तमस्ति।

वर्णानामादिः अ-कारः, पादसमूहानामादिः वैश्वानरः। अत्रैव अकारवैश्वानरयोरेकत्वप्रसंग वर्ण्यते। आत्मनः द्वितीयपादः स्वप्नावस्थायाः अधिष्ठाता, सूक्ष्मविषयस्य च भोक्ता, तैजस इति च ख्यातः। यथा अ-काराद् उ-कार उत्कृष्टस्तथा च अकार-मकारयोर्मध्यवर्ती उकार इति तथैव च जागत्स्वप्नसुषुप्तयोर्मध्यवर्ती तैजस इति। एवं तैजसोकारयोरेकत्वं वर्तते। आत्मनः तृतीयपादः सुषुप्तेरधिष्ठाता जाग्रत्स्वप्नावस्थयोश्च पृथक् पृथक्तया अनुभूतं विश्वप्रपञ्चं यत्सम्मिलितं, स आनन्दमयः, आनन्दस्य भोक्ता चेतोमुखः प्राज्ञ इति ख्यातः। सुषुप्तौ यथा वैश्वानरतैजसौ प्राज्ञे प्रविशतस्ततः जाग्रदवस्थायां तस्मात् निर्गच्छतः, एवमोंकारस्योच्चारणान्ते अकारश्च उकारश्च मकारे एकीभूतौ भवतः। तस्मात् प्राज्ञमकारयोरेकत्वं सुप्रतिष्ठितम्। आत्मनः चतुर्थः पादः 'तुरीय'शब्देनाभिहितः, यः नान्तःप्रज्ञः न तैजस इति।

यो मात्राशून्यो दर्शनातीत अव्यवहार्योऽग्राह्यः रूपरसादिपञ्चविषयस्यातीतः स जगत्प्रपञ्चस्य निवृत्तिस्थानमिति। रागद्वेषादिरहितमविक्रियं शिवं परमानन्दमद्वितीयं चतुर्थमिति यं वैदान्तिका विदन्ति स ओंकार एव आत्मा।

अस्मिन् प्रेक्षापटे जगत् यदि कार्यं स्यात्तर्हि कारणं च ओंकारो प्रणवो वा भवेत्। प्रसंगतः कार्यकारणभेदेन ओंकारो द्विविध इति ओंकारनाथस्य मतिः। कारणे परशब्दत्वात् बृहत्त्वाच्च; कार्ये शब्दत्वात् बृहत्त्वाच्च कार्यकारणे उभे एव ओंकारब्रह्म।[१९] उभौ परप्रणवापरप्रणवौ समकाले सृष्टेर्कारणरूपेण स्वीकृतम्। 'पटवच्च'[२०] इति ब्रह्मसूत्रस्योंकारभाष्ये एतद्विस्तरशः वर्णितम्। सृष्टिवर्णनाप्रसंगे श्रीओंकारनाथदेवेन ब्रह्मणो प्रणवस्य वा शब्दात्मकत्वं वर्णितम्। ओंकारभाष्ये तत्तत्त्वमित्थं वर्णितमस्ति-- पुरा चन्द्रार्कपवनशून्य आकाश अचलश्च प्रसुप्तवदभूत्। ततः तमे तमान्तरवत् सलिलमुत्पद्यत एव। यथा सलिलेन कस्यापि पात्रस्य पूरणकाले तन्मध्यस्थवायुः सशब्दं बुद्बुदाकारेण निर्गच्छति तथा तयोः वायोश्च सलिलस्य च संघर्षाद् दीप्ततेजोबलयुक्तः अग्निः आकाशं निस्तिमिरं कृत्वा प्रादुरभूत्। तत्सलिलमग्निना पवनेन च मिलित्वा समाक्षिप्तम्। मारुतसंयोगेन सोऽग्निः घनत्वमाप्नोति। तस्मिन् घनत्वप्राप्ते अग्नौ यः स्नेहांशः वर्तते सः संघातत्वात् अन्ते भूमित्वं प्राप्नोति। भूमिः सर्वस्य गन्धस्य रसस्य प्राणिनः स्नेहस्य चाश्रयः, तस्मात् सर्वे प्रसूताः भवन्ति।

कारणसलिलात् सशब्दं वायुरुत्पद्यते, ततः दीप्ततेजः हुताशनः, तदग्निप्रभावेन तरलभावा कठिनावस्था च संप्राप्ता। एतेन ज्ञायते यल्लोकसृष्टेरादौ या एषणा आसीत् सा शब्दसंभूता शब्दजातीया वा। विश्वजगत् शब्दस्य परिणाम इति वेदज्ञाः वैज्ञानिकाश्च वदन्ति। परमाणुवादिनां मते शब्दान्न भिन्नः परमाणुः, शक्तिवादिनां मते शक्तिः, विज्ञानवादिनां मते विज्ञानं शब्दाद् वेदाद्वा न भिन्नः। नामरूपविनिर्मुक्तः अर्थात् प्रलयकाले जगत् यत्रावतिष्ठते तामवस्थां केचित् प्रकृतिः, केऽपि माया अणुर्वेति निर्दिशन्ति। कालाख्या भगवच्छक्तिर्यदा परमाण्ववस्थां प्राप्ता तदा परमाणु-शब्देन, यदा च साकल्यावस्थां प्राप्ता वा तदा परममहानित्युच्यते। वस्तुतः कालः शक्तिः परमाणुरभिन्न एव। आन्तरबाह्यजगत्तु परादिचतुर्विधाः शब्दा एव एतेषां कारणम्। स्वरूपतः कार्यं कारणान्न भिन्नम्। अतएव परादिचतुर्विधाः शब्दा एव आन्तरजगत्, एते एव बाह्यजगच्च। जगदाकारेण विवर्तितस्य परमात्मनः जाग्रत् स्वप्नः सुषुप्तिः तुरीयः इति चतुर्विधा अवस्था एव यथाक्रमं शब्दब्रह्मणः वैखर्यादिचतुर्विधावस्था इति।

शब्दाज्जगत् कथं सृज्यते तद्व्याख्यानाय पूज्यपादाः नागेशभट्टमहाभागाः स्वप्रणीते मञ्जुषाग्रन्थे वदन्ति

कर्मोपभोगेन नियतकाले परिपक्वे निखिलप्राणिनि च प्रक्षीणे शब्दः स्थूलरूपं परित्यज्य स्वकारणेश्वरे प्रलीयते। लयो न प्रध्वंसस्वरूपः, अपि तु प्रादुर्भावफलकः। प्रलयावस्थायां कियत्कालं स्थित्वा क्रिया- प्रतिक्रियान्यायेन प्राणिनः सकामतया कर्माणि यदानुतिष्ठन्ति तदा तानि फलोदानोन्मुखानि भवन्ति, तदा सर्वसाक्षि-सर्वकर्मफलप्रदपरमेश्वरादबुद्धिसृष्टा माया पुरुषश्च प्रादुर्भवतः। एवं परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिः विकशते। ततः बिन्दुरूपस्य त्रिगुणात्मकस्याविर्भावो भवति। नामास्य शक्तितत्त्वं, बिन्दोरचिदंशः बीजरूपः चिदचिन्मिश्रांशः नादश्चेति। अचिदिति पदेन भय-संस्काररूपाऽविद्या लक्षिता। चैतन्याधिष्ठिता प्रकृतिः किंवा शक्तेः पुरुषकालादिव्यपदेश एव क्रियाप्रधानावस्था एव 'नाद'शब्देनाभिधेया भवति। अस्य बिन्दुनामलक्षितपदार्थस्यापरनाम शब्दब्रह्मेति। अखण्डस्य सच्चिदानन्दस्य परमात्मनः नादाभिव्यक्तनादाद्बहिः प्रकाशितावस्थायां वयं सामान्यतया शब्द इति जानीमः। अयमोंकार एव शब्दब्रह्म। अस्मादोंकारादेव जगदुत्पद्यते। नानाशास्त्रमुखादेव वयमेतादृशे निर्णये उपनीताः भवामः।

शब्द एव सर्वमूलम्, शब्द एव प्रणवः, प्रणव एव वेदः। अतः वेदः शब्दब्रह्मेति गीयते। शब्दोऽयं यस्मादादौ

स्फुटति तदेव परब्रह्म। यदा भावो शान्तो भवति तदा सृष्टिर्नास्ति। परमे शान्ते ब्रह्मणि स्वभावतः यच्चलनं दृश्यते तदेव तस्य स्पन्दनम्। एषा एव भावना, आदिभावना एव आदिस्पन्दनम्। चिदाकाशे प्रथमः शब्दः प्रणवः, तच्छब्दः यथाछन्द यथातालं चिदाकाशे प्रसरति। आदितः प्रणवः सप्तसु छन्दससु प्रसारितो भवति। तस्मात् विविधविकृतिछन्दसि अपि उद्भासितो भवति। प्रकृतिच्छन्दांसि विकृतिच्छन्दांसि च समाहृत्य जगत्। क्रमेण सप्तव्याहृतिभिः प्रणवोऽयं प्रकाशितः। अतः जगदिदं प्रणवमुर्तिरिति।

अभिनवप्रणववादे साध्य ओंकारः। अज्ञाननिवृत्तये तथा भक्तिप्रेमलाभार्थं श्रीभगवन्नाम विशेषतया उल्लिखितम्। नाम तत्र श्रीभगवत्स्वरूप इति परिगण्यते। यतः शब्दात् नाम जायते, नादाच्च जायते शब्दः। फलतः एतस्य सर्वस्य मूलमोंकार एव वाच्य-वाचक-ब्रह्म चेति श्रीमदोंकारनाथदेवस्य नवोन्मोचनम्। पतञ्जलिकृतेन योगसूत्रानुसारेण तु प्रणव एव हि वाचकः, वाच्य ईश्वरश्च।[२१] सीतारामदासकृते नादलीलामृतग्रन्थे चास्मिन् विषये तत्रभवन्तः वदन्ति यत् सूक्ष्मवागात्मनि स्थितमन्तरज्ञानं स्वकीयरूपाभिव्यक्त्ये शब्दरूपेण विवर्तितं भवति। शब्दः भेदसंसर्गवृत्तिना शक्त्या वा मनस अभिप्रायं प्राप्य तेजसा परिपक्वस्सन् प्राणवायौ प्रविशति। ततः वायुः

अन्तःकरणतत्त्वाश्रये तद्धर्माविष्टो भूत्वा तेजोरूपेण विवर्तितो भवति। अतएव शब्दः चैतन्याधिष्ठिता भेदसंसर्गवृत्तिः। नित्यकार्यभेदेन शब्दः द्विविधः। 'कार्य'शब्दः सगुण-ब्रह्म, 'नित्य'शब्दश्च निर्गुणब्रह्म अभिन्न एव।[२२] भर्तृहरिणा अप्युक्तम्-- एक एव तेजसः यथा ग्राह्यत्वं ग्राहकत्वमिति शक्तिद्वयं दृश्यते तथैव शब्दसकलस्यापि सामर्थ्यद्वयमस्ति। एतस्माच्छब्द एव ज्ञाता ज्ञेयश्च, ग्राह्य ग्राहकश्चेति।[२३]

श्रीओंकारनाथदेवमते वदनसामर्थ्यस्फुरणमेव सच्चिदानन्दब्रह्म इति। यदा शब्द उच्चार्यते परा-पश्यन्ती-मध्यमा-वैखरी इति क्रमेण शरीराधिष्ठितं ब्रह्मैव तदा प्रकाशते। स एव शब्द उपचारक्रमे नित्य इत्युक्तम्। आचार्यः शंकरोऽपि वदति दूराच्छब्दः श्रूयते न तु बोध्यते, तारत्वादेः ज्ञानमात्रं जायते-- इत्थं ज्ञानं ध्वनिरिति उच्यते इति। श्रीओंकारनाथेनात्र परिष्कृतं यच्छंकरमते ध्वनिरेव श्रवणसामर्थ्यं वा स्फोटः। तन्मते तु स्फोट एव सच्चिदानन्दब्रह्म। सुतरां ध्वनिरपि सच्चिदानन्दब्रह्मरूपम्। एतेन सच्चिदानन्दब्रह्मणा श्रवणसामर्थ्यं वदनसामर्थ्यं पश्यत्सामर्थ्यमित्यादीनि तावदिन्द्रियसामर्थ्यमवभासते। इन्द्रियसमूहाः गोलक-मात्रमेव। अतः एतेन सच्चिदानन्दब्रह्मणा चिदाकाशेन वा स्फोटरूपः शब्दः ज्ञायते। गीतायामपि उक्तं 'शब्दः खे'

आकाशस्य यद्गुणः तदहमस्मि, शब्दस्यावबोधक अपि च तत्सारभूतः यः पदार्थः स ब्रह्मचैतन्यमिति।

प्रसङ्गतः ओंकारनाथदेवकृतं वर्णनमपि अभिनवम्। तन्मते जगदिदं ब्रह्मस्वरूपमासीत्। नामरूपेण जगतः प्रकाशकाले तद्ब्रह्म ऐक्षत। 'सोऽकामयत बहुस्यां प्रजायेयेति'।२४ अत्र भवन्मते ईक्षणं चलनमिति। अयं प्रथमशब्दात्मकस्पन्दनम् ओंकारः। ओंकारस्पन्दनेनैव जगतः सृष्टिः स्थितिः लयश्चेति। सृष्टिकाले परमपदे परमाकाशे वाग्देवी वर्णपदादि रचयन् शब्दसृष्टिमकरोत्।[२५] ब्रह्मानुसन्धानमिति ग्रन्थे तत्तत्त्वं स्वातन्त्र्येण तत्रभवता उन्मोचितम्-- आदितः अनाहतः नादस्वरूपः परमात्मा परावाणीति प्राणैः मूलाधारचक्रे प्रकटति। ततः मणिपुरचक्रे नाभौ समागम्य पश्यन्ती इति मनोमयं सूक्ष्मरूपं दधाति। अनन्तरं हृद्देशे अवस्थिते अनाहतचक्रे मध्यमावाणीति व्यक्ता भवति। अतःपरं मुखमागम्य ह्रस्वदीर्घादिमात्रा उदात्तानुदात्तादिस्वरश्च क-कारादिवर्णरूपः स्थूलवैखरीशब्द-रूपेण परिणमते। यथा काष्ठे अग्नौ संयुक्ते तद्देशवर्तिनि आकाशे अग्निः उष्मरूपेण अव्यक्तरूपेण वा अवतिष्ठते, कदापि च यदा सबलमरणिकाष्ठं मथ्यते तदा वायुना अग्निः अतिसूक्ष्मस्फुलिंगरूपेण प्रकाशितो भवति। ततस्तस्मिन् घृते

प्रदत्ते सोऽग्निः वर्धितस्सन् प्रचण्डो भवति। तथैव शब्दब्रह्म ओंकाररूपेण परा-पश्यन्ती-मध्यमा-वैखरीरूपेण प्रकटितं भवति।[२६] एवं वयं पश्यामः यत्कुत्र कुत्र स्थले शंकरमतेन सह तन्मतसादृश्ये विद्यमानेऽपि ओंकारभाष्यव्याख्यानावसरे तस्याभिनवत्वं मौलिकत्वञ्च वर्तते।

**तथ्यसूत्रम् -**

(१) तैत्तिरीयोपनिषद्, ३.१ ।

(२) तदेव, तत्रैव ।

(३) ईशोपनिशद्, १ ।

(४) ब्रह्मानुसन्धान, प्रथमखण्ड, पृष्ठा-१० ।

(५) केनोपनिषद्, १ ।

(६) तदेव, शांकरभाष्यम् ।

(७) माण्डूक्योपनिषद्, १ ।

(८) नारदपरिब्राजकोपनिषद्, २ ।

(९) तदेव, २३ ।

(१०) मुण्डकोपनिषद्, २.२.४ ।

(११) छान्दोग्योपनिषद्, १.५ ।

(१२) तदेव, १.३ ।

(१३) श्रीओंकारनाथ-रचनावली, तृतीयखण्ड, महारसायन, त्रयोदशस्पन्दन, पृष्ठा- ५३ ।

(१४) ब्रह्मसूत्र, १.१.२ ।

(१५) तदेव, ओंकारभाष्यम् ।

(१६)"एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् ।

एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥"

(कठोपनिषद्, १.२.१६)।

(१७) श्रीओंकारनाथ-रचनावली, एकादशखण्ड, मातृगाथा, पृष्ठा-३०२

(१८) "शब्दब्रह्मणि निष्णातः परं ब्रह्मधिगच्छति।" (ब्रह्मविन्दूपनिषद्, १७) ।

(१९) श्रीमद्भगवद्गीता, ४.९ प्रणवप्रेमपीयूषभाष्यम् ।

(२०) ब्रह्मसूत्र, २.१.१९ ।

(२१) "तस्य वाचकः प्रणवः।" (योगसूत्र, समाधिपाद, २७ ।

(२२) श्रीश्रीनादलीलामृत, पृष्ठा- ३१ ।

(२३) "ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।

तथैव सर्वशब्दानामेते पृथगवस्थिते ॥" (वाक्यपदीय, ब्रह्मकाण्ड, ५५) ।

(२४) तैत्तिरीयोपनिषद्, २.६ ।

(२५) ऋग्वेदसंहिता, २.३.१२.१६४ ।

(२६) श्रीओंकारनाथदेवकृतानूदित- श्रीमद्भागवत, एकादशस्कन्ध, द्वादशाध्याय, १७, १८ ।

## निर्वाचितग्रन्थपञ्जी :

Bādarāyaṇa. *Vedāntadarśana*. Vol. I. Ed. Svāmi Cidghanānanda Purī & Śrī Ānanda Jhā, Kolkata: Udbodhana Kāryālaya, 1395 (baṅgābda), 2nd ed.

Bādarāyaṇa. *Brahmasūtra*. with the commentary 'Oṃkārabhāṣya' of Sītārāmadāsa Oṃkāranātha, published by Raghunātha Kāvya-vyākaraṇatīrtha, Hooghly: 1403 (baṅgābda).

Bādarāyaṇa. *Brahmasūtram*. with the commentary of Śaṃkara, Delhi: MLBD, 1st ed. Reprint, 1990.

Nāgeśa. *Spoṭavāda of Nageśabhaṭṭa*. Ed. V. Kṛṣṇamācārya, The Adyar Library and Research Centre, rpt. ed. 1977, 1st ed. 1946.

Oṃkāranātha, Sītārāmadāsa. *Śrī Śrī Nādalīlāmṛta*. Kolkata: Śrī Guru Prakāśana, 1st ed. 1397 (baṅgābda).

Oṃkāranātha, Sītārāmadāsa. *Brahmānusandhāna*. published by Padmalocana Mukhopādhyāya, Jayguru Kāryālaya, Bally, Howrah: 1368 (baṅgābda).

Oṃkāranātha, Sītārāmadāsa. *Brahmasūtram* with 'Oṃkārabhāṣya', published by Raghunātha kāvyavyākaraṇatīrtha, Dumurdaha, Hooghly: 1355 (baṅgābda).

Patañjali. *Pātañjala-yogadarśana*. Ed. Hariharānanda Āraṇya & Dharmamegha Āraṇya & Rāya Yajñeśvara Ghoṣa Bāhādura, Kolkata: West Bengal state Book Board, 7th ed. 2002.

*Ṛgvedasaṃhitā*. with 'Vaidikajīvanabhāṣyam' Maṇḍala-I, II & III. Ed. Śivanātha Āhitāgni & Śaṃkaradatta Śāstrī, Delhi: Nag Publishers, 2nd ed. 1992.

# मृच्छकटिके प्रयुक्तायाः प्राकृतभाषायाः समीक्षा

**प्रदीपकर:**

शोधच्छात्र: रामकृष्णमिशन्विद्यामन्दिरस्य

(***निबन्धनिर्यासः-***

इन्द्रियभेदमाश्रित्य दृश्यश्रव्यभेदे काव्यं तु द्विविधम्। दृश्यकाव्येषु पुनरभिनयं प्रामुख्यमयते। पात्राणां मिथः कथोपकथनं महत्त्वपूर्णस्थानमस्ति। नाट्ये उपस्थितानां चरित्राणां वार्तालापेषु यद् वैचित्र्यं सहृदयान् पाठकान् दर्शकान् च आनन्दयति तत् एव नाट्यभाषावैशिष्ट्यम्।

मृच्छकटिके नाटकीयतत्त्वानां यथोचितसन्निवेशेन समं शूद्रकस्य नाट्यभाषाप्रयोगदाक्ष्येण नाट्योत्कर्षता सार्थकतामिता। प्रकरणस्य भाषा सरला सहजा समासरहिता प्रसादगुणोपेता लोकोक्त्यादिविभूषिता च। पात्रानुकुलभाषाव्यवहारः प्रकरण-स्यास्य चमत्कारित्वं काशयति। महाकविशूद्रकेण प्रकरणेऽस्मिन् संस्कृतेन सह प्राकृतभाषायाः समुचितविन्यासो विहितः। प्रकरणस्य महानुपकारको हि प्राकृतभाषाप्रयोगः। अतः शोधप्रबन्धेऽस्मिन् मृच्छकटिकस्य प्राकृतभाषा समीक्ष्यते।)

प्रक्रियते यया सा प्रकृतिः। 'प्रकृतिः संस्कृतम्, तत्र भवं तत आगतं वा प्राकृतम्।'[१] प्राकृतशब्दस्य व्युत्पत्तिर्भवति

प्रकृति + अण्, 'तत्र भवः' (पा. ४.३.५३) तत आगतो वेति तदर्थः। मार्कण्डेयमहोदयोऽपि प्राकृतभाषाविषये स्वाभिमतं पोषयति - 'प्रकृतिः संस्कृतम्, तत्र भवं प्राकृतमुच्यते।'[२] इति।

प्राकृतभाषा न तु देशविशेषस्य निर्दिष्टा भाषा। समयपरिवर्तनेन सह अस्याः भाषायाः विकासमयी परम्परा सुसमृद्धा जाता। भरतस्य नाट्यशास्त्रे सप्त प्राकृतभाषाः समुल्लिखिताः। तथोच्यते-

'मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी।

वाह्लीकादाक्षिणात्य च सप्त भाषा प्रकीर्तिताः।।'[३]

शब्दानुशासनकारेण हेमचन्द्रेण सप्त प्राकृतभाषाः स्वीकृताः। तद्यथा- चतुर्विधा आर्यभाषा, चूलिका, पैशाची, अपभ्रंशी च। अत आचार्येणापि सप्त प्राकृतभाषाः स्पष्टीकृताः। परवर्तिनि काले प्राकृतभाषायाः विविधोपभेदाः अपि वर्णिताः भाषावैज्ञानिकैः।

संस्कृतनाटकेषु प्राकृतभाषायाः प्रयोगमयी परम्परा अतीव प्राचीना। मृच्छकटिकप्रकरणे प्राकृतभाषायाः वर्गीकरणं कृतं टीकाकारैः पृथ्वीधरवर्यैः। मृच्छकटिकप्रकरणे सप्तप्राकृतभाषा व्यवहृताः। अनेन भाषाप्रयोगेन प्रकरणस्योत्कर्षो जातः। प्रकरणेऽस्मिन् सप्त प्राकृतभाषा हि

शौरसेनी, अवन्ती, प्राच्या, मागधी, शकारी, चण्डाली, टक्की च। ताश्च महाकविशूद्रकेण समुचितभङ्ग्या वर्णिताः।

मृच्छकटिके प्रयुक्तप्राकृतभाषायाः स्वरूपमधुना पर्यालोच्यते। शौरसेनी अवन्तिका प्राच्या चेत्येतासु भाषासु दन्त्यसकारस्य प्रयोगः दृश्यते। मागधीप्राकृते तालव्यशकारः आधिक्येन प्रयुक्तः। ‘श’, ‘ष’, ‘स’ इत्येतेषु स्थानेषु ‘श’ तथा ‘र’ इत्यस्य स्थाने लकारः चण्डालीप्राकृतस्य वैशिष्ट्यम्। वकारप्रधानभाषा ढक्कीभाषा। अस्यां भाषायां स-शकारयोः प्राधान्यमस्ति। प्रकरणे शकारस्य भाषा शकारीप्राकृतभाषा। शकारीप्राकृते रकारस्य स्थाने लाकरस्य प्रयोगो भवति।

शूद्रकस्य रचनायां कालिदासीयपदलालित्यं काव्यात्मकसौष्ठवं च न समुपलभ्यते। प्रकरणकारस्य भाषा भवभूतेः काव्यसौन्दर्यरहिता। भवभूतेः पदक्लिष्टवर्जिता प्रकरणस्य भाषा। कालिदासभवभूत्योः सह शूद्रकस्य भाषायाः तुलनात्मकाध्ययनप्रसङ्गे ड. राइडार-महोदयेनोक्तम्- ‘sudraka’s style is simple and direct arare quality in a hindu and although this style, in the passages of higher emotion, is of an exquisite simplicity, yet Sudraka can not infuse into mere

language the charm which we find in Kalidasa on the majesty which we find in Bhavabhuti'[४] इति।

## 1. शौरसेनी-

शूरसेनप्रदेशस्य भाषा शौरसेनी। संस्कृतनाटके रमणी विदूषकश्च संवदतः अस्यां भाषायाम्। प्राकृतमिदं लौकिकसंस्कृतसदृशम्। नाट्यशास्त्राचार्येण भरतेन शौरसेनीभाषायाः प्रयोगविधानं कृतम्-

'नायिकानां सखीनां च शूरसेना विरोधिनी'[६] इति।

<u>मृच्छकटिके शौरसेनीभाषायाः स्वरूपविश्लेषणम्</u> –

प्रकरणेऽस्मिन् सूत्रधारः नटी रदनिका मदनिका वसन्तसेना वसन्तसेनामाता चेटी कर्णपूरकः धूता शोधनकः श्रेष्ठी च इत्येकादशपात्राणि प्राकृतमिदं संव्यवहरन्ति।

क) अस्मिन् प्राकृते श-षकारयोः स्थाने दन्त्यसकारो भवति। तद्विधायकं सूत्रम् - 'शेषोः सः' इति।

| <u>शकारः</u> | <u>सकारः</u> |
|---|---|
| आ<u>शा</u>सन्ताम् | आ<u>सा</u>सेदु[७] |
| <u>शू</u>न्यहृदयत्वेन | <u>सु</u>ण्णहिअ अत्तणेण[८] |
| प्रवि<u>शा</u>मि | पवि<u>सा</u>मि[९] |
| हता<u>श</u> | हदा<u>स</u>[१०] |

| षकारः | सकारः |
|---|---|
| प्रदोषः | पदोसे[११] |
| असंबद्धभाषकः | असंबद्धभासअ[१२] |
| भूषिता | भूसिदा[१३] |
| विषमभराक्रान्ता | विसमभरक्कन्ता[१४] |

ख) शौरसेन्यां तु दन्त्यसकारस्य परिवर्तनं न जायते।

| प्राकृतम् | संस्कृतम् |
|---|---|
| परिहसिस्सं | परिहसिष्यामि[१५] |
| सुअन्धं | सुगन्धं[१६] |
| पडिवसदि | प्रतिवसति[१७] |
| सच्चं | सत्यम्[१८] |

ग) मृच्छकटिके शोधनकवसन्तसेनयोः प्राकृतवाक्ये शकारस्य प्रयोगबाहुल्यं प्रसज्यते।

| प्राकृतवाक्यानि | संस्कृतवाक्यानि |
|---|---|
| वामदो तशश गेहं | वामतस्तस्य गृहमिति।[१९] |
| एसो रट्टिअशालो | एष राष्ट्रियश्यालः |
| कुविदो भणादि | कुपितो भणति[२०] |

घ) शौरसेनीप्रकृते तु रेफवर्णस्य परिवर्तनं नावलोक्यते।

अपरिवर्तितरेफवर्णोदाहरणानि

| | |
|---|---|
| पञ्चवर्णकुसुमोपहारशोभिता | पञ्चबण्णकुसुमोवहारसोहिदा[२१] |
| शरणागताभ्युपपन्ना | सरणाअदाअब्भुववण्णा[२२] |

परं मृच्छकटिके रकारस्य लकाररूपेण परिवृतिः लक्ष्यते स्थानविशेषानुसारम्। प्रकरणस्य नायिकायाः वसन्तसेनायाः उच्चारणे 'रकारः' इति स्थाने लकार इति रूपं प्राप्यते।

| रकारः | लकारः |
|---|---|
| बलात्कारानुनीयमाना तव गेहं प्रविष्टा | बलक्कलाणुणीअमाणा तुह गेहं पविट्ठा[२३] |
| दरिद्रपुरूषसंक्रान्तमनाः खलु गणिका | दलिहपुरिससंकन्तमणा कखु गणिआ[२४] |

ङ) संस्कृते प्रथमाविभक्तेः एकवचनार्थे प्रयुक्तस्य प्रत्ययस्य स्थाने प्राकृतेऽस्मिन् 'ओ-प्रत्ययो भवति।

| प्रथमाविभक्तेरेकवचनम् | ओप्रत्ययः |
|---|---|
| पारलौकिकः | पारलोइओ[२५] |
| प्रदीपः | पदीवो[२६] |
| राजवल्लभः | राअवल्लहो[२७] |

व्याकरणस्य नियमानुसारं शौरसेनीप्राकृते दन्त्यसकारस्य प्रयोगः सन्दृश्यते। परन्तु मृच्छकटिकस्य शौरसेनीप्राकृते तालव्यशकारस्य व्यवहारः परिदृश्यते।

## 2. अवन्ती-

अवन्तीदेशस्य भाषा अवन्तीप्राकृतभाषा। शौरसेनीभाषातः अवन्तीभाषायाः समुद्भव इति विदां वादः। सप्तप्रधानप्राकृतभाषासु अवन्तीति परिगण्यते।

मृच्छकटिके अवन्तीप्राकृतस्य स्वरूपम्-

अवन्तीति प्राकृतस्य प्रयोगं प्रकरणेऽस्मिन् चन्दनकः वीरकश्च कुरुतः।

क) प्राकृतेऽस्मिन् श-षवर्णयोः स्थाने सवर्णः जायते। तद्विधायकं च सूत्रं - 'शेषोः सः' इति। उदाहरणानि-

| शकारः | सकारः |
|---|---|
| शङ्का | सङ्का[२८] |
| शीलमृगाङ्कं | सीलमिअङ्कं[२९] |
| संशयः | संसओ[३०] |

| | |
|---|---|
| विशुद्धा | विसुद्धा[३१] |
| षकारः | सकारः |
| उद्यानेषु | उज्जाणेसु[३२] |
| घोषे | घोसे[३३] |
| राजाज्ञैषा | राअअण्णा एसा[३४] |
| पुरूषाणां | पुरिसाणं[३५] |

ख) अवन्तीप्राकृतभाषायां 'लवर्णः' संस्कृते अपरिवर्तितरूपेण संलक्ष्यते।

| संस्कृतम् | प्राकृतम् |
|---|---|
| तिलकभूतौ | तिलअभूदा[३६] |
| बलपतिः | बलवई[३७] |
| प्रलोकितं | पलोइदं[३८] |
| अनुलग्नो | अणुलग्गो[३९] |

ग) अस्यां भाषायां सम्बोधनार्थे 'रे' 'अरे' चेत्यादी प्रयुक्तौ भवतः। अतः भाषेयं रेफवतीति परिचितम्। प्राकृतमिदं सम्बोधनप्रधानमूलम्।

१. अरे रे वीरअ विसल्ल-भीमङ्गअ-दण्डकालअ-दण्डसूरप्पमुहा।

(अरे रे वीरक-वीशल्य-भीमाङ्गद-दण्डकाल-दण्डशूर-प्रमुखाः।)[४०]

२. अरे पवहणवाहआ, मा दाव एवं पवहणं वाहेहि।

(अरे प्रवहणवाहक, मा तावदेतत्प्रवहणं बाह्य।)[४१]

३. अरे रे पेक्ख पेक्ख।

(अरे रे, पश्य पश्य।)[४२]

४. ता सुणु रे, अहिअरणमज्झे जइ दे चउरङ्ग ण कप्पावेमि, तदो ण होमि वीरओ।

(तृच्छृणु रे, अधिकरणमध्ये यदि ते चतुरङ्गं न कल्पयामि तदा न भवामि वीरकः।)[४३]

घ) प्राकृतमिदं लोकोक्तिबहुलम्। वीरक-चन्दनकयोः वार्तालापेन एतद्धि स्फुटीभवति।

१ जइ अज्जचारुदत्तं वसन्तसेणिणं वा न जाणासि, ता गअणे जोण्हासहिदं चन्दं पि तुमं ण जाणासि।

(यद्यार्यचारुदत्तं वसन्तसेनां वा न जानासि, तदा गगने जोत्स्नासहितं चन्द्रमपि त्वं न जानासि।)[४४]

२. पत्ते अ राअकज्जे पिदरं पि अहं ण जाणामि। (प्राप्ते च राजकार्ये पितरमप्यहं न जानामि)[४५]

३. भीदाभअप्पदाणं दत्तस्स परोवआररसिअस्स। जइ होउ णासो तहवि हु लोए गुणो ज्जेव। (भीताभयप्रदानं ददतः परोपकाररसिकस्य। यदि भवति भवतु नाशस्तथापि खलु लोके गुण एव)[४६]

४. किं तुए सुणअसरिसेण। (किं त्वया शुनकसदृशेन।)[४७]

अस्याः भाषायाः प्रधानमेकं वैशिष्ट्यं तु – एषा भाषा लोकोक्तिपूर्णा।

## 3. प्राच्या-

नाट्यशास्त्रदिशा नाटके विदूषकस्य भाषा प्राच्याप्राकृतभाषा।[४८] 'प्राच्या विदूषकादिहास्यपात्रभाषा'। प्राच्याप्राकृतस्य समुत्पत्तिः शोरसेनीप्राकृतात् इति मार्कण्डेयमतम्।[४९] पुरुषोत्तमदेवस्य मते तु प्राच्या शौरसेनीभाषायाः विकृतिः[५०] , प्राकृतस्यास्य प्रयोगः नाटके सीमित आसीत्।

मृच्छकटिके प्राच्यायाः स्वरूपम् –

प्राच्या इति प्राकृतं प्रयुङ्क्ते विदूषकः। पृथ्वीधरवर्यनये प्राच्याप्राकृते दन्त्यसकारस्य प्राधान्यम्। मृच्छकटिकप्रकरणे भाषायाः सर्वं वैशिष्ट्यमवलोक्यते।

क) अत्र 'श''ष' इत्यनयोः वर्णयोः स्थाने सकारो भवति।

| शकारः | सकारः |
|---|---|
| दर्शनशङ्कया | दंसणसङ्काए[५१] |
| शापितो | साबिदो[५२] |
| शोभिता | सोहिदाओ[५३] |
| संशयो | संसए[५४] |
| शिलातल | सिलाअलं[५५] |

| षकारः | सकारः |
|---|---|
| परपुरूषा | परपुरिसा[५६] |
| विभागेषु | विभाएसु[५७] |
| शीर्षे | सीसे[५८] |
| कैषा | का एसा[५९] |

ख) समासप्रधानभाषा प्राच्याप्राकृतभाषा। प्रकरणस्यास्य चतुर्थाङ्के विदूषकस्य वाक्यानि समासमण्डितानि। तदुदाहरणम्-

१. तोरणधरणत्यम्भवेदिआणिकिरवत्तसमुल्लसन्तहरिदचूद-पल्लवललामफटिहमङ्गलकलसाभिरामोह अपास्ससस्स।

(तोरणधरणस्तम्भवेदिकानिक्षिप्रसमुल्लसद्धरितचूतपल्लव ललामस्फटिकमङ्गलकलशाभिरामोभयपार्श्वस्य)[६०]

२. वेदुरिअमोत्तिअपवालअपुप्फरा अइन्दणीलकक्केतर-अपद्मराअमरगअपहुदिआइं रअणविसेसाइं अण्णोण्णं ।

(वैदुर्यमौक्तिकप्रवालकपुष्परागेन्द्रनीलकर्केतरकपद्मराग मरकतप्रभृतीरत्नविशेषानन्योन्यम्)[६१]

३. सुवण्णजुधिआसेहालिआमालईमल्लिआणो मालिआकुरवआअदिमोत्तआपहुदिकुसुमेहिं

(सुवर्णयुधिका-शोफालिकामालतीमल्लिकानवमल्लिकाकुरवकातिमुक्तककप्र-भृतिकुसुमैः)[६२]

ग) अतो ग्राम्यशब्दप्रयोगः प्राकृतस्यास्य विशेषवैशिष्ट्यम्। अतो विदूषकस्य कथोपकथने ग्राम्यादिशब्दाः समुल्लिखिताः दृश्यन्ते।

| संस्कृतम् | प्राकृतम् |
|---|---|
| दास्याः पुत्रः | दासीए पुत्ता[६३] |
| दुष्टपारावतः | दुट्टपारावअ[६४] |
| अपण्डितो | अपण्डिदो[६५] |
| दुष्टविलासिन्या | दुट्टविलासिणीए[६६] |
| कुलटापुत्रः | काणेलीसुदा[६७] |
| उच्चृङ्खलक | उस्सुङ्खलआ[६८] |
| कुट्टिनीपुत्र | कुट्टणीपुत्ता[६९] |

घ) प्रकरणे अस्यां भाषायां ग्राम्यशब्देन समं ग्राम्योक्तिरपि तुल्यरूपेण प्रयुक्ता। प्रत्युत्तरप्रदानकाले ग्राम्योक्तिः संभाषिता विदूषकेण मैत्रेयेण।

१. दासीए धीए, वरं इदिसो शूणपीणजठरोमुदो ज्जेव। (दास्याः पुत्रि, वरमीदृशः शूनपीनजठरो मृत एव)[७०]

२. सोधुसुरासवमत्तिआ एआवथ्थं गदा हि अत्तिआ।

जइ मरइ एत्थ अत्तिआ भोदि सिआलस्सपज्जत्तिआ।।

(सीधुसुरासवमत्ता एतावदवस्थां गता हि माता।

यदि म्रियतेऽत्र माता भवति शृगालसहस्रपर्याप्तिका।।)[७१]

३. अहं दे मुण्डे गोड्डुं दइस्सम्। (अहं ते मस्तके पादं दास्यामि)[७२]

ङ) प्राकृतमिदम् अलंकारपरिमण्डितमस्ति। प्राकृतेऽस्मिन् उपमा आधिक्येन प्रयुक्ता। प्रकरणे विदूषकस्य कथा उपमालंकारेण सुसमृद्धा।

१. पणइजणसंकमिदविहवस्स सुरजणपीदसस्स पडिवच्चन्द-सस्स विअ परिकरवओ वि दे अहिअदर रमणी ओ।

(प्रणयिजनसंक्रमितविभवस्य सुरजनपीतशेषस्य प्रतिपच्च-न्द्रस्येव परिक्षयोऽपि तेऽधिकतरं रमणीयः)[७३]

२. तुमं ज्जेव एदं कलहंसगामिणीं अणुगच्छन्तो राअहंसो विअ सोहसि। (त्वमेवैतां कलहंसगामिनीनुगच्छन् राजहंस इव शोभसे)[७४]

३. इदो अ उदअन्तसूरसमप्पहेहिं कमलरत्तोप्पलेहिं संझा अदि विअ दीहिआ। (इतश्च उदयत्सूर्यसमप्रभैः कमलरक्तोत्पलैः संध्यायते इव दीर्घिका)[७५]

४. एसो असो अवुच्छो णवणिगगमकुसुमपल्लवो भादि।

सुभडो व्व समरमज्झे घणलोहिदपङ्कचच्चिक्को।।

(एषोऽशोकवृक्षो नवनिर्गमकुसुमपल्लवो भाति।

सुभट इव समरगमध्ये घनलोहितपङ्कचर्चिकः।।)[७६]

अस्यां भाषायां दीर्घसमासयुक्तवाक्यानि परिलक्षितानि। अन्यप्राकृतभाषासु दीर्घसमासयुक्तानि पदानि नैव दृश्यन्ते।

## 4. मागधी

मगधानां भाषा मागधी।[७७] विहारप्रदेशेषु स्थिताः जनाः 'भोजपुरी' इति भाषां व्यवहरन्ति। अनया भाषया साकं मागधीप्राकृतस्य साम्यं वर्तते। 'प्रकृतिः शौरसेनी' इति वररुचेः मतम्।[७८] पिशेलमहोदयस्य नये चण्डाली-शकारीप्राकृतयोः अन्तर्भूता मागधी।[७९] राक्षसः भिक्षुः क्षपणकः चेटश्च इत्येतेषां भाषा मागधीति कोहलवर्यस्याभिप्रायः। मार्कण्डेयवर्येण 'प्राकृतसर्वस्वम्' इत्याख्ये ग्रन्थे मतमिदमुररीकृतम्।[८०]

<u>मृच्छकटिके मागधीभाषायाः स्वरूपम्-</u>

प्रकरणेऽस्मिन् शकारो वसन्तसेना चारुदत्तः त्रिचेटाः भिक्षुः चारुदत्तपुत्ररोहसेनः शकारः च इति षट्पात्राणि मागधीप्राकृतं संवदन्ति। टीकाकृता टीकायां टीकितम् - 'तालव्यशकारवती भाषा मागधी'। मार्कण्डेयपुरुषोत्तम-देवाभ्यां स्वाभिमतं प्रकटीकृतम्- 'ष''स' इत्येतयोः वर्णयोः स्थाने सकारः भवितुमर्हति।

क) मृच्छकटिकस्य मागधीप्राकृते तालव्यशकारः प्रयुक्तः।

| षकारः | शकारः |
|---|---|
| रोदिषि | रोदशि[८१] |
| धूलीदोषः | धूलीदोशे[८२] |
| एषा | एशा[८३] |

| सकारः | शकारः |
|---|---|
| सुवर्णकैः | शुवण्णकेहिं[८४] |
| सुसमृद्धानां | शुशमिद्धाणं[८५] |
| उपासकः | उवाशके[८६] |
| समाश्वस्य | शमशशाशिअ[८७] |

ख) प्राकृते रकारस्य स्थाने लकारः तथा दन्त्यसकारस्य स्थाने तालव्यशकारो भवति। तद्विधायकं सूत्रम्- ‘रसोर्लशौ’।

| रकारः | लकारः |
|---|---|
| चीवरखण्डम् | चीवलखण्डे[८८] |
| द्विगुणतरः | द्विउणतले[८९] |

ग) मागधीप्राकृते अकारान्तपुंलिङ्ग-प्रथमा-विभक्तेरेकवचने एकारान्तरूपं प्राप्यते। तद्विधायकं सूत्रम्- ‘अतो एत्सौ पुंसि मगध्याम्’ इति।

| संस्कृतम् | प्राकृतम् |
|---|---|
| भट्टारकः | भट्टालके[९०] |

उत्पन्नः उप्पणणे [११]

## 5. शकारी-

शकारस्य भाषा शकारी। 'शकारभाषाप्रायत्वात् शकारो राष्ट्रियः स्मृतः'। साहित्यदर्पणस्य टीकाकृता हरिदाससिद्धान्तवागीशमहोदयेन शकारस्य भाषा निरूपिता- 'शकाराणां शकादीनां शाकारीं सम्प्रयोजयेद् इति संज्ञा'।

शकारस्य भाषा का भवेदित्यस्मिन् विषये नाट्यशास्त्राचार्येणोक्तम्-

‘शकार-घोषकादीनां तत्स्वभावश्च यो गणः।

शकारभाषा प्रयोक्तव्या चाण्डाली पुलकसादिषु।।’[१२] इति।

प्राकृतानुशासकृता शकारस्य भाषासम्बन्धि मतमुद्धृतम्-

‘अपार्थमक्रमं व्यर्थं पुनरूक्तं हतोपमम्।

न्यायकार्यादिवाह्यञ्च शकारवचनं भवेत्।।’[१३] इति।

प्राकृतसर्वस्वेऽपि-

‘व्यर्थं त्वपार्थं पुररुक्तमपि हतोपमं चासदृशोपमञ्च।

प्रत्यक्षलोकादिविरोधि चान्यन्यायप्रतीपं च शकारवाक्यम्।।’[९४] इति।

रामशर्मतर्कवागीशवर्यैरपि सममतं पोषितम् – ‘लिङ्गागम-न्याय-कलादि-हीना’ (२.३.२)।

मृच्छकटिके शकारीप्राकृतस्य स्वरूपम्-

क) शकारीप्राकृते ष-सकारयोः स्थाने तालव्यशकारो भवति।

| षकारः | शकारः |
|---|---|
| पुरूषः | पुलिश[९५] |
| परितोषो | पलिदोशे[९६] |
| विषग्रन्थिः | विशगण्ठि[९७] |
| सकारः | शकारः |
| सांप्रतम् | शंपदं[९८] |
| वसन्तसेना | वशन्तशेणिआ[९९] |
| वासुदेव | वाशुदेवे[१००] |

अतः प्राकृतेऽस्मिन् तालव्यशकारस्य प्राधान्यात् ‘शकारी’ इति अभिहिता।

ख) अस्मिन् प्राकृते तकारस्य स्थाने दकारो भवति।

| तकारः | दकारः |
|---|---|
| रक्षितः | लकिखदे[१०१] |
| पिता | पिदा[१०२] |
| पश्यति | पेकखदि[१०३] |

ग) शकारीप्राकृते पर्यायवाचि शब्दानां प्रयोगः समुपलभ्यते। उदाहरणं –

१. मम मअणमणङ्गं मन्मथं बड्ढअत्ती

णिशि अ शअणके मे णिदअं आकिखवन्ती

पशलशि भअभीदा पकखलन्ती खलन्ती

मम वशमणुजपेदा लावणशशेव कुन्ती।।

(मम मदनमनङ्गं मन्मथं वर्धयन्ती

निशि च शयनके मे निद्रामाक्षिपन्ती।

प्रसरति भयभीता प्रस्खलन्ती , खलन्ती

मम वशमनुयाता रावणस्येव कुन्ती।।)[१०४]

२. जे चुम्बिदे अम्बिकामादुकेहिं गदे ण देवाणं वि जे पणामम्।

शे पाडिदे पादतलेण मुण्डे वणे शिआलेण जधा मुदङ्गे।।

(यच्चुम्बितमम्बिकामातृकाभिर्गतं न देवानामपि यत् प्रणामम्।

तत् पातितं पादतलेन मुण्डं वने शृगालेन यथा मृताङ्गम्।।)[१०५]

३. भावे, भावे मं पबलपुलिशं मणुशशं वाशुदेवबम्।

(भाव, भाव, मां प्रवरपुरूषं मनुष्यं वासुदेवकम्)[१०६]

४. ण्हादेहं शलिलजले हिं पाणिएहिं

उज्जाणे उववणकाणणे णिशण्णे।

णालीहिं शह जुवदीहिं इत्थि आहिं

गन्धण्वे विअ शुहिदेहि अंगकेहिं।।

(स्नातोऽयं सलिलजलैः पानीयैः

उद्याने उपवनकानने निषण्णः

नारीभिः सह युवतीभिः स्त्रीभिः

गन्धर्वः सुविहितैरङ्गकैः।)[१०७]

पर्यालोचनेनानेन अनुमीयते यत् पर्यायबोधकशब्दानां प्रयोगः शकारीप्राकृतस्य विशेषवैशिष्ट्यम्।

## 6. चण्डाली-

चण्डालदेशस्य भाषा चण्डाली।[१०८] नाट्यशास्त्रेऽपि चण्डालीभाषाविशेषस्य चर्चा जाता। मागधीभाषायाः विकृतिः चण्डाली इति मतं पुरूषोत्तमदेवस्य।[११०] मागधी-शौरसेनीप्राकृतयोः सम्मेलनेन सृष्टा प्राकृतभाषा चण्डालीति स्वीकुर्वन्ति प्राकृतसर्वस्वकाराः।[१११] टीकाकारैः पृथ्वीधरवर्यैः अपभ्रंशेषु परिगण्यते चण्डाली।[११२]

मृच्छकटिके चण्डालीभाषायाः स्वरूपम्-

चण्डालद्वयेन व्यवहृतं प्राकृतं मृच्छकटिकप्रकरणे नाट्यभाषावैशिष्ट्यम् आवर्धयति।

क) चण्डालीप्राकृतस्य नियमानुसारेण ‘श’ ‘ष’ ‘स’ इत्येतेषु स्थानेषु शइति भवति।

| षकारः | शकारः |
| --- | --- |
| घोषणाम् | घोशणाम्[११३] |
| उद्घोषयत् | उदघोशेध्[११४] |
| विषाणः | विशाणे[११५] |

| | |
|---|---|
| सरोषम् | शलोशम्[११६] |
| सकारः | शकारः |
| सज्जनः | शज्जण[११७] |
| सत्यं | शच्चं[११८] |
| सहसा | शहशा[११९] |
| साधु | शाहु[१२०] |

अपरिवर्तितशकारः

| संस्कृतम् | प्राकृतम् |
|---|---|
| कलशम् | कलशम्[१२१] |
| शोभनम् | शोहणम्[१२२] |
| शवस्य | शवश्श[१२३] |
| शतम् | शदम्[१२४] |

ख) 'र' इत्यस्य स्थाने लकारो भवति। सूत्रम्- 'रसोर्लः शौ'। इति।

| रकारः | लकारः |
|---|---|
| चारुदत्तः | चालुदत्ता[१२५] |
| ताराणाम् | तालाणम्[१२६] |
| द्वारम् | दालम्[१२७] |
| मरण | मलण[१२८] |

ग) प्रकरणस्यास्य चण्डालीप्राकृते अकारान्तपुंलिङ्गशब्दस्य प्रथमाविभक्तेरेकवचने ए-प्रत्ययो भवति।

| अ.पु.प्र.वि.ए.व | एप्रत्ययः |
|---|---|
| इन्द्रः | इन्दे[१२९] |
| पुत्रकः | पुत्तके[१३०] |
| मोक्षः | मोकखे[१३१] |

घ) अलंकारसमृद्धं प्राकृतमिदम्। प्राकृतेऽस्मिन् उपमा-दृष्टान्त-सन्देह-प्रभृतीनामलंकाराणां प्रयोगः सन्दृश्यते।

१) अब्भुदए अवशाणे तहे अ लत्तिंदिवं अहदमग्गा।

उद्दामे व किशोली णिअदी कखु पडिच्छिदुं जादि।

(अभ्युदयेऽवसाने तथैव रात्रिंदिवमहतमार्गा।

उद्दामेव किशोरी नियतिः खलु प्रतीष्ठं याति।।)[१३२] - श्रौती उपमा

२) अज्जचालुदत्त, गअणदले पडिवशन्ता चन्दशुज्जा वि विपत्तिं लहन्ति।

किं उण जणा मलण भीलुआ माणवा वा।।

(आर्यचारुदत्त, गगनतले प्रतिवसन्तौ चन्द्रसूर्यावपि विपत्तिं लभेते।

किं पुनर्जना मरणभीरुका मानवा वा)[१३३]- दृष्टान्तालंकारः

३) वज्झाम्मि णीअमाणे जणश्श शव्वश लोदमाणशश।

णअणशलिलेहिं शित्ते लच्छादो ण उण्णमइ लेणु।।

(वध्ये नीयमाने जनस्य सर्वस्य रुदतः।

नयनसलिलैः सिक्तो रथ्यातो नोन्नमति रेणुः।।)[१३४] - अतिशयोक्तिरलंकारः

४) ण अ लुअदि अन्तलिकके णेअ अणब्भे पडदि वज्जे।

महिलाशमूहमेहे निवडदि णअणम्बु धाराहिं।।

(न च रोदित्यन्तरिक्षं नैवानभ्रे पतति वज्रम्।

महिलासमूहमेघान्निपतति नयनाम्बु धाराभिः।।)[१३५] - रूपकालंकारः

५) णअलीपधारणभूदे वज्झीअन्ते कदन्तअणाए।

किं लुअदि अन्तलिकरवे आदु अणब्भे पडदि वज्जे।।

(नगरीप्रधानभूते वध्यमाने कृतान्ताज्ञया।

किं रोदित्यन्तरिक्षमथवानभ्रे पतति वज्रम्।।) [१३६]- सन्देहः

प्राकृते अस्मिन् अलंकारस्य वैविध्यं प्रदर्शितं नाट्यकृता।

## 7. ढक्की-

बङ्गप्रदेशस्थितस्य ढक्कदेशस्य भाषा ढक्की। पिशेलमहोदयेन प्राकृतमिदं पूर्वीभाषेति रूपेण स्वीकृतम्। ग्रियर्सन-मतानुसारं ढक्की उपभाषा पश्चिमदेशीयभाषा। भरतस्य नाट्यशास्त्रे ढक्कीप्राकृतस्य चर्चा नावलोक्यते। परन्तु तेन वनेचरभाषाचर्चा कृता।[१३७] ढक्कीविषये टीकाकृता पृथ्वीधरवर्येणोक्तम्- 'वकारप्राया ढक्कविभाषा। संस्कृतप्रायत्वे दन्त्यतालव्यसशकारद्वययुक्ता च'[१३८] इति। वकारप्रधाने अपि प्राकृतेऽस्मिन् मृच्छकटिके उकारस्य प्राधान्यं लक्ष्यते। आचार्येण भरतेन नाट्यशास्त्रे उकारबहुला विभाषा स्वीकृता। उकारबहुला विभाषा ढक्की पदवाच्या। पृथ्वीधरसम्मतानां सप्तप्राकृतभाषाणां मुख्यतो द्विविधो भागः – शौरसेनी मागधी चेति मतमिदं तु कीथमहोदयस्य। शोरसेनीप्राकृतेषु अन्तर्गता अवन्तिका प्राच्या च। शकारी चण्डाली च

मागधीप्राकृतेषु समाहिता। ढक्कीभाषाविषये विप्रतिपत्तिर्विदूषाम्।[१३९]

<u>मृच्छकटिके ढक्कीप्राकृतस्य स्वरूपम्</u>-

द्यूतकरः माथुरः च इति पात्रद्वयं प्राकृतमिदं संवदति प्रकरणे।

क) मृच्छकटिकस्य ढक्कीप्राकृते उकारबाहुल्यं प्रसज्यते। तदुदाहरणं –

| संस्कृतम् | प्राकृतम् |
|---|---|
| द्यूतकरः | जुदकरू[१४०] |
| धूर्तः | धूत्तु[१४१] |
| प्रपलायितः | पपलीणु[१४२] |
| निपुणः | णिउणु[१४३] |

ख) मागधीप्राकृतस्य उपभेदा ढक्की। अतः इहापि मागधीप्राकृतवत् 'र'कारस्य स्थाने लवर्णः प्राप्यते।

| संस्कृतम् | प्राकृतम् |
|---|---|
| धा<u>र</u>यति | धा<u>ले</u>दि[१४४] |
| <u>रा</u>जकुलं | <u>ला</u>अउलं[१४५] |

मनोह<u>र</u> मणोह<u>ल</u>[१४६]

ग) ढक्कीप्राकृतभाषा संस्कृतप्राया। संस्कृतप्रायत्वात् दन्त्यसकारः तालव्यशकारः (संस्कृतप्रायत्वे दन्त्यतालव्यशकारद्वययुक्ता) च समरूपेण प्रयुज्यते।

मृच्छकटिकस्य द्वितीयाङ्के माथुरस्योक्तिः- अले संवाहआ, पअच्छ तं दशसुवर्णम् ('अरे संवाहक, प्रयच्छ तद्दशसुवर्णम्')[१४७]

घ) ढक्कीप्राकृते ग्राम्यवाक्यानि परिलक्षितानि। मृच्छकटिकस्य द्वितीयाङ्के माथुरस्य कतिपयानि वाक्यानि समुल्लिख्यन्ते।

१) पिदरु विक्किणिज्ज पअच्छ। (पितरं विक्रीय प्रयच्छ)[१४८]

२) मातरु विक्किणिज्ज पअच्छ। (मातरं विक्रीय प्रयच्छ)[१४९]

३) अप्पाणं विक्किणिअ पअच्छ। (आत्मानं विक्रीय प्रयच्छ)[१५०]

## उपसंहारः

उपसंहारे केवलमेतदेव अस्माभिः कथयितुं शक्यते यत् मृच्छकटिके प्राकृतभाषाचर्चायाः विविधाः दिशः सुतरामेव

परिपुष्टा आसन्। ये तावदलंकाराः नाटके प्रयुक्तास्ते सर्वे एव अर्थव्यञ्जनायाः सहायकभूताः तथा च काव्यस्य सौन्दर्यवृद्धौ उपकारकास्ते। अलंकारेषु शब्दालंकारास्तथार्थालंकाराः सर्वे एवालंकाराः नाटके समुचिततया प्रयुक्ताः।

## तथ्यसूत्राणि -


१. Vararuchi. The Prakrita-Prakasa. Ed. Satya Ranjan Bannerjee. Kolkata. Sanskrit Pustak Bhandar, 2008 .p-6

२. तत्रैव

३. भरतमुनिप्रणीतं नाट्यशास्त्रम्, आचार्यरेवाप्रसाद-द्विवेदीसम्पादितम्,भारतीय-उच्च-अध्ययनसंस्थानम्, शिमला, 2005, 410 –संख्यकपृष्ठाङ्के।

४. The Little Clay cart. Ed.William Ryder. Bomboy.1995. p-17

५. Introduction to Prakrit. A.C.Woolner. Delhi, Motilal Banarasidas. 1975

६. नाट्यशास्त्रम्, 17/41

७. Sudraka.Mrcchakatikam. Ed.V.R.Nerukar.Delhi.New Bharati Book Corporation. 2000. P 3

८. तत्रैव. पृ.२७

९. तत्रैव. पृ.१६

१०. तत्रैव. पृ.५२

११. तत्रैव. पृ.७७

१२. तत्रैव. पृ.६४

१३. तत्रैव. पृ.२३

१४. तत्रैव. पृ.४३

१५. तत्रैव. पृ.३

१६. तत्रैव. पृ.४

१७. तत्रैव. पृ.२८

१८. तत्रैव. पृ.१५८

१९. तत्रैव. पृ.१४

२०. तत्रैव. पृ.१४३

२१. तत्रैव. पृ.३

२२. तत्रैव. पृ.२८

२३. तत्रैव. पृ.१४

२४. तत्रैव. पृ.२९

२५. तत्रैव. पृ.४

२६. तत्रैव. पृ.२६

२७. तत्रैव. पृ.२८

२८. तत्रैव. पृ.१०३

२९. तत्रैव. पृ.१०४

३०. तत्रैव. पृ.१०६

३१. तत्रैव. पृ.१०८

३२. तत्रैव. पृ.१०२

३३. तत्रैव. पृ.१०२

३४. तत्रैव. पृ.१०६

३५. तत्रैव. पृ.१०७

३६. तत्रैव. पृ.१०४

३७. तत्रैव. पृ.१०५

३८. तत्रैव. पृ.१०७

३९. तत्रैव. पृ.१०९

४०. तत्रैव. पृ.१०३ (चन्दनकः)

४१. तत्रैव. पृ.१०३ (वीरकः)

४२. तत्रैव. पृ.१०३ (चन्दनकः)

४३. तत्रैव. पृ.१०८ (वीरकः)

४४. तत्रैव. पृ.१०४ (चन्दनकः)

४५. तत्रैव. पृ.१०४ (वीरकः)

४६. तत्रैव. पृ.१०६ (चन्दनकः)

४७. तत्रैव. पृ.१०८ (चन्दनकः)

४८. 'प्राच्या विदूषकादीनाम्'- भरतमुनिप्रणीतं नाट्यशास्त्रम्, ड.बावुलालशुक्लशास्त्रीसम्पादितम्, चौखम्बासंस्कृतसीरिज-अफिस, वाराणसी, 1972. पृ.२१७

४९. प्राच्यासिद्धिः शौरसेन्याः- मार्केण्डेयविरचितम्, प्राकृतसर्वस्वम्, ड.कृष्णचन्द्राचार्यसम्पादितम्, प्राकृतटेक्ससोसाइटी, अह्मदावाद, 1968. पृ.१२२

५०. शेषे शौरसेनी- A grammar of the prakrit language, purusattomdev, पृ.११०

५१. Sudraka. Mrcchakatikam. Ed.V. R. Nerukar. Delhi. New Bharati Book Corporation. 2000. पृ.२३

५२. तत्रैव, पृ.५१

५३. तत्रैव, पृ.६९

५४. तत्रैव, पृ.८३

५५. तत्रैव, पृ.११०

५६. तत्रैव, पृ.१८

५७. तत्रैव, पृ.४६

५८. तत्रैव, पृ.७६

५९. तत्रैव, पृ.८२

६०. तत्रैव, पृ.६९

६१. तत्रैव, पृ.७२

६२. तत्रैव, पृ.७५

६३. तत्रैव, पृ.८२

६४. तत्रैव, पृ.८२

६५. तत्रैव, पृ.५४

६६. तत्रैव, पृ.७६

६७. तत्रैव, पृ.१५६

६८. तत्रैव, पृ.१५६

६९. तत्रैव, पृ.१५६

७०. तत्रैव, पृ.७४

७१. तत्रैव, पृ.७४

७२. तत्रैव, पृ.८३

७३. तत्रैव, पृ.७

७४. तत्रैव, पृ.२६

७५. तत्रैव, पृ.७५

७६. तत्रैव, पृ.७५

७७. संस्कृत ओ प्राकृतभाषार क्रम विकाश, सम्पा. परेशचन्द्रमजुमदार, सारस्वतलाइब्रेरी, कोलकाता, १९७८, पृ.१५

७८. वररुचिः प्राकृतप्रकाशः ड.श्रीकान्तपाण्डेयसम्पादितः साहित्यभाण्डारसुभाषवाजार, मेरठ, १९५८,पृ. २३१

७९. प्राकृतभाषा ओं का व्याकरण आर.पिशेल. विहारराष्ट्रभाषा परिषद् पाटना, १९५८, पृ.४७

८०. राक्षसभिक्षुक्षपणकचेटाद्या मागधी प्राहु: इति कोहल:। मार्कण्डेयविरचितम्, प्राकृतसर्वस्वम्, ड.कृष्णचन्द्राचार्यसम्पादितम्, प्राकृतटेक्ससोसाइटी, अहमदावाद, १९६८, पृ.१२७

८१. Sudraka. Mrcchakatikam. Ed. V. R. Nerukar. Delhi. New Bharati Book Corporation. २०००. पृ.९८

८२. तत्रैव, पृ.१३७

८३. तत्रैव, पृ.८४

८४. तत्रैव, पृ.३३

८५. तत्रैव, पृ.८३

८६. तत्रैव, पृ.११५

८७. तत्रैव, पृ.१७५

८८. तत्रैव, पृ.१३७

८९. तत्रैव, पृ.१८७

९०. तत्रैव, पृ.११४

९१. तत्रैव, पृ.१००

९२. नाट्यशास्त्रम्, १७/५४

९३. प्राकृतानुशासनम्, १३/१४

९४. प्राकृतसर्वस्वम्, १३/१

९५. Sudraka. Mrcchakatikam. Ed. V. R. Nerukar. Delhi. New Bharati Book Corporation. २०००. पृ.११८

९६. तत्रैव, पृ.१६९

९७. तत्रैव, पृ.१६९

९८. तत्रैव, पृ.१५९

९९. तत्रैव, पृ.१४५

१००. तत्रैव, पृ.१४२

१०१. तत्रैव, पृ.१३६

१०२. तत्रैव, पृ.१३२

१०३. तत्रैव, पृ.१३२

१०४. तत्रैव, पृ.१०

१०५. तत्रैव, पृ.१२४

१०६. तत्रैव, पृ.१२४

१०७. तत्रैव, पृ.१४०

१०८. प्राकृतभाषा ओं का व्याकरण सम्पा. आर.पिशेल. विहारराष्ट्रभाषा परिषद् पाटना, १९५८, पृ.९

१०९. नाट्यशास्त्रम्, १७/४३-४४

११०. मागधी विकृति:- शेषे शौरसेनी- A grammar of the prakrit language, purusattomdev, पृ.११३

१११. चाण्डाली मागधी शौरसेनीभ्यां प्रायशो भवेत्- मार्केण्डेयविरचितम्, प्राकृतसर्वस्वम्, ड.कृष्णचन्द्राचार्यसम्पादितम्, प्राकृतटेक्ससोसाइटी, अहमदावाद, १९६८, पृ.१४१

११२. अपभ्रंशे शकाराभीरचाण्डालशवरद्राविडोड्रजा:।

हीनां च वनेचराणां च विभाषा: सप्त कीर्तिता:॥(पृथ्वीधरी टीका)

११३. Sudraka. Mrcchakatikam. Ed. V. R. Nerukar. Delhi. New Bharati Book Corporation. २०००. पृ.१६४

११४. तत्रैव, पृ.१७६

११५. तत्रैव, पृ.१७०

११६. तत्रैव, पृ.१७७

११७. तत्रैव, पृ.१६२

११८. तत्रैव, पृ.१६९

११९. तत्रैव, पृ.१७४

१२०. तत्रैव, पृ.१७४

१२१. तत्रैव, पृ.१६७

१२२. तत्रैव, पृ.१७१

१२३. तत्रैव, पृ.१७४

१२४. तत्रैव, पृ.१७८

१२५. तत्रैव, पृ.१६२

१२६. तत्रैव, पृ.१६३

१२७. तत्रैव, पृ.१७०

१२८. तत्रैव, पृ.१७५

१२९. तत्रैव, पृ.१६३

१३०. तत्रैव, पृ.१६४

१३१. तत्रैव, पृ.१७४

१३२. तत्रैव, पृ.१६६

१३३. तत्रैव, पृ.१७५

१३४. तत्रैव, पृ.१६३

१३५. तत्रैव, पृ.१६३

१३६. तत्रैव, पृ.१६३

१३७. नाट्यशास्त्रम्, अध्याय: १७

१३८. मृच्छकटिक शास्त्रीय सामाजिक एवं राजनीतिक अध्ययन, सम्पा.ड: शालग्रामद्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी, प्रथम संस्करणम्- १९८२, पृ. ३९८

१३९. शूद्रक का मृच्छकटिक, सम्पा. ड.विश्वनाथशर्मासम्पादितम्, हंसाप्रकाशनम्, जयपुरः, 1999, पृ.२०४

१४०. Sudraka.Mrcchakatikam. Ed.V.R.Nerukar.Delhi.New Bharati Book Corporation. २०००. पृ.३०

१४१. तत्रैव, पृ.३२

१४२. तत्रैव, पृ.३०

१४३. तत्रैव, पृ.३२

१४४. तत्रैव, पृ.३४

१४५. तत्रैव, पृ.३७

१४६. तत्रैव, पृ.४०

१४७. तत्रैव, पृ.३५

१४८. तत्रैव, पृ.३३

१४९. तत्रैव, पृ.३३

१५०. तत्रैव, पृ.३३

## सहायकग्रन्थसूची-

१. Introduction to Prakrit. Ed. A.C.Woolner. Delhi, Motilal Banarasidas. 1975

२. Sudraka.Mrcchakatikam. Ed.V.R.Nerukar.Delhi.New Bharati Book Corporation. 2000

३. The Little Clay cart. William Ryder. Bomboy.1995

४. Vararuchi. The Prakrita-Prakasa. Ed. Satya Ranjan Bannerjee. Kolkata. Sanskrit Pustak Bhandar, 2008

५. द्विवेदी, शालग्राम। मृच्छकटिक शास्त्रीय सामाजिक एवं राजनीतिक अध्ययन। वाराणसी। विश्वविद्यालय प्रकाशन। १९९२।

६. पिशेल, आर। प्राकृतभाषा ओं का व्याकरण। पाटना। विहारराष्ट्रभाषा परिषद। १९५८।

७. वररुचि। प्राकृतप्रकाश। सम्पा. श्रीकान्तपाण्डेय। मेरठ। साहित्य भाण्डार सुभाषवाजार। १९५८।

८. वन्दोपाध्याय, विश्वनाथ। मृच्छकटिकः विचित्रवर्णाली। कोलकाता। दि एशियाटिक सोसाइटि। २००५।

९. भरतः। नाट्यशास्त्रम्। सम्पा. ड.बावुलालशुक्लशास्त्री। वाराणसी। चौखम्बा संस्कृत सीरिज अफिस।१९७२।

१०. भरतः। नाट्यशास्त्रम्। सम्पा. रेवाप्रसादद्विवेदी। शिमला। भारतीय उच्च अध्ययन संस्थानम्। २००५।

११. मजुमदार, परेश। संस्कृत ओ प्राकृतभाषार क्रमविकाश। कोलकाता। सारस्वत लाइब्रेरी। १९७८।
१२. मार्कण्डेय। प्राकृतसर्वस्वम्। सम्पा. कृष्णचन्द्राचार्य। अहमादावाद। प्राकृतटेक्ससोसायटी। १९६८।
१३. मिश्र, गोपालचन्द्र। संस्कृतसाहित्य समालोचना- विविध प्रसङ्ग। कोलकाता। संस्कृत पुस्तक भाण्डार। २०१३।
१४. शर्मा, विश्वनाथ। शूद्रक का मृच्छकटिकम्। जयपुर। हंसाप्रकाशन्। १९९९।
१५. शास्त्री, नेमिचन्द्र। अभिनवप्राकृतव्याकरणम्। वाराणसी। तारा पाबलिकेशन्स। १९६३।
१६. शूद्रक। मृच्छकटिक। सम्पा. जगदीशचन्द्रमिश्र। वाराणसी। चौखम्बा सुरभारती प्रकाशनम्। २००४।
१७. शूद्रक। मृच्छकटिक। सम्पा. जयशङ्करलालत्रिपाठी। वाराणसी। चौखम्बा कृष्णदास अकादेमी। २०१०।
१८. शूद्रक। मृच्छकटिकम्। सम्पा. ड. उदयचन्द्र-अनितावन्दोपाध्याय। कोलकाता। संस्कृत बुक डिपो। २००७।
१९. शूद्रक। मृच्छकटिक। सम्पा. ड.अविनाशचन्द्रदे-शुभेन्दुकुमारसिद्धान्त। कोलकाता। संस्कृत पुस्तक भाण्डार। १४१३ बङ्गाब्द।
२०. सेनगुप्त, बेला। प्राकृतोपक्रमणिका। कोलकाता। १९६०।

# अतिशयोक्त्यलंकारस्य स्वरूपानुसन्धानम्

**सन्दीपजाना**

विद्यावारिधि-शोधच्छात्र: रामकृष्णमिशन्विद्यामन्दिरस्य

(***निबन्धनिर्यासः-***

आदौ भाषा ततश्च व्याकरणम्। एवमेवादौ काव्यं तदनु च काव्यस्य उपादानं धर्मो वा इत्येते विषया आलोच्यन्ते। काव्यधर्मेषु च अलंकारस्य गुरुत्वं सर्वैरेवोरीक्रियते। प्राचीनाः आलंकारिका अलंकारमेव काव्यात्मतया स्वीचक्रुः। तेषां मते काव्यशोभाकरा धर्मा एव अलंकाराः। ध्वनिवादिनाम् आलंकारिकाणां सविधे अलंकारस्य स्वरूपं परिवर्तितमभूत्। तेषां नये रस एव काव्यस्यात्मा, रससमाहिते प्रतिभावति कवौ रसाक्षिप्ताः अपृथग्यत्ननिर्वर्त्या अलंकारा अहम्पूर्वीभावेनोपस्थिताः सन्तः काव्यस्य वैचित्र्यं सृजन्ति। काव्यतत्त्वालोचननिरतेषु अलंकारशास्त्रेषु यथा नूतनाः अलंकाराः विवेच्यतां गताः तथैव केचन विलुप्ताः। केषाञ्चित् पुनः घटिता स्वरूपपरिवृत्तिः। अतिशयोक्त्यलंकारस्यापि दृश्यते तादृशी काचित् क्रमेण परिवर्तनपरम्परा। सैवेदीनीं मदालोचनविषयतां याति।)

अतिशयोक्तिरेकः प्राचीनः अलङ्कारः। यथा उपमा सकलसादृश्यमूलकेष्वलङ्कारेषु जीवातुभूता तथैव अतिशयोक्तिः समेषामलङ्काराणां मूलभूता। अस्यालंकारस्य लक्षणविचारचर्चायां लक्षणानां विवर्तनं सुस्पष्टतया परिलक्ष्यते। भामह-दण्डि-उद्भटप्रमुखैः आलंकारिकैः लोकसीमातिवर्तित्वेन बाहुल्योक्तिरूपेण वा अतिशयोक्ति रुल्लिखिता। परवर्तिनि काले सैव अतिशयोक्तिः उपमाद्यलंकारः इव विशिष्टालङ्कृतिपदवीं प्राप।

आचार्यभामहेन तदीये काव्यालंकारग्रन्थे प्राथम्येन अलंकारस्यास्य स्वरूपं विवेचितम्। तन्मते यत्र निमित्तवशात् लोकातिक्रान्तचमत्कारितायाः वर्णना विहिता भवति तत्र अतिशयोक्तिर्नामालंकारः। तल्लक्षणं लक्षितं भामहेन -

"निमित्ततो वाचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यन्तेऽतिशयोक्तिं तामलंकारतया यथा।।"[1] इति ।

अस्यालंकारस्य वैशिष्ट्यं तावत् गुणातिशययोगः इति। भामहमते तु अतिशयोक्तिर्हि वक्रोक्तेर्विधैका। अनयैव वक्रोक्त्या कविः विषयाणां चारुत्वं रचयति। तत्रैव कविः यत्नपरायणो भवेद् यतो हि वाक्ये वक्रोक्तिं विना न कश्चिद् अलंकारः सम्भवति। अतस्तेन उल्लिखितं -

“सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना।।”[2]

तदनन्तरमालंकारिकः आचार्यो दण्डी अतिशयोक्त्यलंकारं समेष्वलंकारेषु श्रेष्ठतया उल्लिलेख। अस्यालंकारस्य लक्षणप्रसङ्गे तेनोक्तं यत् प्रस्तुतस्य वस्तुनः प्रकाशनेच्छा-प्रयुक्तवाग्विन्यासो यदि लोकसीमाम् अतिक्रामति तदा अतिशयोक्तिर्भवतीति। तथाहि -

“विवक्षा या विशेषस्य लोकसीमातिवर्त्तिनी।
असावतिशयोक्तिः स्यादलंकारोत्तमा यथा।।”[3] इति।

अत्र लोकसीमातिवर्त्तनं नाम योग्यतामपि अतिरिच्य वर्णनमित्यर्थः। अत आचार्येण वाग्भटेनोक्तम्-‘अतिशयेन सम्भवातिरेकेण योग्यतातिक्रमेण वा उक्तिः अतिशयोक्तिः’ इति। अस्याः आधिक्यसमृद्धवाग्रूपायाः अतिशयोक्त्याः उदाहरणत्वेन श्लोकयामास -

“मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः।।”[4]

मालतीमालाभिः विभूषिता सज्जितक्षौमवसनधारिणी अभिसारिका सर्वाङ्गेषु चन्दनचर्च्चिता ज्योत्स्नाभिर्नावलोक्यते। अत्र ज्योत्स्नाशुभ्रतायाः आधिक्यात् मालतीमालायाः शुभ्रता म्लानतां गच्छति। इह खलु गुणातिशयाद् अतिशयोक्त्यलंकारः।

आचार्यः उद्भटस्तु भामहमेवानुसृत्य अतिशयोक्त्यलंकारस्य लक्षणं निरूपयाञ्चकार। तन्मते लोकातिक्रान्तगोचरत्वमेव अस्यालंकारस्य प्राणभूतमिति। तथाहि तेनोक्तं -

"निमित्ततो यत्तु वचो लोकातिक्रान्तगोचरम्।

मन्यन्तेऽतिशयोक्तिं तामलंकारतया बुधाः।।"[5] इति।

स एव सर्वादौ अतिशयोक्त्यलंकारस्य वैज्ञानिकदृष्ट्या श्रेणीविभाजनं चकार। परवर्तिनः आलंकारिकाः तमेवानुसृत्य अस्यालंकारस्य विभाजनं विहितवन्तः।

यद्यपि आचार्येण रुद्रटेन स्वतन्त्रतया अतिशयोक्तेः लक्षणं न निर्णीतं तथापि तेन अतिशयोक्तेर्माहात्म्यं स्वीकृतम्। किञ्च, तेन वास्तवम्, औपम्यम्, अतिशयः, श्लेषश्चेति चतुर्षु वर्गेषु अलंकारस्यास्य विभाजनं विहितम्। तत्र च तेन द्वादशालंकाराणाम् उपजीव्यतया अतिशयोक्तिः उल्लिखिता।

अतः भामह-दण्डि-रुद्रटादिभिः आलंकारिकैः अतिशयोक्तिरेका सर्वालंकारसामान्या नाम सर्वालंकारमूलेति उच्यते। अनयैव अतिशयोक्त्या काव्यं सरसतां चमत्कारतामुत्कृष्टताञ्चोपैति। आचार्येणानन्दवर्धनेन मतमिद-मुरीकृत्यावाचि- "यतः प्रथमं तावदतिशयोक्तिगर्भता सर्वालंकारेषु शक्यक्रिया। कृतैव च सा महाकविभिः कामपि काव्यच्छविं पुष्यति, कथं ह्यतिशययोगिता स्वविषयौचित्येन क्रियमाणा सती काव्येनोत्कर्षमावहेत्। भामहेनाप्यति-शयोक्तिलक्षणेयदुक्तम् -

"सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना।।"

तत्र अतिशयोक्तिर्यमलंकारमधितिष्ठति कविप्रतिभावशात्तस्य चारुत्वातिशययोगोऽन्यस्य त्वलंकारमात्रतैवेति सर्वालंकार-शरीरस्वीकरणयोग्यत्वेनाभेदोपचारात् सैव सर्वालंकार-रूपेत्ययमेवार्थोऽवगन्तवम्"[6] इति। आनन्दवर्धनाचार्यस्य मते सर्वे एवालंकाराः अतिशयगर्भतां भजन्ते। अपि चोक्तं तेन – महाकविभिः रचितं काव्यम् अतिशयोक्तियुक्तं सदेव अपूर्वकाव्यसौन्दर्यं सृजेत्। अतः औचित्यं प्रति गतं मनो यस्य तेनैव कविना अतिशयोक्तिर्नियुज्यते।

अतिशयोक्तेः स्वरूपपरिवर्तनं कृतं परवर्तिभिः आलंकारिकैरेव। बाहुल्यसमृद्धा उक्तिरेव अतिशयोक्तिरिति धारणां परिवर्त्य सोपमादिवदलंकारतया परिगणिता। आचार्येण मम्मटेन अस्यालंकारस्य सामान्यलक्षणमविधाय सा भागचतुष्टयेषु विभक्ता। अतस्तेनोक्तं-

"निगीर्याध्यवसानन्तु प्रकृतस्य परेण यत्।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्।।
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः।
विज्ञेयातिशयोक्तिः सा ..।।"[7] इति।

अर्थात् परेण उपमानेन उपमेयस्यात्र निगरणम् अन्तर्भावो वा भवति। तच्चाध्यवसानम् अर्थात् आहार्याभेदरूपं निश्चयज्ञानम् एव प्रथम-प्रकारातिशयोक्तिरिति। मम्मटनये द्वितीयप्रकारा अतिशयोक्तिर्हि सा यत्र प्रस्तुतार्थः अर्थात् बुद्धिस्थितोपमेयः अन्यरूपेण वर्ण्यते । अत्र कविः वर्ण्यवस्तु लौकिकप्रसिद्धिं व्यतिरिच्य वर्णयति। यत्र च यदि चेदित्यादि-शब्दैः असम्भवार्थस्योक्तिस्तत्र तृतीयप्रकारातिशयोक्तेर्भवति। किञ्च, यत्र कार्यकारणयोः पौर्वापर्यस्य विपर्ययो भवति तत्र चतुर्थविधातिशयोक्तिर्भवति। आचार्येण मम्मटेन साधारणतया अतिशयोक्तेः लक्षणमविधायापि तस्याः

भेदचतुष्टयप्रदर्शनेन अतिशयोक्तेः स्वरूपं प्रदर्शितम्। तेन च निगीर्याध्यवसायम् अतिशयोक्तिरिति कथ्यते।

अलंकारसर्वस्वकारेण आचार्येण रुय्यकेन साध्याध्यवसायरूपायाः उत्प्रेक्षायाः लक्षणं निर्णीय सिद्धाध्यवसायरूपायाः अतिशयोक्तेर्लक्षणनिर्णयप्रसङ्गे उक्तं – "अध्यवसितप्राधान्ये त्वतिशयोक्तिः।।"[8] इति।

अर्थात् यस्मिन् अध्यवसाये अध्यवसितस्य विषयिणो वा प्राधान्यं तिष्ठति सा हि अतिशयोक्त्यलंकारः। सूत्रस्थः तुशब्दः उत्प्रेक्षातः अतिशयोक्तिं व्यवच्छिनत्ति। उत्प्रेक्षालंकारे अध्यवसानरूपक्रियायाः प्राधान्यं तिष्ठति। अर्थात् अध्यवसायस्य साध्यतादशायामेव उत्प्रेक्षालंकारो भवति। अतिशयोक्तिश्च अध्यवसायस्य सिद्धावस्था। वस्तुतः असत्यविषयो यदा सत्यतया प्रतीयते तदा अतिशयोक्तिर्भवतीति। अतश्चात्र अध्यवसितस्य प्राधान्यं तिष्ठति। वृत्तौ च तेन स्पष्टमुक्तं -"अध्यवसाये त्रयं भवति स्वरूपं विषयो विषयी च। विषयस्य हि विषयिणान्तर्नीतत्वेऽध्यवसायस्य स्वरूपोत्थानम्। तत्र साध्यत्वे स्वरूपप्राधान्यम्। सिद्धत्वे अध्यवसितप्राधान्यम्। विषयप्राधान्यमध्यवसायेनैव सम्भवति। अध्यवसितप्राधान्ये चातिशयोक्तिः।" इति।

रुय्यकभावभावितेन आचार्य-विश्वनाथेन अतिशयो-क्त्यलंकार-निर्णयप्रसङ्गे अध्यवसायशब्दः गृहीतः। तेन अस्यालंकारस्य लक्षणं लक्षितं -

"सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।।"[9] इति।

अर्थात् अध्यवसाये सिद्धे सति अतिशयोक्तिर्भवति। कविप्रसिद्धेः यथार्थवस्तुनः उपमेयस्य वा अयथार्थवस्तुना उपमानरूपेण वा निश्चये सति अतिशयोक्तिर्भवति। विश्वनाथाचार्येण लक्षणे व्यवहृतस्य अध्यवसायशब्दस्यार्थो हि अयथार्थवस्तुना यथार्थवस्तुनो निगरणं ग्रसनं वेति विहितम्। ततो यथार्थवस्तु आच्छाद्य तेन सह अयथार्थवस्तुनः अभेदसम्भावना अध्यवसाय इत्यर्थो लभ्यते।[10] उत्प्रेक्षालंकारे एवमेव अभेदकल्पनायां सत्यामपि तत्र सा सम्भावना अनिश्चिता। अतिशयोक्तौ तु कविप्रौढोक्तिवशात् सम्भावनाभावात् सा हि निश्चिततत्वेन साध्यते। अतः उत्प्रेक्षायां सम्भावना हि साध्यस्वरूपा, अतिशयोक्तौ तु सा सिद्धस्वरूपा पूर्वनिष्पन्ना वा।

**अतिशयोक्त्यलंकारस्य भेदाः**

आचार्येण उद्भटेन सर्वादौ अतिशयोक्त्यलंकारस्य भेदो निर्णीतः। उक्तञ्च तेन -

"भेदेनान्यत्वमन्यत्र नानात्वं यत्र बध्यते।
तथासम्भाव्यमानार्थनिबन्धनेतिशयोक्तिगीः।।
कार्यकारणयोर्यत्र पौर्वापर्यविपर्ययात्।
आशुभावं समालम्ब्य बध्यते सोपि पूर्ववत्।।"[11]

अतिशयोक्तेश्चत्वारो भेदाः हि-

१. भेदे अन्यत्वम् अभेदो वा।

२. अभेदे नान्यत्वं भेदो वा।

३. सम्बन्धं विनैव सम्भाव्यमानार्थस्य निबन्धनम्।

४. कार्यकारणयोः पौर्वापर्यस्य विपर्ययः चेति।

उद्भटदर्शितेऽतिशयोक्ते र्भेदचतुष्टये आचार्यमम्मटेन आदितः त्रयं स्वीकृतम्। यथा –

१. उपमानेन उपमेयस्य निगरणरूपाध्यवसायः।

२. प्रस्तुते अन्यत्वम् नाम अभेदे भेदः।

३. असम्भाव्यार्थस्य यथोक्तकल्पना चेति।

परवर्ती आलंकारिकः उद्भटेन प्रभावितः आचार्यरुय्यकः मम्मटेन परिष्कृतः सन् साकल्येन अस्यालंकारस्य पञ्चभेदान् प्रदर्शयाञ्चकार। यथा – १. भेदे अभेदकल्पना, २. अभेदे च

भेदकल्पना, ३. सम्बन्धे असम्बन्धरूपा, ४. असम्बन्धे सम्बन्धरूपा, ५. हेतुकार्ययोः विपर्ययरूपा च। परवर्ती आलंकारिकः आचार्यो विश्वनाथः तानेव पञ्चभेदान् स्वीकृत्य व्याख्यां प्रास्तावीत्। स च पञ्चभेदानां सोदाहरणम् आलोचनं विहितवान्।

तत्र प्रथमप्रकारस्य अतिशयोक्त्यलंकारस्योदाहरणं यथा -

"कथमुपरि कलापिनः कलापो विलसति तस्य तले अष्टमीन्दुखण्डम्।
कुवलययुगलं ततो विलोलं तिलकुसुमं तदधः प्रवालमस्मात्।।" इति।

इह कान्ताकेशपाश इति उपमेयं विषयं वा अधःकृत्य तत्र मयूरकलाप इति उपमानम् अध्यवसितम्। उपमानेन उपमेयस्य सम्पूर्णतया अधःकरणेन तस्य किञ्चिदपि उल्लेखनं न दृश्यते। केशपाशमयूरकलापयोर्भेदे सत्यपि अभेदकल्पना भवति। अतः सा हि कल्पना सिद्धा संशयहीना वा। अनुरूपमेव उपमेये ललाटे अष्टमीतिथिस्थवक्रचन्द्रस्येति उपमानस्य, उपमेये नयनद्वये उपमानस्य नीलपद्मद्वयस्य, उपमेयभूतायां नासिकायाम् उपमानस्य तिलकुसुमस्य,

उपमेये ओष्ठे च उपमानस्य प्रवालस्य अभेदारोपो भवति। अत्र प्रत्येकं स्थाने उपमेयं तिरस्कृत्य उपमानस्य परिनिष्ठिततया आत्मप्रकाशादत्र भेदे अभेदारोपरूपः अतिशयोक्त्यलंकारः।

सम्बन्धे असम्बन्धरूपायाः अतिशयोक्तेरुदाहरणं यथा-

"अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलः,
निर्मातुं प्रभवेत् मनोहरमिदं रूपं पुराणो मुनिः।।"इति

अत्राखिलजगतः स्रष्टा प्रजापतिरेव ऊर्वश्याः स्रष्टा। अतः ऊर्वश्या सह ब्रह्मणः सर्जन-सर्जकभावसम्बन्धो विद्यमानः। किन्तु वेदाभ्यासजडत्वादिहेतुना ब्रह्मणः तादृशसृष्टौ असामर्थ्यज्ञापनात् स्निग्धोज्ज्वलचन्द्रादेः तादृश्याः ऊर्वश्याः स्रष्टृरूपेण निश्चयसम्भावनाच्च अतिशयोक्तिर्नामालंकारः।

असम्बन्धे सम्बन्धरूपायाः अतिशयोक्ते-रुदाहरणं यथा –

"यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम्।

तदोपमीयते तस्या वदनं चारुलोचनम्।"इति।

अर्थात् कस्मादपि कारणात् यदि चन्द्रमण्डले नीलपद्मद्वयं युज्यते तदैव केवलं सुनयनायाः नायिकायाः मुखेन सह शीतांशोः साम्यं सङ्गच्छते। इह खलु चन्द्रे नीलपद्मस्याभावः स्वाभाविकः। अतः एतद्वक्तुं शक्यते चन्द्रे नीलपद्मस्य असम्बन्धोऽस्ति। किन्तु कविनात्र यदीति शब्दप्रयोगेन स सम्बन्धः प्रदर्शितः। अर्थात् यदि चन्द्रमण्डले नीलपद्मं स्यात् तर्हि तत् मुखतुल्यं भवेदिति। एवमेव असम्बन्धे सम्बन्धकल्पनावशात् असम्बन्धे सम्बन्धकल्पनरूपम् अतिशयोक्तिलक्षणमत्र संङ्गच्छते।

हेतुकार्ययोः पौर्वापर्यवशादतिशयोक्तेर्दृष्टान्तो यथा –

"सममेव समाक्रान्तं द्वयं द्विरदगामिना।

तेन सिंहासनं पित्र्यं मण्डलञ्च महीक्षिताम्।।"

राजा आदौ सिंहासनमारोहति ततश्च राजमण्डले आधिपत्यं तनोति। अयमेव साधारणो विधिः। अतः सिंहासनारोहणं हि कारणं, राजमण्डले आधिपत्यविस्तारं च कार्यम्। कारणस्य पूर्वमवस्थानं कार्यस्य च पश्चादिति प्रसिद्धिः। किन्तु महाकविना कार्यकारणयोः तत्पौर्वापर्यमुपेक्ष्य कविप्रौढोक्तिवशात् द्वयोः समकालीनत्वं स्वीकृतम्। अतश्चात्र

सिंहासनारोहणम् आधिपत्यविस्तारश्च द्वयोः पौर्वापर्यम् समकालसम्पन्नत्वेन अध्यवसितमिति पञ्चमप्रकारातिशयोक्ति -लक्षणं सङ्गच्छते।

अतिशयोक्त्यलंकारस्य स्वरूपालोचनाद्वक्तुं शक्यते यत् सर्वेषु अलंकारेषु मूलभूतो हि अतिशयोक्त्यलंकारः। अतः अलंकारस्यास्य विवर्तनात् बहुपरिवर्तनं जातम्। तत्र आदौ अतिशयोक्तिः अलङ्कारसाधारणमासीत्, तदनन्तरञ्च तस्य परिनिष्ठितरूपं रूपितं कविभिः। किन्तु परम्परया दृश्यते चेत् सा हि केवलं संस्कृता (Refinement)। भामह-दण्डिप्रमुखालंकारिकैः उक्तिबाहुल्येन लोकसीमातिरूपा अतिशयोक्तिः निरूपिता। किन्तु या अतिशयोक्तिरेकदा समेषामलंकाराणां प्राणरूपेण विवेचिता सा परवर्तिनि काले उपमाद्यलंकारः इव विशेषालंकारतया परिगणिता।तत्र गच्छता कालेन गुणातिशय्यस्य आधिक्यात् उपमेयमदृग्गोचरमेव सञ्जातम्। उपमानं तं निगीर्यते ग्रसते वा। आचार्येण पण्डितराजेन जगन्नाथेन अतिशयोक्त्य-लंकारस्य लक्षणनिर्णय-प्रसङ्गे उक्तं - ‘‘विषयिणा विषयस्य निगरणमतिशयः तस्योक्तिः।’’[12] इति। अर्थात् विषयिणा विषयस्य निगरणं हि अतिशयः। तादृशी उक्तिरेव अतिशयोक्तिरिति।

## पादटीका-

1.भामहविरचिते काव्यालंकारे २/६२.
2.भामहविरचिते काव्यालंकारे २/८५.
3.दण्डिविरचिते काव्यादर्शे २/२१४.
4.दण्डिविरचिते काव्यादर्शे २/२१५.
5.उद्भटविरचिते काव्यालंकारसारसंग्रहे २/११
6.आनन्दवर्धनविरचिते ध्वन्यालोके वृत्तिभागे ३/३७.
7.मम्मटविरचिते काव्यप्रकाशे १०/१००.
8.रुय्यकविरचिते अलंकारसर्वस्वे २३.
9.विश्वनाथविरचिते साहित्यदर्पणे १०/४६.
10.विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः।
11.उद्भटविरचिते काव्यालंकारसारसंग्रहे २/१२.
12.जगन्नाथविरचिते रसगङ्गाधरस्य द्वितीयाननम्।

## अनुशीलिताग्रन्थसूची-

१. अवस्थी, ब्रह्ममित्रः। अलंकारकोषः। दिल्लीः इन्दुप्रकाशन्, १९८९।
२. आनन्दवर्धनः। ध्वन्यालोकः। सम्पा. विष्णुपदभट्टाचार्यः। कोलकाताः संस्कृतसाहित्यपरिषद्, १९८३।
३. उद्भटः। काव्यालंकारसारसंग्रहः। सम्पा. नारायणदास-वनहट्टी। पूनाः भाण्डारकर-ओरियन्टाल्-रिसार्च्-इन्स्टिटिउट्, १९८२।
४. जगन्नाथः। रसगङ्गाधरः। सम्पा. मथुरानाथशास्त्री। वाराणसीः मतिलालवनारसीदासः, १९९०।
५. दण्डी। काव्यादर्शः। सम्पा. चिन्मयीचट्टोपाध्यायः। कोलकाताः पश्चिमबङ्गराज्यपुस्तकपर्षद्, १९९५।

६. दाशगुप्तः, सुरेन्द्रनाथः। काव्यविचारः। कोलकाताः चिरायतप्रकाशन्, २००४।
७. वामनः। काव्यालंकारसूत्रवृत्तिः। सम्पा. अनिलचन्द्रवसु। कोलकाताः संस्कृतवुक्-डिपो, २००७।
८. विश्वनाथः। साहित्यदर्पणः। सम्पा. कृष्णमोहनशास्त्री। वाराणसीः चौखम्बासंस्कृतसंस्थानम्, २०१४।
९. भामहः। काव्यालंकारः। सम्पा. रामानन्दशर्मा। वाराणसीः चौखम्बासंस्कृतसिरिज्-अफिस्, २०१३।
१०. भरतः। नाट्यशास्त्रम्। सम्पा. पारसनाथद्विवेदी। वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २००९।
११. भट्टाचार्यः, अमियकुमारः। साहित्येर दोष गुण ओ अलंकार प्रसङ्गे आचार्य मम्मट। कोलकाताः संस्कृतपुस्तकभाण्डारः, २०१२।
१२. मम्मटः। काव्यप्रकाशः। सम्पा. वामनाचार्यः। दिल्लीः परिमल् पाब्लिसार्स्, २००८।
१३. मिश्रः, जयमन्तः। काव्यविच्छित्तिमीमांसा। निउ दिल्लीः राष्ट्रीयसंस्कृतसंस्थानम्, १९९८।
१४. रुय्यकः। अलंकारसर्वस्वम्। सम्पा. रेवाप्रसादद्विवेदी। वाराणसीः चौखम्बासंस्कृतसंस्थानम्, १९३९।
१५. रुद्रटः। कव्यालंकारः। सम्पा. रामदेवशुक्लः। वाराणसीः चौखम्बाविद्याभवनम्, १९६२।

# नैषधचरिते शकुनशास्त्रप्रयोगः – एकं संक्षिप्ताध्ययनम्

**सुकन्याभट्टाचार्यः**
शोधछात्रा, संस्कृतपालिप्राकृतविभागः, विश्वभारती

(***निबन्धनिर्यासः-***
वेदे, रामायणे, महाभारते, याज्ञवल्कस्मृतौ, अग्निपुराणे च शकुनशास्त्रस्य वर्णना बहु वर्तते। आदौ शकुनस्य विहगस्य वा दर्शने, रावे, पार्श्वे, सम्मुखे, पश्चात् वा उपवेशने च शुभाशुभयोः विचारः क्रियते स्म इत्यतः शास्त्रमिदं शकुनशास्त्रमिति नाम्ना प्रसिद्धम्। शक्-धातोः-उनन्-प्रत्यययोगेन शुभाशुभचिह्नार्थः भवति। नैषधीयचरितममिति काव्यं महाभारतस्य वनपर्वा-धारीकृत्य महाकविना श्रीहर्षेण रचितम्। नलदमयन्त्योः जीवनप्रसङ्गानुरोधेन रचितेऽस्मिन् महाकाव्ये शकुनशास्त्रस्य प्रतिफलनं बहुत्र प्रप्यते। तत्र मानवजीवनस्य शुभाशुभफलानि शकुनशास्त्रोपदिष्टैः चिह्नैः ज्ञायन्ते इति अभिव्यक्तमस्ति। महाकाव्याद् अस्मात् कतिपयोदाहरणानि संगृह्य विषयपरिष्कारं कर्तुकामा वयम्।)

**उपक्रमः-**

शास्त्रेषु शकुनशास्त्रं सुप्रसिद्धं सुप्राचीनमपि। वेदे, रामायणे, महाभारते, याज्ञवल्क्यस्मृतौ अग्निपुराणे च शकुनशास्त्रस्य वर्णना प्राप्यते। देवनरपति विरचिता नरपतिजयचर्या, वसन्तराजः विरचितं वसन्तराजशकुनम्, नरहरिकृतं नरहरिशकुनम्, हरिद्राशाकुनम्, शकुनावलिः, गणितसार चूणामणिशास्त्रम्, विवेकविलासः, भगवतीसूत्रम्, चेत्यादिषु ग्रन्थेषु शकुनविषयः चर्चितः। नरपतिजयचार्याः टीकाकाराः नरहरि-भूधर-रामनाथादयः टीकाकाराऽपि शकुनशास्त्र-चर्चामग्रे नीतवन्तः। कालिदास-माघ-श्रीहर्षादीनां रचनास्वपि अस्य वर्णना अस्ति। कति शास्त्रकाराः ज्योतिषशास्त्रस्य अपरम् एकमङ्गं शकुनशास्त्रमिति मन्यन्ते। परन्तु एतनं न समीचीनम्। शकुनशास्त्रम् एकं भिन्नं शास्त्रम्। न केवलं तत्कालीनसमाजे अपि तु अद्यापि भारतवर्षस्य समाजे मानवानां जीवने शकुनशास्त्रस्य उपयोगिता अस्ति।

परवर्तिकाले शास्त्रकारैः इदं विषयमवलम्ब्य बहवः ग्रन्थाः विरचिताः। परन्तु अस्मिन् शोधप्रबन्धे महाभारतस्य वनपर्वाधारीकृत्य महाकविना श्रीहर्षेण रचितं नैषधीयचरितमिति महाकाव्ये वर्णितस्य शकुनशास्त्रस्य

आलोचनां कर्तुमिच्छामः। नलदमयन्त्योः जीवन-प्रसङ्गानुरोधेन रचितेऽस्मिन् महाकाव्ये शकुनशास्त्रस्य प्रतिफलनं बहुत्र प्राप्यते। तत्र मानवजीवनस्य शुभाशुभफलानि शकुनशास्त्रोपदिष्टैः चिह्नैः ज्ञायन्ते इति अभिव्यक्तमस्ति।

**शकुन इति शब्दस्य स्वरूपम्-**

शक् धातोः उनन् प्रत्यययोगेन शकुन इति शब्दस्यार्थः शुभाशुभचिह्नार्थः भवति। शब्दकल्पद्रुमस्य पञ्चमकाण्डे "शक्नोति शुभाशुभविज्ञातुम् अनेन इति शकुनम् "[1] इति प्राप्यते। विश्वकोषेऽपि "शकुनं तु शुभाशंसा निर्मिते शकुनः पुमान्" इत्युच्यते। अतएव शकुनस्य विहगस्य वा दर्शने, रावे, पार्श्वे, सम्मुखे, पश्चाद् वा उपवेशने च शुभाशुभयोः विचारः क्रियते स्म इत्यतः शास्त्रमिदं **शकुनशास्त्रमिति** (The science of omens) नाम्ना प्रसिद्धम्।

**वस्तु-दर्शनात् शुभाशुभयोः विचारः-**

पुराकालात् भारतवर्षस्य मानवाः यात्राकाले शुभाशुभचिह्नैः गमनागमनस्य कालं कार्यस्य साफल्यमसाफल्यं च निर्धारयन्ति स्म। कुत्रापि गमनकाले जलपूर्णकुम्भस्य दर्शनं सिद्धिसूचकं भवति। अस्य प्रमाणं नैषधीयचरितस्य द्वितीये सर्गे प्राप्यते। नलेन प्रेरितः हंसः

कुण्डिननगरीं प्रति गमनकाले सर्वप्रथमं पथि जलपूर्णं कलसं पश्यति, अयंशुभसंङ्केतरूपेण गृह्यते।

प्रथमं पथि लोचनातिथिं पथिकप्रार्थितसिद्धिशंसिनम्।
कलसं जलसंभृतः पुरः कलहंसः कलयाम्बभूव सः।।(नै. 2/65)

अद्यापि जनजीवने एतस्य प्रभावोऽस्ति। जलपूर्णेनकुम्भेन पूर्णताप्राप्तिः भवतीति ज्ञायते। अतः शुभानुष्ठानस्य प्रारम्भे गृहे जलपूर्णस्य कुम्भस्य स्थापनं रीतिरूपेण प्रचलितमस्ति।

तत्पश्चात् सः नलस्य विलासवने फलपूर्णस्य वृक्षस्य दर्शनं लभते। फलपूर्णानां वृक्षाणां दर्शनम् अभीष्टफलायशुभमिति ज्ञायते।[2]

आधुनिककालेऽपि मानवाः गमनागमनकाले दृष्टैः पशुपक्षिभिः शुभाशुभे विचारयन्ति।यात्राकाले पथि वा गजानां दर्शनं अतीव शुभसङ्केत इति विश्वस्यते। दूतकर्मणि नियुक्तः हंसः आकाशे मेघनिर्मितैः करिशावकस्य दर्शनं प्राप्नोति यत् दूतकार्ये साफल्यस्य पूर्वसङ्केतं इति मन्यते। परन्तु यात्राकाले सर्पाणां हिंस्रपशूनां च दर्शनं न शुभकरम्। ततः हंसः वृक्षाभ्यन्तरे लुक्कायितान् तान् पश्यति स्म, यत् अशुभफलं नाशयति।[3] विषयेऽस्मिन् मल्लिनाथेन 'जीवातु'

टीकायाम् उक्तः – नगं पर्वतं ददर्श 'पूर्णकुम्भादिदर्शनं पान्थक्षेमकरमि'ति निमित्तज्ञाः।[4] अधुना अपि मानवानां निकटे एतद्विषयस्य गुरुत्वमस्ति। नैषधकारेण श्रीहर्षेण उच्यते –

जय जय महाराज प्राभातिकीं सुषमामिमां सफलयतमां दानादक्ष्णोर्दरालसपक्ष्मणोः।

प्रथमशकुनं शय्योत्थायं तवास्तु विदर्भजा प्रियजनमुखाम्भोजात्तुङ्गं यदङ्ग! न मङ्गलम्।।(नै. 19/2)

अस्मात् श्लोकात् ज्ञायते यत् प्रत्यहं प्रातोरुत्थायः प्रियजनानां दर्शनं समीचीनम्। एतत् शुभफलानि लभ्यन्ते। भारतवर्षस्य प्रतिगृहं अस्य नियमस्य मान्यता अस्ति।

**अनुभवादिभ्यः शुभाशुभयोः विचारः-**

अद्यापि शकुनशास्त्रकाराः अङ्गानां स्पन्दनैः शुभाशुभे विचारयन्ति। भारतीयसंस्कृत्यनुसारं पुरुषाणां कृते दक्षिणाङ्गानां स्पन्दनं नारीणां कृते वामाङ्गानां स्पन्दनं च शुभफलसूचकं भवति। परन्तु नारीपुरुषयोः उभययोः कृते विपरीताङ्गानां स्फुरणं अशुभस्य इङ्गितं ददाति। एतस्य उल्लेखः महाकविना कालिदासेन विरचितं शाकुन्तलमिति नाटकस्य प्रथमाङ्के रघुवंशमिति महाकाव्यस्य चतुर्दशे सर्गे

च प्राप्यते। अतो यात्राकाले कस्यापि कार्यस्य स्मरणकाले वा यदि पुरुषाणां दक्षिणाङ्गेषु स्पन्दनं जायते तर्हि यात्रा सफलं भवति कार्ये अवश्यमेव साफल्यमायाति इति अभिव्यक्तमस्ति। यदा नलः कुण्डिननगर्यां दूतकार्यवशात् प्रविशति, तदा सः दक्षिणाक्ष्णि कम्पनम् अनुभवति, यत् प्रियया सह मिलनरूपस्य शुभफलस्य सङ्केत आसीत्।

स्विद्यत्प्रमोदाश्रुलवेन वामं रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः।
अन्यत्पुनः कम्प्रमपि स्फुरन्तं तस्याः पुरः प्राप नवोपभोगम्।।(नै. 6/6)

केनापि मानवेन सह साक्षात्काले यदि देहाभ्यन्तरात् चतुःपार्श्वाद् वा शुभसंकेताः प्राप्यन्ते तर्हि सः व्यक्ति अपि अभीष्टफलप्रदायी हितकरो वा भवति। यदा देवी सरस्वती भीमस्य सभामध्ये अकस्मात् आविर्भूता तदा नृपतिः भीमः स्वरादिभिः शुभचिह्नैः सा हितकारिणी इति अनुभूय तां पूजयति।

तत्कालवेद्यैः शकुनस्वराद्यैराप्तामवाप्तां नृपतिः प्रतीत्य
तां लोकपालैकधुरीण एष तस्यै सपर्यामुचितां दिदेश।।
(नै. 10/91)

श्लोकेऽस्मिन् व्यवहृतेन शकुन इति पदेन शुभाशंसिनिमित्तम् अभिव्यजते। मल्लिनाथेन 'जीवातु' टीकायां 'शुभाशंसिनिमित्ते च खगे च शकुनं विदुः' इति उल्लेखितम्।[5] एतद्विषये नारायण उक्तवान् – तत्कालवेद्यैः तदागमज्ञेयैः शकुनस्वराद्यैः काकस्वरादिशकुननासिकास्वर-दक्षिणचक्षुः स्पन्दाद्यैः कृत्वा तां देवीमाप्तामभीष्टां प्राप्तां प्रतीत्य ज्ञात्वा, आप्तागमनसमये भुजस्पन्दादयो भवन्ति।[6]

पवनमाध्यमेन अपि शुभसंङ्केतो ज्ञायते। अस्य निदर्शनं नैषधचरितस्य प्रथमे सर्गे उपलभ्यते। श्रीहर्षेनोच्यते – लताऽबलालास्यकलागुरुस्तरुप्रसूनगन्धोत्करपश्यतोहरः।

असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः।।
(नै.1/106)

अत्र श्रीहर्षेण समीरणं विविधैः विशेषणैः अभिधीयते। यदा नलः वनं प्रविशति तदा मृदु मन्दं शीतलं सौरभयुक्तं च समीरणः तं अभ्यर्थयति। परन्तु अत्र सुगन्धयुक्तः, मृदुः वायुः सिद्धिसूचको भवति इति व्यञ्जनया अभिव्यक्तमस्ति।

**देवतादीनां स्मरणमाध्यमेन शुभस्य सम्पादनम्-**

गमनकाले, विपत्काले शुभानुष्ठाने वा कुलदेवानां ईश्वराणां वा स्मरणं भारतीयपरम्पराया अन्तर्गतम्। अस्य प्रचलनमस्ति पुराकालात्। आधुनिकयुगेऽपि अस्य नियमस्य व्यतिक्रमः न दृश्यते। कस्यापि शुभकार्यस्य प्रारम्भे कुलदेवान् पितृपुरुषान् प्रति विघ्नात् रक्षणाय अर्घ्यनिवेदनम् अद्यापि परिलक्ष्यते। एतदपि शकुनशास्त्रस्य अन्तर्गतम्। 'शकुनादौ शुभेयायाज्जयाय हरिमास्मरन्'[7] इत्युच्यते अग्निपुराणे। नैषधचरितस्य दशमे सर्गे भीमः यदा दमयन्ती उपर्युक्तं वरं कथं निर्वाचयति इति विषये चिन्ताग्रस्त आसीत् तदा सः वंशपरम्परोपासितस्य नारायणस्य स्मरणं करोति।[8]

नैषधचरितमिति महाकाव्यात् ज्ञायते यत् वहिर्गमनकाले कुलदेवैः सह भरतार्जुनवैन्यवत् नलस्य स्मरणमपि इष्टफलप्रदायि भवति। यः प्रवासे यात्राकाले नलस्य नामोच्चारणं करोति सःअभिष्टवस्तु प्राप्नोति निर्विघ्नं गृहे प्रत्यावर्त्तते च।[9] अस्मिन् विषये मल्लिनाथस्य अभिमतम् एतादृशं–' वैन्यं पृथुं हैहयमर्जुनञ्च शाकुन्तलेयं भरतं नलं च। एतान्नृपान्यः स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्च।'[10]

**स्वप्नदर्शनात् शुभाशुभयोः विचारः-**

स्वप्नमाध्यमेन अपि मानवजीवनस्य शुभाशुभयोः इङ्गितानि उपलभ्यन्ते। अग्निपुराणे स्वप्नाध्याय इति नाम्ना एक अध्यायः अस्ति। मानवाः स्वप्ने यानि पश्यन्ति तैः सह तेषां गभीरं सम्बन्ध अस्ति इति शकुनशास्त्रकाराणां मतम्। दमयन्ती प्रतिरात्रौ स्वप्ने पतिरूपेण नलं पश्यति स्म।[11] परवर्तिकाले नलः दमयन्तीं पत्नीरूपेण स्वीकृतवान्। एतस्य व्याख्या मल्लिनाथेन कृतः – तथा हि सुप्ति स्वप्नः अदृष्टम् अत्यन्ताननुभूतमप्यर्थं किमुत दृष्टमिति भावः। अदृष्टवैभवात् प्राक्तनभाग्यवलात् जनदर्शनातिथिं लोकदृष्टिगोचरं करोति, तदत्रापि निमित्ताददृष्टात्तादृक् स्वप्नज्ञानमुत्पन्नमित्यर्थः।[12] दमयन्त्याः स्वप्नस्य व्याख्याप्रसङ्गे अपरेकेण टीकाकारेण नारायणेन उक्तः –"सुप्तिः स्वप्नः कदाचिद्दृष्टमप्यर्थं वस्तु अदृष्टवैभवाद्धर्माधर्मसामर्थ्याज्जनदर्शनातिथिं जनदर्शनगोचरं करोति। यद्दृष्टं दृश्यते स्वप्नेऽनुनभूतं कदापि न" इति न्यायेन जन्मान्तरस्थानान्तरानुभूतं समुत्पन्नसंस्कारमस्मिञ्जन्मन्यदृष्ट-मप्यर्थं धर्माधर्माविव दर्शयति इति भावः।[13]

शास्त्रकाराः रात्रौ चतुर्थयामे दृष्टं स्वप्नं अचिरात् फलम् ददाति इति मन्यन्ते। नारायणस्य मते –

"गोविसर्जनवेलायां दृष्ट्वा सद्यः फलं लभेत्।"[14] एतस्य वाक्यस्य प्रमाणं नैषधीयचरितस्य सप्तमसर्गे प्राप्यते –

संभुज्यमानाद्य यथा निशान्ते स्वप्नेऽनुभूता मधुराधरेयम्।
असीमलावण्यरदच्छदेयं कथं मयैव प्रतिपद्यते वा।।(नै. 7/42)

अत्र नलः निशावसाने स्वप्ने दमयन्तीं पश्यति। अयं नल-दमयन्त्योः मिलनस्य पूर्वसङ्केतः आसीत् । मानवाः स्वप्नमाध्यमेन शुभाशुभयोः विचारम् अधुनापि कुर्वन्ति।

**शुभसूचकानि वस्तूनि-**

शुभानुष्ठाने, वहिर्गमनकाले प्रात्याहिकजीवने वा शुभसूचकानां वस्तूनां दर्शनं स्थापनं वा विशेषफलदायि भवति। नैषधचरितस्य टीकाकारः नारायणः मङ्गलवस्तूनां प्रसङ्गे "दध्याज्यादर्शादिर्शनं शुभावहम् इति वसन्तराजग्रन्थे ज्ञातव्यम्।"[15] इत्युच्यते। अग्निपुराणे "फलं घृतं दधि पयो अक्षतादर्शमाक्षिकम्। शङ्खः इक्षुः शुभं वाक्यं भक्तवादित्रगीतकम्।"[16] इति प्रख्यापते। श्रीहर्षेणापि नैषधीयचरितस्य बहुषु सर्गेषु नलदमयन्त्योः जीवनवृत्तान्तप्रसङ्गे शकुनसूचकानां वस्तूनाम् उल्लेखं

करोति। श्रीहर्षः नलदशनासक्तानां पुराङ्गनानां वर्णनाप्रसङ्गे वस्तुतः मङ्गलवस्तूनां वर्णनं व्यञ्जनामाध्यमेन करोति।

तस्य मते मङ्गलकुम्भः, पूर्णकुम्भः, दर्पणः, लाजाः, मधु, फलं, पुष्पं, दधि, अक्षत इत्यादयः शुभसूचकाः। अतो एतेषां दर्शनमपि शुभसूचकम् इति मन्यते। अस्य नियमस्य पालनम् इदानीमपि दृश्यते। अद्यापि भारतवर्षस्य मानवाः शुभानुष्ठानेषु उत्सवेषु वा जलपूर्णकलस-स्थापनम्, सज्जाकर्मणि पुष्पाणां व्यवहारः, दधि भूक्त्वा शुभदिवसस्य प्रारम्भः (यत् दधिमङ्गलमिति नाम्ना सुपरिचितम्) चेत्यादीनां रीतिनां सयत्नेन प्रतिपालनं कुर्वन्ति। लाजानां प्रसङ्गे मल्लिनाथेनोक्तः –“उत्सवसम्बन्धिलाजामोक्षणं वा, कृतं, तदेव माङ्गलिकं लाजावकिरणं जातमितिभावः आवश्यकश्चायमाचारः।”[17] भारतीयसंस्कृतेः आचारे च माङ्गलिकवस्तूनां उपयोगिताप्रसङ्गे मल्लिनाथेन ‘जीवातु’ टीकायां उक्तः –“प्रायेण उत्सवेषु नववस्त्रवेष्टितं पूर्णकलशमग्रे स्थापयतीत्याचारः। शूभसूचकशकुन – रूपतया

मङ्गलकुम्भसम्भृतेर्यात्रायामुपयोगित्वान्, **...**तेन च पूर्णकुम्भदर्शनस्य भाविशुभसूचकत्वरूप**...**।”[18]

अग्निपुराणे विभीतकवृक्षस्य अशुभता प्रख्यापिता। तदनुसारं नैषधमहाकाव्यस्य सप्तदशसर्गे कलिः विभीतकवृक्षे आश्रयं नीत्वा भीमस्य पराभावं साधयितुं यतते।

**अशुभचिह्नानि-**

अस्मिन् महाकाव्ये नलदमयन्त्योः जीवनप्रसङ्गे श्रीहर्षेण न केवलं शुभचिह्नानि वर्ण्यन्ते, अत्र अशुभचिह्नानां तेषां फलानाञ्च विचाराः अपि लभ्यन्ते। श्रीहर्षस्य मते शुभानुष्ठाने अश्रुविसर्जनं न समीचीनम्। एतेन अमङ्गलं भवति। अस्य महाकाव्यस्य नवमे सर्गे नलः स्वहस्तेन दमयन्त्याः अश्रु परिमार्जयति।[19] दमयन्ती यदि अश्रुविसर्जनं करोति तर्हि तयो कृते न शुभं भवति इति अस्य निहितार्थः। प्रतिकूलवायुः अपशकुनस्य इङ्गितं वहति ।[20] वने स्थितानि वृक्षाणि तेषां वायु-कम्पित-पल्लव-कर-माध्यमेन दमयन्तीं कुपथि गमनाय निषेधयति। मल्लिनाथेन उच्यते – “मरुता ललन् चलन् पल्लव एव पाणिस्तस्य कम्पैः कपोतहुङ्कारगिरा च वनाली आलीव सखीव प्रतिषेधति

निवारयति , पश्य इति वाक्यार्थः कर्म। यथा लोके अमार्गवृत्तं सुहृज्जनः पाणिना वाचा च वारयति तद्वदित्यर्थः।"[21]

सूर्याभिमुखी गमनं न शास्त्रानुसारि, तर्हि न शुभम्। नैषधकारेण व्यञ्जनया अस्य द्योतनाक्रियते –

शस्ता न हंसाभिमुखी तवेयं यात्रेते ताभिश्छलहस्यमाना।
साऽहं स्म नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः।।(नै. 3/9)

एतद्विषये अग्निपुराणे अपि आलोचनाअस्ति। हंसः शुभसूचकः, अतः विजयं ददाति। परन्तु सूर्याभिमुखे गमने अपशकुनं भवति छायायाःअनुसरणकारणात्। हंसमाध्यमेन हि दमयन्त्याः नलप्राप्तिः अभवत्।

चण्डालानां दर्शनमपि अशुभकरमिति नैषधकारेण उक्तम्।[22] यात्रारम्भे छिक्काया उद्गमनमपि अशुभकरमिति नैषधे सूचितमस्ति।[23]

**निष्कर्षः-**

अस्माकं अध्ययनात् इदं यत् नैषधकारः श्रीहर्षः भारतस्य शकुनशास्त्रपरम्परां सुष्ठुं जानाति स्म। शकुनशास्त्रं

आधुनिकयुगेऽपि जनानां बहूपकाराय भविष्यति यथा वास्तुशास्त्रम्, ज्योतिषशास्त्रं वा तथैव शकुनशास्त्रं सुखकरजीवनस्य कृते अवश्यम् अभ्यसनीयम्।

**पादटीकाः-**

1. शब्दकल्पद्रुम, पञ्चमकाण्ड, पृ-2
2. अवलम्ब्य दिदृक्षयाऽम्बरे क्षणमाश्चर्य्यरसालसं गतम् ।
   स विलासवनेऽवनीभृतः फलमैक्षिष्ट रसालसंगतम् ।।नै.च. 2/66
3. नभसः कलभैरूपासितं जलदैर्भूरितरक्षुपन्नगम् ।
   स ददर्श पतङ्गपुङ्गवो विटपच्छन्नतरक्षुपन्नगम् ।। नै.च. 2/67
4. 'जीवातु' टीका, नै.च. 2/67
5. तत्रैव, 10/91
6. नारायणटीका, नै.च. 10/91
7. अग्निपुराण, 233/ 11 पूर्वार्द्ध, पृ- 339
8. श्रद्धालुसंकल्पितकल्पनायां कल्पद्रुमस्याथ रथाङ्गपाणेः ।
   तदाऽऽकुलोऽसौ कुलदैवतस्य स्मृति ततान क्षणमेकतानः ।।
   नै.च.10/69
9. प्रवसते भरतार्जुनवैन्यवत्स्मृतिधृतोऽपि नल ! त्वमभीष्टदः ।
   स्वगमनाफलतां यदि शङ्कसे तदफलं निखिलं खलु मङ्गलम् ।।
   नै. च. 5/134
10. 'जीवातु' टीका, नै.च. 5/134

11. मनोरथेन स्वपतीकृतं नलं निशि क्वसा न स्वपती स्म पश्यति ।
अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम् ।।
नै.च. 1/39

12. 'जीवातु' टीका, नै.च. 1/39

13. नारायणटीका, नै.च. 1/39

14. नारायणटीका, नै.च. 7/42

15. नारायणटीका, नै.च. 15/76

16. अग्निपुराण, 230/12, पृ- 336

17. 'जीवातु' टीका, नै.च. 15/75

18. 'जीवातु' टीका, नै.च. 15/76

19. दृशोरमङ्गल्यमिदे मिलज्जलं करेण तावत् परिमार्जयामि ते ।
अथापराधं भवदङ्घ्रिपङ्कजद्वयीरजोभिः सममात्ममौलिना ।।
नै. च. 9/106

20. वृथाऽर्पयन्तीमपथे पदं त्वां मरुल्ललत्पल्लवपाणिकम्पैः ।
आलीव पश्य प्रतिषेधतीयं कपोतहुङ्कारगिरा वनाली ।।
नै.च. 3/14

21. 'जीवातु' टीका, नै.च. 3/14

22. विमुखान्द्रष्टुमप्येनं जनंगम इव द्विजान् । नै.च. 17/112

23. समं सपत्नीभवदुःखतीक्ष्णैः स्वदारनासापथिकैर्मरुद्भिः ।
अनङ्गशौर्यानलतापदुःथैरथ प्रतस्थे हरितां मरुद्भिः ।।
नै.च. 8/ 86

## ग्रन्थसूची –


- दव, राधाकान्त. शब्दकल्पद्रुम. पञ्चमकाण्ड. वाराणसी. चौखाम्बा संस्कृत सीरीज आफिस. संस्करणम्-1961. PDF
- श्रीमन्महर्षिकृष्णद्वैपायनव्यासविरचितम्. अग्निपुराणम्. सं- आचार्यः श्रीबलदेवोपाध्यायः. वाराणसी. चौखाम्बा संस्कृत सीरीज आफिस. 1966
- श्रीहर्षः. नैषधीयचरितम्. महामहोपाध्यायमल्लिनाथकृत ‘जीवातु’ टीकासहित-सान्वय-सटिप्पन ‘ चन्द्रिका हिन्दीव्याख्योपेतम् ’. सं- देवर्षि सनाढ्य शास्त्री. वाराणसी. कृष्णदास अकादमी. 1984.
- श्रीहर्ष. नैषधीयचरितम्. महामहोपाध्यायमल्लिनाथकृत ‘जीवातु’ टीकासहित-सान्वय-सटिप्पन ‘ चन्द्रिका हिन्दीव्याख्योपेतम् ’. सं- देवर्षि सनाढ्य शास्त्री. वाराणसी. कृष्णदास अकादमी (सर्ग १२-२२ उत्तरार्द्ध). 1984.
- श्रीहर्षः. नैषधीयचरितम्. श्रीमन्नारायणरचितया नैषधीयप्रकाशाख्याव्याख्यासमुल्लसितम् महामहोपाध्याय, दाधीचपण्डित शिवदत्तशर्मणा, टीकान्तरीयटिप्पण्योपस्कृत्य संशोधितम्, मुम्बई. निर्णयसागराख्यमुद्रणयन्त्रालय. चतुर्थसंस्करणम् – शाके 1834, सन् 1912,

# गौरीधर्मपालदेव्या  मन्त्रानुवादः  - समीक्षा एका

(ऋग्वेदीयपर्जन्यसूक्तस्य -५/८३, अथर्ववेदीयगृहसूक्तस्य -७/६० च)

**उज्ज्वलकर्मकारः**

शोधच्छात्रः कलिकाताविश्वविद्यालयस्य

(***निबन्धनिर्यासः***-

वैदिकमन्त्राणां नवीनतमा अनुवादिका खलु गौरीधर्मपालमहाभागा, पुरोनतुन वेदेर कविता (वङ्गभाषायां रचितम्)  इति ग्रन्थे सा खलु वरिष्ठा अध्यापिका पञ्चविंशतेः ऋग्वेदीयसूक्तानां तथा अष्टाणाम् अथर्ववेदीयसूक्तानां पद्यानुवादं कृतवती (बहुत्र विशिष्टमन्त्राणां मन्त्रांशानां चापि सा पद्यानुवादं कृतवती)। अत्र प्रबन्धे ऋग्वेदीयपर्जन्यसूक्तस्य (ऋ.वे.5/83) अर्थववेदीयगृहसूक्तस्य च (अ.वे.7/60) गौरीधर्मपालदेव्या कृतस्य अनुवादस्य   समीक्षामेकां करिष्यते।)

(शब्दसंकेतः- अ.वे.= अथर्ववेदसंहिता, आश्रौ.सू.= आश्वलायनश्रौतसूत्रम्, ऋ.वे.=ऋग्वेदसंहिता, पु.वे.क.= पुरोनतुन वेदेर कविता)

अनुपूर्वकाद् वद्-धातोः घञ्-प्रत्यये कृते अनुवादः इति पदं सिध्यति। अनु पश्चाद् उद्यते इति अनुवादः इत्यस्य पदनिर्वचनम्। मीमांसादर्शने अवधारितविषयस्य पुनःकथनं हि अनुवादः उच्यते। अतः अनुवादः पूर्वकालीनं विषयान्तरम् अपेक्षते। निर्वचानुसारेण पूर्वकालीनः विषयः यस्यामेव भाषायां लिखितः तस्यामेव भाषायां तद्विषयस्यापि अनुवादः भवितुमर्हति। अधुना अनुवादः इति शब्दस्य अर्थसम्प्रसारणात् कस्यचित् ग्रन्थबद्धस्य विषयस्य भाषान्तरेण पुनः कथनं हि बुध्यते। अनधिगतायां भाषायां कल्पितस्य काव्यादेः रसास्वादने अधिगतभाषायां तेषाम् अनुवादस्य महती उपयोगिता वर्तते। विश्वस्य अखिलभाषासु वैदिकभाषा खलु प्राचीनतमा। अस्यामेव भाषायां क्रान्तदर्शिनः ऋषिकवेः दिव्यचैतन्यं विधृतमस्ति। भाषायाः नित्यगतियुक्तत्वाद् वैदिकभाषापि काले काले परिवर्तिता जाता तथा अर्वाचीनपाठक-गवेषकाणां कृते प्रयत्नबोध्या अभवत्। प्रत्युत वैदिकमन्त्रेषु निगूढतत्त्वं निहितमस्ति, वेदार्थविषये एवं प्रसिद्धः लोकविश्वासः दृश्यते। अतः भाषायाः प्राचीनत्वात् तत्त्वस्य गुह्यत्वाच्च वेदार्थस्य ज्ञानाय अर्वाचीनपाठक-गवेषकाणां कृते भाष्यानुवादादिकं हि शरणं भवति। वैदिकमन्त्राणां नवीनतमा अनुवादिका खलु गौरीधर्मपालमहाभागा। ‘पुरोनतुन वेदेर कविता’

(वङ्गभाषायां रचितः) इति ग्रन्थे सा खलु प्राध्यापिका पञ्चविंशतेः ऋग्वेदीयसूक्तानाम् अष्टाणां च अथर्ववेदीयसूक्तानां पद्यानुवादं कृतवती। ग्रन्थान्तरं सा विशिष्टमन्त्राणां मन्त्रांशानां चापि पद्यानुवादं कृतवती। अधुना ऋग्वेदीयपर्जन्यसूक्तस्य अथर्ववेदीयगृहसूक्तस्य च गौरीधर्मपालदेव्याः प्रस्तुतम् अनुवादमाश्रित्य तत्कृतानुवादस्य स्वरूपं वैशिष्ट्यं च पर्यालोच्यते।

कादम्बर्याः वङ्गानुवादे महामहोपाध्याय-हरिदाससिद्धान्तवागीशवर्याः उपाख्यानानुवादः, भावानु-वादः, भाषानुवादः इत्यादयः भेदेन अनुवादस्य त्रैविध्यं स्वीकृतवन्तः[1]। कश्चिद् आख्यानभागं समाश्रित्य यत्र अनुवादकः भाषान्तरम् उपजीव्य तदाख्यानं अनुवदति, तदा तदनुवादः खलु उपाख्यानानुवादः उच्यते। अत्र अनुवादकस्य महती स्वाधीनता वर्तते, यथाहि तत्र अनुवादकस्य कृते मूलभूतविषयस्य प्रत्येकं पदस्य वा अनुधावनं न निश्चयीकृतं भवति।[2] महाभारतस्य आख्यानाश्रयिण्यः विश्वकवेः रवीन्द्रनाथस्य ‘कर्णकुन्तिसंवाद’, ‘विदाय-अभिशाप’ इत्यादयः कविताः उपाख्यानानुवादस्य पर्यायीकर्तुं शक्नुमः। यत्र मुख्यग्रन्थस्य विषयस्य वा भावानुसारेण स ग्रन्थो विषयो वा अनूद्यते तदा तदनुवादः भावानुवादः इत्याचक्षते।[3] वेद-

वेदान्तादीनां शास्त्रीयग्रन्थानां भावानुवादः दृश्यते। भाषानुवादस्तु आयाससापेक्षः, यत्र मुख्यभावस्य भाषायाश्च मुखापेक्षी भूत्वा तस्य अनुवादः क्रियते।[4] मुख्यग्रन्थस्य बोधे भाषानुवादः महान् उपयोगी भवति।

गृहं पर्जन्यश्चेत्येते सूक्ते न तु गुह्यदार्शनिकभावाभिव्यञ्जके। गृहसूक्ते प्रवासात् प्रत्यागतस्य प्रवासिनः हृदयगताः हर्षशङ्कादयः भावाभिव्यक्तयः व्यञ्जिताः। पर्जन्यसूक्ते वृष्टेरागमने तु नैसर्गिकपरिमण्डलस्य विचित्रं चित्रं ऋषिणा अत्रिणा काव्यकल्पेन प्रध्वनितम्। अतः सूक्ते एते रसोत्तीर्णे। एतयोः सूक्तयोः गौरीधर्मपालदेव्याः कृतानुवादे सिद्धान्तवागीशवर्येण प्रोक्तयोः भावानुवादभाषानुवादयोः रूपक्लृप्तिः भवति। उदाहरणेन तत्स्पष्टीयते अत्र – वास्तोष्पतिदेवताकः गृहसूक्तगतः द्वितीयः मन्त्रः गौरीधर्मपालदेव्याः कृतानुवादेन सह उल्लिख्यते, पादानुसारेण-

| | |
|---|---|
| इमे गृहा मयोभुव | এ বাড়ি আমার সুখের আগার |
| ऊर्जस्वन्तः पयस्वन्तः। | তেজে ভরপুর, দুধের পুকুর, |
| पूर्णा वामेन तिष्ठन्तः | অচল, অটল, ভরা প্রিয়-ধনে- |
| ते नो जानन्तु आयतः।। | আমি যে আসছি সে যেন তা জানে। |
| (अ.वे.७।६०।२) | (पु.वे.क, पृ.११३) |

मन्त्रस्यास्य गौरीधर्मपालदेव्या कृतः वङ्गानुवादः भावस्य भाषायाश्च मूलानुगः एव अभवत्। मन्त्रगतयोः ‘मयोभुव’, ‘पयस्वन्तः’ इत्येतयोः पदयोः व्याख्याने वेदार्थप्रकाशकारः सायणाचार्यः ‘सुखस्य भावयितारः’, ‘क्षीरादिसमृद्धाः’ इत्यादिकमर्थं कृतवान्। परन्तु परिवर्तितयुगचेतनायाः वशवर्तिन्याः पाठकरुचेः उपयोगिनं कृत्वा सा एतयोः पदयोः यथाक्रमं সুখের আগার, দুধের পুকুর इत्यादिकं लाक्षणिकम् अनुवादं कृतवती। अनुवादः अयं मुख्यार्थस्य द्योतकः सन्नपि मूलमन्त्रस्य अन्तर्निहितं भावं सम्यग् उद्घाटयति।

गृहसूक्ते मन्त्रान्तरं यथा-

| | |
|---|---|
| सुनृतावन्तः सुभगा | হাসি খুশি গান আমোদের বান |
| इरावन्तो हसामुदा। | ভাগ্যবন্ত অন্ন-পূর্ণা- |
| अतृष्या अक्षुध्या स्त | হও ক্ষুধাহীন, হও তৃষাহীন, |
| गृहा माऽस्मद् विभीतन।। | আমাকে, হে গৃহ, শঙ্কা কোরো না। |
| (अ.वे.७।६०।६) | ( पु.वे.क. पृ.११५) |

मन्त्रगतस्य 'सुनृतावन्तः' इति पदस्य सायणाचार्याख्यापितार्थः यथा – 'प्रियसत्यात्मिका वाक्, तद्वन्तः' इति, वेदार्थप्रकाशकारस्य कृते मन्त्राणां व्याख्यनकाले तेषां मन्त्राणां कर्मसु प्रयोगसम्पत्तिः अवश्यमेव प्रदर्शनीया आसीत्। प्रवासात् गृहं प्रत्यागतस्य यजमानस्य कृते गार्हस्थ्यकुण्डे समिधाधाने कृत्स्नस्य गृहसूक्तस्य विनियोगः समादिष्टवान् सायणपादः। आश्वलायनश्रौतसूत्रानुसारेण प्रवसति यजमाने गृहे जातमप्यरिष्टं पुनरागच्छति गृहस्वामिने तद्दिवसे न ज्ञापनीयम् अस्ति।[5] श्रौतसूत्रविहितस्य कर्मणः अस्य मुखापेक्षी भूत्वा सायणपादः 'सुनृतावन्तः' इति पदस्य पूर्वोक्तं 'प्रियसत्यात्मिका वाक्', तद्वन्तः इत्यादिकम् अर्थं कृतवान्। पदस्यास्य एवम् अर्थख्यापने तस्य अभिमतं यथा – 'अरिष्टादिनिमित्त-वाग्राहित्येन पुत्रमित्रादि-संपत्तिनिमित्त-वाक्सहिता भवतेत्यर्थ' इति सायणाचार्यः। परन्तु मन्त्राणां पद्यानुवादकाले गौरीधर्मपालदेवीं निकषा कर्मसु तेषां प्रयोगसम्पत्तेः प्रदर्शनस्य अवसरः नास्ति, तदा ते खलु मन्त्राः अविमिश्रकाव्यरूपेण तां निकषा प्रतिभान्ति स्म। तथाहि सा उद्धृतमन्त्रगतस्य पदस्यास्य कविकल्पमणीषया হাসি খুসি গান इत्यदिकं काव्यिकम् अनुवादं कृतवती। अयम् अर्थस्तु भावानुसारी।

पर्जन्यसूक्ते यथा –

अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवसा।
कनिक्रदद्वृषभो जीरदानू रेतो दधाति-ओषधीषु गर्भम्।।

(ऋ.वे.५।८३।१)

বলো এস এস, মহা-ভীমে ডাকো গানে গানে

ডাকো স্তবে স্তবে, ডাকো উপচারে, নুয়ে নুয়ে|

গর্জায় পর্জন্য-বৃষভ ক্ষিপ্র-দান

রেতো-বর্ষণে ওষধিতে করে গর্ভাধান|

(पु.वे.क, पृ.२५६)

'अच्छ वद' इत्यस्य अर्थः सायणानुसारेण 'अभिप्राप्य प्रार्थय', गौरीधर्मपालदेव्याः पद्यानुवादे आह्वानार्थकं पदमिदम्। सा खलु आचार्या रूपतत्त्वस्य साम्येन 'अच्छावाक' इत्यस्य शब्दस्य समार्थकरूपेण पदमिदम् अनूदितवती। तत्रभवत्या आचार्यायाः अभिमतं हि - होतृसहकारी ऋत्विग् अच्छावाकः देवान् आह्वयति, अतः अच्छावाकशब्दस्य रूपसाम्येन 'अच्छा वद' इत्यस्य अर्थः अस्मदभिमुखमाह्वय इत्यवगम्यते (पु.वे.क.पृ.२६०)। अतः पादस्यास्य तया कृतः বলো এস এস इत्यादिकः पद्यानुवादः भावानुसारी एव। तवसम् इत्यस्य

पदस्य 'बलवन्तम्' इत्यर्थं कृतवान् सायणपादः। यः खलु बलवान् सः एव भीषणः भीमः वा, अतः पदस्यास्य गौरीधर्मपालकृतः भावानुवादः सार्थकः जातः। 'कनिक्रदत्', 'जीरदानू' इत्येतयोः पदयोः अर्थानुवादे सा खलु अनुवादिका सायणानुसारिणी असीत्। (सायणानुसारेण तयोः पदार्थौ यथाक्रमं 'गर्जनशब्दं कुर्वन्', 'क्षिप्रदानश्च'।) 'रेतो दधाति...' इति मन्त्रांशस्य व्याख्यायां सायणपादः दधाति इति पदं रेतो इति पदेन सह अन्वितवान् - ओषधीषु गर्भस्थानीयं रेतः उदकं दधाति स्थापयतीति सायणपादः, परन्तु गौरीधर्मपालमहाभागा साक्षात् गर्भं इति पदेन सह दधाति पदस्य अन्वयं कृतवती, - अनुवादानुसारेण तया प्रख्यापितः मन्त्रांशस्य अर्थः यथा – 'वृषभ-पर्जन्यः रेतो वर्षणेन ओषध्यां गर्भाधानं करोति।'

पर्जन्यसूक्तगतं मन्त्रान्तरम् उदाहृयते –

प्र वाता वान्ति पतयन्ति विद्युत
उद् ओषधीर्जिहते पिन्वते स्वः।
इरा विश्वस्मै भुवनाय जायते
यत् पर्जन्यः पृथिवीं रेतसावति।।(ऋ.वे.५।८३।४)

বেগে হাওয়া বয়, দিকে দিকে বিদ্যুৎ ছোটে
চঙ্কায় ভরা আকাশ, গর্জিয়ে ওষধিরা ওঠে।
বিরাট্ পৃথিবী পর্জন্যের বীর্য-নিষেকে
প্রসূতি হৈয়া জন্মে চলেন অন্ন অন্ন বিশ্ব-ভুবনে।।

(पु.वे.क, पृ. २५७)

वेदार्थप्रकाशे सायणाचार्याख्यापितेन मन्त्रस्यास्य अर्थेन सह गौरीधर्मपालदेव्या कृतस्य पद्यानुवादस्य अर्थसाम्यं सङ्गच्छते। मन्त्रस्यास्य भाषानुवादे अनुवादिका 'पिन्वते स्वः ...' अंशस्य आधुनिकशब्दनिचयेन सार्थकं रसोत्तीर्णञ्च চঙ্কায় ভরা আকাশ इत्यादिकम् अनुवादं कृतवती। अयमंशस्य सायणकृतः अर्थः यथा – 'स्वः अन्तरीक्षं पिन्वते क्षरति' इति। इत्थं उद्धृतमन्त्रगते 'जिहते', 'रेतसावति' इत्येते पदे युगोपयोगिशब्दनिचयेन सा अनूदितवती (গর্জায়, বীর্য-নিষেকে इत्यनेन)। एवं पर्जन्यसूक्तगतं – 'घृतेन द्याव्यापृथिवी व्युन्धि' (ऋ.वे.५।८३।८) तथा 'प्रतीदं विश्वं मोदते यत्किञ्च पृथिव्यामधि' (ऋ.वे.५।८३।९) चेति पादद्वयं परिवर्तितपाठकरूचेः उपयोगिना शब्दसम्भारेण अनूदितवती तत्रभवती गौरीधर्मपालमहाभागा। तत्र प्रथमपादस्य तया

कृतः अनुवादः यथा - দ্যুলোক ও ভূলোক জলে জলে কর জলময় (पु.वे.क,पृ.२५९)। द्वितीयपादस्य यथा – হর্ষে মাতে এ বিশ্ব নিখিল চারিভিতে/ মাতোয়ারা হয় যা কিছু আছে এ পৃথিবীতে (तत्रैव)। अत्र व्युन्धि इति पदस्य জলময়, 'यत्किञ्च पृथिव्यामधि' इत्यस्य पादस्य এ বিশ্ব নিখিল চারিভিতে प्रत्युत 'मोदते' इत्यस्य पदस्य মাতোয়ারা इत्यादिकः कोलोपयोगी भाषानुवादः लभ्यते तत्कृतग्रन्थे।

बहुत्र सा खलु अनुवादिका काव्यकल्पितान् वैदिकमन्त्रान् श्रुतिरम्यतया ध्वन्यात्मकशब्दनिचयेन वाणीझंकारेण वा अनूदितवती। तद्यथा पर्जन्यसूक्ते – 'स्तनयित्नुना एति' (ऋ.वे.५।८३।६) इत्येतस्य ঝম ঝম ঝম ধারা বর্ষাও(पु.वे.क,पृ.२५९) इत्यस्मिन् अनुवादे, तथा 'रथीव कशयाश्वाँ अभिक्षिपन्न्' (ऋ.वे.५।८३।३) इति पादस्य সপাং সপাং চাবুকে যেমন রথী ঘোড়া সরান (पु.वे.क,पृ.२५७) इत्यत्रापि। इत्थं ध्वनेः अनुकृतिस्तु अनुप्रासादेः काव्यालंकारस्य चमत्कृतेः निमित्ता भवति अत्र अनुवादे। वङ्गभाषायाः श्रुतिमाधुर्ये संस्कृतेन सह उर्दु, फार्सी इत्येतासां भाषाणां शब्दमञ्जुषा अपि निमित्तभूता भवन्ति। गौरीधर्मपालदेव्याः

वैदिकमन्त्राणां पद्यानुवादे तत्सम-तद्भवभिन्नानामपि शब्दानां प्रयोगः दृश्यते। तद्यथा गृहसूक्ते – 'गृहान् उप ह्वयामहे' (अ.वे.७।६०।३) मन्त्रांशस्यास्य गौरीधर्मपाल-कृतानुवादः यथा – সেই বাড়িটিকে কানে কানে ডাকি (पु.वे.क,पृ.११३) इत्यत्र বাড়ি,ডাকি इति शब्दौ खलु तत्सम-तद्भवभिन्नौ। परन्तु एतत्पदनिचयम् आधुनिकानां स्पृहास्पदं भवन्ति। पर्जन्यसूक्ते यथा- 'दृतिं सु कर्ष विषितं न्यञ्च समा भवन्तु-उद्वतो निपादाः' (ऋ.वे.५।८३।७) इति पादस्य तत्सम-तद्भव-भिन्नानामपि शब्दनिचयेन गौरीधर्मपाल-कृतानुवादः यथा –এলিয়ে হেলিয়ে টানতে টানতে নিচু করে দাও মেঘ-মশক /উঁচু ও নিচু খানা ও খন্দ করো –সমান (पु.वे.क,पृ.२५९)। इत्थमत्र খানা,খন্দ, এলিয়ে, হেলিয়ে, টানতে इति अर्वाचीनशब्दनिचयस्य प्रयोगेन उद्धृतमन्त्रानाम् पद्यानुवादः सार्थकः सुखपाठ्यश्च भवति।

छन्दो हि पद्यस्य प्राणस्वरूपम्। ध्वन्याः परिमितगतिः स्पन्दनं वा काव्यस्य श्रुतिप्रसादं जनयति। वैदिकछन्दांसि तु अक्षरवृत्तानि, तत्र मन्त्रे परिमिताक्षरसंख्यायाः सम्पूर्त्या पृथक् पृथक् छन्दांसि भवन्ति। अथर्ववेदीयगृहसूक्तगता मन्त्रा अनुष्टुभ् इति छन्दसा निबद्धा। पर्जन्यसूक्तगता मन्त्रा मुख्यतः

त्रिष्टुभ् इत्याख्येन छन्दसा पादबद्धाः। अनुष्टुप् त्रिष्टुप् चेति छन्दोभ्यां समादिष्टाणाम् वैदिकमन्त्राणाम् वङ्गभाषायाः नव्ययुगीयकलावृत्तछन्दसा अनुवादं कृतवती तत्रभवती गौरीधर्मपालमहाभागा। मात्राप्रधानकलावृत्तछन्दसा रचित-पद्ये पर्वेषु चतसृभ्यः सप्तमात्राणि लभ्यन्ते। अस्य छन्दसो धीरमध्यमलयः समादिष्टः वङ्गीयछन्दःशास्त्रकृद्भिः। उदाहरणरूपेण गृहसूक्ताद् एकस्यानुवादस्य अत्र पाठः क्रियते-

उपहूता इह गाव उपहूता अजावयः।

अथो अन्नस्य कीलाल उपहूतो गृहेषु नः।।

(अ.वे.७।६०।४)

l l l l ll l l l l ll
ডাকি গাভীদের / অজ-অবি-দের

l l ll l l l l l l ll
কি খবর ? ভালো / আছ তো সবাই ?

ll ll l l ll l l l l
ভাণ্ডার-ভরা / অন্ন ও সুধা-

l l l l ll l ll l ll
তাদেরও সবার / কুশল শুধাই।(पु.वे.क,पृ.११२)

इत्थं तत्रभवती गौरीधर्मपालमहाभागा कलावृत्तछन्दसा अस्मच्चर्चितसूक्तद्वयं मनोज्ञशब्दनिचयेन अनूदितवती। कलावृत्तछन्दसः धीरमध्यम-लयः सहृदयपाठकानां श्रुतिप्रसादं जनयति, उत श्रुतिमन्त्राणां तया कृतपद्यानुवादे युगोपयोगिन्याः शब्दमञ्जुषायाः सार्थकप्रयोगेण कस्यचिद् अर्वाचीनाविमिश्रकाव्यपाठस्य आनन्दानुभूतिश्च लभ्यते। क्रान्तदर्शिनः कवेः काव्यकथनशैलीविषये तस्या आचार्यायाः अभिमतं हि – প্রতিটি কবির নিজস্বভাষা বা আত্মভাষা- যা তিনি তাঁর মাতৃভাষার ধ্বনিস্রোত থেকে জন্মাবধি আহরণ করে করে গড়ে তুলেছেন- হল বিশ্বভাষা বা সর্বভাষা বা পরাবাকের ঘুমন্ত বীজ, ব্রহ্মের অণ্ড!তাঁর নিজের বাগিন্দ্রিয়ই হল 'পঞ্চাশৎ বর্ণময়ী' মহাজিহ্বা মহাকালীর পুত্তলিকা!এক প্রচণ্ড উত্তাপে সেই পুতুলের অণুপরমাণু বিদীর্ণ হয়ে গড়ে উঠেছে এক চিৎ-প্রতিমা (पु.वे.क,पृ.५५)। अतः परिशेषे कथ्यते गौरीधर्मपालमहाभागा सार्थकरूपेण वैदिकपद्यानां श्रुतिगताः भावभाषाश्च समाश्रित्य भाषान्तरेण तानि नवीनरूपेण अनुसर्जनं कृतवती अनूदितवती वा। अतः तत्रभवती सा यथार्थं कविरेका।

## पादटीका -

1.सिद्धान्तवागीश, हरिदास, कादम्बरी- *বঙ্গানুবাদ সম্বন্ধে বিশেষ বক্তব্য* इत्यत्र द्रष्टव्यम्- *যে কোন অনুবাদকেই তিনভাগে বিভক্ত করা যায়৷ যথা – উপাখ্যানানুবাদ, ভাবানুবাদ ও ভাষানুবাদ৷*

2. तत्रैव, *তাহার মধ্যে অনুবাদক সম্পূর্ণ স্বাধীনভাবে চলতে পারেন বলিয়া উপাখ্যানানুবাদ সর্বাপেক্ষা সহজ*।

3.तत्रैव, *মূলের ভাব নিয়া চলিতে হয় বলিয়া ভাবানুবাদ উপাখ্যানানুবাদ অপেক্ষা কঠিন*।

4.तत्रैव , *.....আর ভাষানুবাদ করা বড়ই কঠিন৷ কারণ ইহাতে অনুবাদকে মূলের ভাব ও ভাষা এই উভয়েরই সম্পূর্ণ অধীন হইয়া চলিতে হয়৷*

5.आश्रौ.सू. २।५।१८ - विदितम् अप्यलीकं न तद्-अहर् ज्ञापयेयु।

## परिशीलिता ग्रन्थानुक्रमणी-

- <u>संस्कृतभाषायां विरचिताः सहायका ग्रन्थाः</u>

*अथर्ववेदः* (शौनकीयः)(पदपाठ-श्रीसायणाचार्यकृतभाष्य-पाठभेद-टिप्पण-सहितः), सम्पादकः विश्वबन्धुः (भीमदेवः, विद्यानिधिः, मुनीश्वरदेवश्च सहयोगिनः), *विश्वेश्वरानन्द-भारतभारती-ग्रन्थमाला-१३-१७*, चत्वारःखण्डाः, होशिआरपुरम् : विश्वेश्वरानन्द-वैदिक-शोध-संस्तानाम् , १९६०,१९६१,१९६२,१९६४।

*ऋग्वेदसंहिता* (श्रीमत्सायणाचार्यविरचितभाष्यसमेता), सम्पादकाः एन्. एस्. सोनटक्के, सि. जि. काशिकर्, वि.एस्. वरदाराज्-शर्मा, वि.भि. उम्राणिकर् प्रमुखाः, तृतीयभागः, पुणे : वौदिक-संशोधन-मण्डलम्, १९४१।

वाणभट्ट, *कादम्बरी* (वङ्गानुवादसमेता), सम्पादकः श्री-हरिदास-सिद्धान्तवागीशः, कोलकाता, १८५०।

- <u>वङ्गभाषायां विरचिताः सहायका ग्रन्थाः</u>

आश्वलायनः, *आश्वलायन-श्रौतसूत्र* (वङ्गानुवादसमेतः मूलग्रन्थः),सम्पादकः अमरकुमारचट्टोपाध्यायः, *विब्लिओथेका इण्डिका सिरिजस् क्रमाङ्कः ३२२*, कोलकाता : दि एशियाटिक सोसाइटि, २००२।

धर्मपाल, गौरी. *पुरोनतुन वेदेर कविता* , कोलकाता : ऋतम् , २००३।

भट्टाचार्य, सुधीभूषण, *वांला छन्द*, कोलकाता : एम्. सि. सरकार एण्ड सन्स (प्राइभेट्) लिमिटेड्, १३६२।

- <u>आङ्गेलभाषायां विरचिताः सहायका ग्रन्थाः</u>

Apte,Vaman Shivaram. *The Student's Sanskrit –English Dictionary* . New Delhi: Rashtriya Sanskrit Sansthan. 2010.

.

# पाणिनीयव्याकरणे कर्मकारकस्य अभिहितत्वम्

**जयन्तः सरकारः**

गवेषकः रवीन्द्रभारतीविश्वविद्यालयस्य

(***निबन्धनिर्यासः-***

संस्कृतभाषायां कारकं बहुचर्चितमेव। कर्मकारकस्याभिहितविषये एव मम गवेषणापत्रम्। कर्मकारके द्वितीयाविभक्तिः भवत्यनभिहिते, तत्राभिहिते तु 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (२-३-४६) इति प्रथमैव स्यात् अनभिहिते (२-३-१) इति सूत्रबलात्। तत्र केनापि कर्मण्यभिहिते सति तस्य कर्मणः पुनः अभिधानाय कर्मणि द्वितीयायाः प्राप्तिरेव नास्ति उक्तार्थानामप्रयोगनियमात्, तर्हि कथम् अनभिहिते एव कर्मणि द्वितीया इति नियमाय अनभिहिताधिकारः इति विचारितं व्याख्याकारदृष्ट्या। एकया क्रियया कर्मण्युक्ते अप्यन्यक्रियापेक्षया अनुक्ते सति कुत्राभिहितत्वेन प्रथमा कुत्रानभिहितत्वेन द्वितीयेति दर्शितम्। अकथितञ्च इति सूत्रेण दुहादिधातूनां न्यादिधातूनां च व्यापाराश्रयेण प्रधानकर्मणि अप्रधानकर्मणि वा लकारे सति प्रधानकर्मणः अप्रधानकर्मणः वा उक्तत्वेन कुत्र प्रथमा, एवं दुहादिधातूनां एकव्यापारपक्षस्तथा द्विव्यापारपक्ष इत्यादिविषयाः काशिकामहाभाष्यप्रौढमनोरमादि-ग्रन्थानुसारेण दर्शिताः।)

अभिपूर्वात् धाधातोः हिधातोश्च क्तप्रत्यये अभिहितशब्दस्य सिद्धौ सत्यामपि अर्थाः सम्भवन्ति पञ्चधा, यथा बन्धनम् उच्चारणं प्रतिपादनं गतिः वृद्धिः इति, परन्तु बन्धनाद्यर्थचतुष्टयस्य अभिहिते कारके इत्यत्र कर्मादिकारकविषय उपयोगाभावात्प्रतिपादनवचनोऽभि-हितशब्दो गृह्यतेऽभिपूर्वाद्धाधातोः, अभिहिते इति उक्ते निर्दिष्टे वेति, तेन अनभिहिते इति अनुक्ते अनिर्दिष्टे इत्यर्थः। कर्मणि द्वितीया (२-३-२) इति द्वितीयाविधायकं सूत्रम्, तत्र बहुत्वाद्यर्थे वचनविषये सूत्रे 'बहुषु बहुवचनम्'(१-४-२१) 'द्व्येकयोर्द्विवचनैकवचने' (१-४-२२) इति। तत्र कर्मादीनामभिहितत्वे प्रथमा स्यात् 'प्रातिपदिकार्थ-लिङ्गपरिमाणवचनमात्रे प्रथमा' (२-३-४६) इति। कर्मणि क्तादिप्रत्ययविधाने कर्म एवोक्तं न तु संख्या, अतः कर्मण्युक्तेऽपि तत्कर्मगतसंख्याभिधाने कर्मणि द्वितीया स्यादेव। तेन कर्मण्युक्तेऽपि द्वितीया प्राप्नोतीति। अतः 'अनभिहिते' इति सूत्राधिकारः। परन्तु कर्मादिकारकाभिधानं द्वितीयादिभिस्तथा वचनमपि तद्विभक्त्यैव, अत एकयैव

विभक्त्या संख्याकारकयोरभिधानम्, एवं यत्कर्म अभिधीयते संख्या तद्गतैव, तेन संख्याविशिष्टरूपेणैव कर्म अभिहितं स्यात्, तेन कर्माद्यर्थकक्तादिप्रत्ययविधानेन यथा कर्म उक्तं तथा संख्याप्युक्तैव, तेन कर्म उक्तं संख्यानुक्ता इति न सम्भवति। अतः कर्मगतानुक्तसंख्याश्रये प्राप्तद्वितीयाया निवारण अनभिहिताधिकारो व्यर्थ इति शंका स्यात्। भाष्ये 'कर्मणि द्वितीया' 'बहुषु बहुवचनं' इत्येतयोरेकवाक्यताश्रिता, सा च विशेषणविशेष्यभावेन। तत्र कर्म इति विशेष्ये एकत्वादिसंख्या विशेषणे एकत्वादिविशिष्टं कर्म इत्यर्थः स्यात्। तथा कर्म इति विशेषणे एकत्वादिसंख्यायाः विशेष्यत्वे कर्मण एकत्वादिकमित्यर्थः। तत्र संख्याविशिष्टत्वेन कर्मण्यभिहिते नास्ति प्रयोजनमनभहिताधिकारस्य संख्याविशिष्टरूपेणैव कर्मणोऽभिहितत्वात्। कर्मण एकत्वादिकमित्यर्थे कर्मण्युक्तेऽपि तत्कर्मगतैकत्वादि-संख्याभिधाने प्राप्तद्वितीयाया निषेध अनभिहिताधिकारः सार्थकः। अन्यथा कर्मणि अभिहिते अनभिहिते वा द्वितीया स्यात्। कर्मणः एकत्वमित्यर्थोऽपि कर्मगतमेकत्वं वा भाष्यकारेण 'बहुषु बहुवचनम्' इति सूत्रेणैव प्रतिपादितम्। बहु इति कथनेन कर्म बहु इति ज्ञानं स्यात्, तथाहि

बहुत्वमित्युक्तम्, बहुत्वमित्युक्ते कस्य बहुत्वमिति प्रश्नो जायते, अतः बहुत्वस्याश्रयरूपेण कर्म, कर्मणः बहुत्वमिति । काशिकाकारेणापि अनभिहितसूत्रवृत्तौ उक्तं– 'अनभिहित-कर्माद्याश्रयेष्वेकत्वादिषु ...' इति । बहुत्वम् इति कथने त्व इति भावप्रत्ययस्यावश्यकत्वेऽप्यन्तरेणापि भावप्रत्ययं तदर्थाभिधाने उदाहरणानि सन्ति - पटस्य शुक्लम् इत्यादीनि। एवं पटस्य शुक्लम् इति कथनेन शुक्लं प्रधानं विशेष्यो वा इति बोधः। एवं बहुत्वमित्यपि विशेष्यत्वेन कर्मणः बहुत्वे इति वाक्यम्।

यदि स्वार्थो द्रव्यं लिङ्गं कारकं संख्या इति पञ्चकं प्रातिपदिकार्थः स्यात् तत्र कर्मादिकारकस्यापि प्रातिपदिकेनोक्तत्वात् कर्माद्यर्थाभिधाने पुनः द्वितीयादीनामुत्पत्तिर्न स्यात्, प्रातिपदिकार्थे प्रथमैव प्राप्नोति। कर्मण्यनुक्तेऽप्यत्र द्वितीयाया न प्राप्तिः प्रातिपदिके-नैवोक्तत्वात्। सर्वत्र प्रातिपदिकार्थे प्रथमा स्यादिति भावः। अतः 'कर्मणि द्वितीया' इत्यादिविधानसामर्थ्याद्द्वितीयादयः स्युरेव। तर्हि यत्र कर्माद्यर्थकक्तादिप्रत्ययः तत्रापि द्वितीया स्यात् यथा प्रातिपदिकेनोक्तेऽपि द्वितीया इति शंका स्यात्। अतः 'अनभिहिते' इत्यधिकाराद्यत्र कर्माद्यर्थकक्तादिप्रत्ययेन

कर्मादयोऽभिहितास्तत्र प्रादिपदिकार्थे प्रथमा भवेत्। अन्यथा कर्मणोऽभिहितानभिहितयोरुभयोः पक्षे 'कर्मणि द्वितीया' इति विधानसामर्थ्याद्द्वितीयैव प्रसज्येत। परन्त्वेतदपि चिन्तनीयम् प्रातिपदिकार्थे प्रथमा विधीयते, तत्र कर्मणि द्वितीया इति, यत्र कर्मणि क्तादिप्रत्ययविधिः तत्र पुनः कर्मणि द्वितीयायाः प्राप्तिरेव नास्त्युक्तार्थानामप्रयोग इति नियमात्, तेनाभिहितत्वमाश्रित्य प्रातिपदिकार्थे प्रथमा व्यर्थानभिहिताधिकारो व्यर्थो वा, अत्रापि कर्मण एकत्वमिति विशेष्यविशेषणभावमाश्रित्यैवानभिहिताधिकारस्य सार्थकता इति। तत्र 'अनभिहिते' इति सूत्रभाष्ये कर्म विभक्त्यर्थः इति प्रतिपक्षमतम्, एकत्वादयः विभक्त्यर्था इत्यनभिहितसूत्रारम्भवादिपक्ष उपस्थापितः। तत्र कर्मणि विभक्त्याभिधेये सत्युक्तकर्मस्थले कर्मणः प्रादिपदिकार्थत्वेन तत्प्रातिपदिकार्थकर्माद्यभिधानाय प्रथमोत्पत्तिर्न स्यादिति, एकत्वादिषु विभक्त्याभिधेयेषु सत्सु ओदनं पचति देवदत्त इत्यत्र कर्तृप्रत्ययेन तिपा कर्तृगतैकत्वसंख्योक्तेति तत्संख्याभिधानाय विभक्त्युत्पत्तिर्न भवेदित्यादिप्रसङ्ग उत्थापितः, तत्र कर्मण एकत्वमिति कर्मण्युक्तेऽपि

संख्यानुक्तेति इति पक्षमाश्रित्य संख्या विभक्त्याभिधेयेति स्थापितम्।

कर्मण्युक्तेऽपि तद्गता संख्यानुक्तेत्यत्र कर्मण्यभिहिते द्वितीया नेत्यर्थसद्भावाद्दोषः स्यात्। एवमन्यकारककविषयेऽपि। यथा 'आसने आस्ते' इत्यत्रासनशब्दोऽधिकरणवाची, आस्यते अस्मिन्निति आस्धातोरधिकरणे ल्युट्प्रत्ययः। पुनः अधिकरणार्थे सप्तमी न प्राप्नोति। यत्र उपविश्यते तदासनम् इत्यधिकरणार्थवाच्येवासनमिति न पुनः अधिकरणे सप्तमीति बाधः, आसनमिति कथनेन आसनरूपं द्रव्यमेवाभिधीयते तत्र पुनः सप्तमीकरणेनापि तद्द्रव्यस्यैवाधिकरणतया प्रतीतिर्न तु भिन्नद्रव्यस्येति दोषः। अत्रेदमवधेयं यत्रोपविश्यत तदासनमिति ज्ञातेऽपि तस्याधिकरणतायाः प्रतीतिराधेयाभावे न स्यादर्थात्कस्याप्याधेयतानिरूपिताधिकरणतासनेऽस्तीत्यासनम् इति कथनान्न बुध्यते। एवं भूतलमिति कथनेनापि भूतले किमस्ति न वेति न ज्ञायते। अतः सप्तम्यभाव आधाराधेयभावप्रतीतिर्न स्यादित्यदोषः। एवं कर्मादिकारकस्थलेऽपि। न्यासे[1] एवं कारकशक्तिभिन्नतामाश्रित्यैव समाहितम्। एवमनुक्तसंख्यामाश्रित्य विभक्तिविधाने वचनेऽनिष्टता प्राप्नोति। यथा एकः वृक्षः लूनः इत्यत्र यद्यपि पर्याप्तिसम्बन्धेन एकः वृक्ष इति

प्रयोगः, तथापि वृक्ष इति कथनेन वृक्षगतशाखाप्रशाखापलाशाद्यवयवोऽपि बुध्यते, ते च बहवः, तानाश्रित्य एकत्वविवक्षायामपि बहुत्वे बहुवचनापत्तिर्स्यात्। परन्त्ववयवोऽत्र न तु कर्मत्वेन विवक्षितोऽवयवी वृक्ष एव कर्म, स एक इत्यदोषः, अतः कर्मगतैकत्वादेः फलमत्रापि, न तु यत्किञ्चित्द्रव्यादिगतमेकत्वादि। परन्तु वृक्ष इति कथनेन जातिरेव ज्ञायते न तु व्यक्तिः, तेन बहुत्वस्य प्राप्तिः कुत्र! तथापि व्यक्तिविवक्षायां बहुवचनं स्यादेव। यद्यपि 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इत्यनेन जातित्वविवक्षायामपि बहुवचनमपि सिद्ध्यति तथापि विकल्पेनैव, अपि च द्विवचनं न स्यात्।

अत्र स्वार्थादिपञ्चकं प्रातिपदिकार्थ इत्यस्मिन् पक्षे द्वितीयादयो द्योतकतयैव प्रयुज्यन्ते कर्मादीनामभिधेयतयेति। यत्र कर्माद्याधिक्यं तत्र द्वितीयादयः स्युरिति भावः। कर्माद्याधिक्येऽप्युक्ते सति प्रातिपदिकार्थमात्रत्वेन प्रथमेति भावः। 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति सूत्रम्। परन्तु स्वार्थादिपञ्चकं प्रतिपदिकार्थः कथम्। विभक्तिप्रयोग एव कर्मादीनां प्रतीतिरेवमेकत्वादिष्वपि।

अन्वयव्यतिरेकाभ्यां कारकं संख्या च विभक्त्यर्थ एवेति प्रतीतिः। तथाहि त्रिकं प्रातिपदिकार्थ इति केषाञ्चिन्मतम्। तर्हि क्तादिप्रत्ययेन कर्मण्यभिहिते कर्मादिकारकाणामपि प्रातिपतिकार्थतया प्रातिपदिकार्थमात्रे प्रथमेति व्याख्या न संगच्छते। अत्रेदमवधेयं त्रिकं प्रातिपदिकार्थ इति पक्षेSपि कर्माधिक्ये सत्यपि कर्म यत्र क्तादिप्रत्ययेनोक्तं तत्र कर्मणः प्रातिपदिकबहिर्भूतार्थत्वेSपि यस्यार्थस्य नियमेनोपस्थितिः सः प्रातिपदिकार्थः इत्यर्थस्वीकारात् त्रिकं प्रातिपदिकार्थ इति प्रातिपदिकार्थमात्रे प्रथमैव स्यात्। परन्त्व-न्वयव्यतिव्यतिरेकाभ्यां सर्वत्रैवार्थाङ्गीकारे यथा धातूपसर्गयोः अर्थनिर्णये दोषो दर्शितो भूषणसारादिषु ग्रन्थेष्वत्रापि लिङ्गार्थनिर्णये दोषसम्भावना, तटः तटम् इत्यादिषु विभक्तिप्रयोगेणैव लिङ्गज्ञानं तेन लिङ्गस्यापि विभक्त्यर्थता स्यात्। परन्तु सर्वेषामेव प्रातिपदिकानां लिङ्गमस्ति तेन लिङ्गमात्रे प्रथमा इति सूत्रकरणेनैवेष्टसिद्धिः स्यादेव। न चाव्ययानाम-लिङ्गत्वाद्विभक्तियोगाभावे पदत्वाभावे वाक्ये प्रयोगो न स्यादिति मन्तव्यम्; 'अव्ययादाप्सुपः' इति विधानादेव सुबुत्पत्तिः पदत्वञ्च। एवं सति यथोक्ते प्रथमा तथैवानुक्ते कर्माद्याधिक्ये वा प्रथमापत्तिः स्यात्। लिङ्गमात्रे इति कथनेन सूत्रे मात्रशब्दस्यावधारणार्थकत्वात् स्त्री पुमान्

नपुंसकमित्यादावेव स्यात् लिङ्गादर्थाधिक्ये न स्यात् प्रथमा। परन्तु लिङ्गमस्यास्तीत्यर्थे सत्यन्येषामाधिक्येSपि प्रथमासिद्धिः स्यादेव। तथा सति कर्माधिक्ये अपि प्रथमापत्तिः। कर्मणि द्वितीयैवेत्यर्थनियमपक्षे द्वितीयासिद्धावपि कर्मण्येव द्वितीयेति प्रत्ययनियमपक्षे प्रथमापि स्यादिति दोषः। एवं 'प्रातिपदिकार्थ...' इति सूत्रस्थाने सर्वार्थे प्रथमा इति करणेन यद्यपि सिद्ध्यति, तथापि प्रत्ययनियमपक्षे दोषस्तथा मात्रग्रहणस्य प्रयोजनमिति पक्षद्वयमुत्थापितं पदमञ्जर्याम्[2]। तत्र तत्त्वबोधिन्यां[3] सूत्रे मात्रशब्दग्रहणमेव प्रत्याख्यातं तथा प्रत्ययनियमपक्षे दोषोSपि समाहितः।

पदमञ्जर्याम्[4] प्रकारान्तरेणापि प्रातिपदिकार्थाव्यतिरेकत्वमाश्रित्याभिहिते प्रथमा तथानभिहिते द्वितीयादयः साधिताः, तत्रानभिहिताधिकारस्य व्यर्थताप्रसङ्गमुपक्रम्य कृतः कटः इत्यत्रापि कर्मणि द्वितीयायां सत्यां प्रातिपदिकार्थे प्रथमानवकाशा स्यादित्यनवकाशत्वात्प्रथमोपपत्तिर्भवत्येवेत्यनभिहिताधिकारो व्यर्थ इति पक्षः। एवं कटं करोतीत्यात्राप्यनवकाशत्वात्प्रथमा स्यादिति प्रसङ्गः। तत्र कर्माधिक्यमस्तीत्येवम्प्रकारेण द्वितीयेति न समाहितं हरदत्तेन। तत्र व्याख्यातम् - कृतः कटः इत्यत्र वाक्यार्थेन

कटशब्दस्य कर्मतायाः प्रतीतिरिति प्रातिपदिकार्थ-स्याव्यतिरिक्तत्वात्प्रथमेत्येवं कटं करोतीत्यत्र तु कटशब्देनैव कर्मशक्तिरभिधीयत इति प्रातिपदिकार्थो व्यतिरिक्त इति प्रथमा न भवतीति व्याख्या।

द्वयोः क्रिययोः स्थलेऽभिहितानभिहितनिर्णये काचित् शङ्का स्यात्, यथा 'पक्त्वा ओदनो भुज्यते देवदत्तेने'त्यत्र कर्मणि लकारात्कर्तुरनभिहितत्वाद्देवदत्तशब्दात् 'कर्तृकरणयो-स्तृतीया' (२-३-१८) इति तृतीयाया उपपन्नत्वेऽपि क्त्वाप्रत्ययस्य कृत्त्वात् 'कर्तरि कृत्'(३-४-६७) इति कर्त्रभिधेयत्वेन प्रथमा प्राप्नोति, एवं कर्मणि लकारेऽभिहितत्वेनौदनशब्दे प्रथमासिद्धावपि क्त्वाप्रत्यया-पेक्षयानभिहितत्वाश्रये द्वितीया स्यादित्यनिष्टरूपमापद्येत। भाष्यकारेण[5] 'आ च तुमुनः समानाधिकरणे' (वा.५०४३) इति वार्त्तिकमुद्धृतम्, स्वान्ययिसमभिव्याहृता-ख्यातवाच्यकारके इति वार्त्तिकार्थो निर्देशितः उद्योते, तेन क्त्वादिप्रत्ययाः स्वान्वयिसमभिव्याहृतलकारार्थवाच्यकारके स्युरिति भावः, अतः भुज्यते इत्यत्र कर्मणि लकारात्क्त्वाप्रत्ययेनापि कर्म एवाभिधीयते, तेन ओदन

इत्यपि पक्त्वेत्यनेनोक्तत्वात्प्रथमासिद्धिस्तथा देवदत्तशब्दस्य क्त्वाप्रत्ययेनाप्यनभिहितत्वात्तृतीयासिद्धिर्भवत्येवेति भावः। भाष्यकारेण तत्सूत्रभाष्ये 'अव्ययकृतो भावे भवन्ति' इत्युक्तम्, तेन भावेविधानादव्ययकृद्भिः कर्तृ-कर्मणोऽभि-हितत्वाभावे न दोष इति भावः। तत्र पदमञ्जर्याम्[6] 'ओदनः पक्त्वा भुज्यते' इत्यत्र द्वितीयाप्रसङ्गो बाधितोऽन्यप्रकारेण, तेनोक्तमोदनस्य युगपद्भ्यां भुजिपचिभ्यां न शाब्दे अन्वयः, भुजिनैवान्वयः सन्निधानात्तु पचिनेति। शब्दव्यापारापेक्षया-भिहिताश्रयेण[7] प्रथमा साधिता। तत्र प्रौढमनोरमायां[8] भट्टोजिदीक्षितेन प्रधानाप्रधानभावमाश्रित्यौदनशब्दात्प्रथमा साधिता। अत्रोभयोः क्रिययोरभिहितानभिहितशक्तिं तथा कर्तृत्वकर्मत्वशक्तिमाश्रित्य प्रधानानुसारतः समाहितम्। ओदनशब्दे यथा पचिक्रियानिरूपितकर्मत्वशक्तिरस्ति तथैव भुजिक्रियानिरूपितापि, भुजिक्रियायाः प्रधानत्वात्तन्निरूपित-कर्मत्वशक्तिसत्त्वेऽप्यभिहितत्वेन प्रथमेति भावः। एवं ओदनं पक्त्वा भुङ्क्ते इत्यत्रापि प्रधानभुजिक्रियानिरू-पितानभिहितशक्त्याश्रये प्रथमा। भाष्यकारेण 'स्वादुमि णमुल्' इति सूत्रभाष्ये यथाख्यातकारकशक्तिरेव क्त्वादिकृत्प्रत्ययशक्तिरिति वार्त्तिकानुसारत आख्यात-शक्त्यपेक्षया प्रधानक्रियापेक्षया वाभिहितानभिहिताश्रयेण

समाहितं तथाव्ययकृतः भावे विधाय तैः कर्तृकर्मणोरभिधेयत्वाभाव आख्यातशक्त्यपेक्षया प्रधान-क्रियापेक्षया वाभिहितत्वमाश्रितम्, भट्टोजिदीक्षितेन तु पाणिनेः कर्तरि कृत् इति शक्तिमादायैव प्रधानक्रियानुसारतः अभिहितत्वमाश्रितमिति भेदः। प्रसङ्गे अस्मिन् दीक्षितेन वाक्यपदीयत उदाहृतः श्लोकः –

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुद्ध्यते ।।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते ।। इति।

अतः प्रधानेनोक्ते सत्यप्रधानेनानुक्ते अप्युक्तवदभिहितो वा स्यादिति भावः। तेन 'ओदनः पक्त्वा भुज्यते' इत्यत्र पक्त्वा इत्यपेक्षयानुक्ते अपि प्रधानभुजिक्रिययोक्तत्वादभिहितत्वमेव। एवं इष्यते ग्रामो गन्तुमित्यात्राप्युक्तवत्त्वेन गन्तुमित्यपेक्षयानुक्ते अपि न द्वितीयाचतुर्थौ। भट्टोजिदीक्षितेन तत्र 'पक्त्वा ओदनं भुज्यते' इत्यपि यथायथमिति प्रतिपादितम्[9] प्राचीनमतानुसारतः, अत्रौदनशब्दस्योभयत्र पचिभुजिभ्यां न शाब्दे अन्वयः अपि तु केनाप्येकेन शाब्दान्वयो अपरेणार्थान्वयः इति। यदा भुजिना शाब्दान्वयः तदनुसारतः अभिहितत्वाश्रयेन 'पक्त्वा ओदनः भुज्यते' इति

वाक्यम्, पचिना तु केवलमर्थान्वयः, एवं पचिना शाब्दान्वये पक्त्वा ओदनं भुज्यते इति वाक्यम्, भुजिनार्थान्वय इति भावः। परन्त्वेवमर्थान्वयस्वीकारे स्वादुमि णमुल् इति सूत्रभाष्यस्य 'ओदनः पक्त्वा भुज्यते' इति वाक्यसाधनं न सङ्गच्छते। तथाहि शब्दरत्नटीकायामुक्तम् – 'एवं चैतद्विरोधादोदनं पक्त्वेत्यपीष्टमेवेति यत्केनचित् प्राचीनेन वस्तुतस्तु पक्त्वेत्यादिना साध्वित्यन्तेनोक्तं तदतितुच्छमिति बोद्ध्यम्' इति (कर्मणि द्वितीया) । एवं भीष्ममुदारं कटं करोतीत्यत्र द्वितीयायाः कर्माभिधेयतया विशेष्यात्कट-शब्दादुत्पन्नद्वितीयया विशेषणात् भीष्मशब्दाद्द्वितीयाया अप्राप्तिर्स्यात्कटशब्दगतद्वितीयया भीष्मशब्दगतकर्मणः अप्यभिधेयत्वात्, तथाहि तिङ्कृत्तद्धितसमासैः अभिधान-परिगणनम्। तेन तिङादिभिरत्राभिहितत्वाभावे द्वितीयाया नानुपपत्तिरिति। परन्तु क्रियासाधकत्वेन क्रिया सर्वाणि कारकाण्याक्षिपति, तेन क्रियापेक्षया कर्मशक्तिबोधाय विशेषणादपि द्वितीया, तथाहि तिङादिभिः परिगणनं प्रत्याख्यातं अनभिहितसूत्रभाष्ये। कटशब्दाद्द्वितीया कटगतमेव कर्म अभिदधाति न तु भीष्मादिगतमपीति पदमञ्जर्यादिषु व्याख्यातम्।'...कटत्वविशिष्टकर्मत्वोक्तावपि

भीष्मत्वादि-गुणविशिष्टनिष्ठस्य तस्य बोधार्थं ततोऽपि सा' इति नागेशः[10]।

'गां दोग्धि पयः' इत्यादिषु कर्मणि लकारः प्रधानकर्मण्यप्रधानकर्मणि वेति शंका स्यात्, प्रधानकर्मणि सति तस्यैवोक्तत्वात्प्रथमा, तत्रैव 'गां दुह्यते पयः' इत्यनिष्टरूपम्, एवमप्रधाने सति 'अजां ग्रामो नीयते' इति प्राप्यते, एवमन्यत्रापि। तथाहि 'अकथितं च' इति सूत्रभाष्ये वार्त्तिकं – 'कथितेभिहिते त्वविधिस्त्वमति गुणकर्मणि लादिविधिः सपरे' (वा.११०४) इति। कथिते प्रधानकर्मणि वा लकारोऽङ्गीकृतः कैश्चित्परन्तु कैयटेन तद्वार्तिकालोचनायां गुणकर्मपक्ष एव न्याय्य इत्युक्तम्। तत्र किं प्रधानकर्म किं वा प्रधानकर्मेति शंका स्यात्। नागेशेनोक्तम् – 'अत्र गुणकर्मत्वं प्रधानकर्मभिन्नत्वम्। प्रधानकर्मत्वं प्रधानकर्तृनिष्ठव्यापारजन्यफलाश्रयत्वम्'[11] इति। परन्तु प्रधानकर्तृगोपालकनिष्ठव्यापारजन्यफलाश्रयस्तु गौरेव, स एव प्रधानकर्म न तु पयः, अतः प्रधानकर्मणि गौः इत्यस्मिन् लकारे 'गां दुह्यते पयः' इत्येव स्यात्। तथाहि नागेशेनोक्तमेकव्यापारपक्षे एतत्प्रधानाप्रधानभेदः[12]। तेन

एकव्यापारार्थकदुहधातोः विभागानुकुलव्यापारे अर्थे पयः एव तत्फलाश्रयत्वेन प्रधानकर्म पयः एव, गौः तदाश्रयाभावे 'अकथितं च' इत्यनेन कर्मत्वे प्रधानकर्मभिन्नः गौरेवेति, तेनाप्रधानकर्मणि लकारे गौः पयः दुह्यते इति सिद्धम्। परन्तु विभागानुकुलव्यापारेऽर्थेऽपि प्रधानव्यापारप्रयोज्यफलाश्रयः गौरेव तेन तस्यैव प्रधानत्वं स्यात् गव्येव प्रवृत्तेः, तथापि पयोर्थी पयोलाभायैव गवि प्रवृत्तः स्यादिति अन्यार्थत्वात् गवि क्रियाप्रवृत्तिरिति गोः अप्राधान्यम्। एवं ण्यन्तधातुष्वपि[13] गुणकर्मण्येव, यथा माणवकं धर्मः श्राव्यते इति, 'गौः दुह्यते पयः' इत्यत्र यथा पयः इति प्रधानकर्म, 'मानवकं धर्मः श्राव्यते' इत्यत्र तु न धर्मो प्रधानकर्म, प्रयोजककर्तुः ईप्सिततमत्वान्माणवक एव प्रधानकर्म, तद्भिन्नेऽप्रधान-कर्मणि लकारः, एवं 'भोज्यते बालकमोदनः' इत्यादिष्वपि। णिजर्थस्तु व्यापारः, तथाहि प्रयोजककर्तृनिष्ठफलाश्रयत्वेन माणवकादीनां प्राधान्यमिति भावः। णिजर्थव्यापारस्तु प्रयोजककर्तर्येवान्तर्भावः। परन्तु 'बालक ओदनं भुङ्क्ते', 'बालकमोदनं भोजयति' इत्यत्रौदनस्तु प्रयोजकव्यापार-प्रयोज्यबालकस्यैवेप्सितो तेन प्रयोजक-कर्तृनिष्ठफलाश्रयत्वेन कर्मणो बालकस्यैवेप्सित औदनः न तु

कर्तुः, तेनौदनस्य कथं कर्मत्वं कथं वा द्वयोः कर्मणोर्मध्ये प्रधानाप्रधानविचार इति शकांयामप्यत्रैवमवधेयं णिज्व्यापारात्पूर्वमेवौदन ईप्सित एव कर्तुः बालकस्य, बालक ओदनं भुङ्क्ते इत्यतः अन्तरङ्गत्वात्कर्तुरेवेप्सितत्वान्नास्ति समस्या। परन्तु 'गतिबुद्धिप्रत्यवसानार्थ...' (१-४-५२) इत्यनेन गम्यते ग्रामं देवदत्तः इत्यत्राप्यप्रधानकर्मणि ग्रामे लकारप्राप्तिः, तेन गम्यते ग्रामो देवदत्तमित्यनिष्टरूपापत्तिः प्रयोजकर्तृनिष्ठ-व्यापारप्रयोज्यफलाश्रयत्वाद्देवदत्तस्यैव प्राधान्यात्तदभिन्नत्वेन प्रयोज्यकर्तृव्यापारप्रयोज्यफला-श्रयत्वेन वा ग्रामो अप्रधानमिति ग्रामे लकारापत्तिरिति भावः। तथाहि वार्त्तिकं – 'ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरत' (वा.११०५) इति, ध्रुव इति अकर्मकः, तत्र प्राधान्य एव लकारः मासमास्यते देवदत्तः इति, प्रयोजकव्यापारप्रयोज्यफलाश्रयत्वाद्देवदत्तस्य प्राधान्यम्, वार्त्तिके चेष्टित इति गत्यर्थकः तत्र प्राधान्य एव 'ग्रामं गम्यते देवदत्त' इति। नागेशेनोद्योते वा. ११०६ इति वार्त्तिकभाष्यव्याख्यायामुक्तं – 'ध्रुवचेष्टितयुक्तिष्विति पूर्वश्लोकेऽपि चेष्टितयुक्तित्वेन नयत्यादीनामपि ग्रहणमिति न तस्य न्यूनता' इति, तेन नी हृ कृष् वह् इत्येषामपि

प्रधानकर्मण्येव लकारः, ‘अजा ग्रामं नीयते’ इति कर्तृनिष्ठव्यापारजन्यफलाश्रयत्वेनाजा प्रधानमिति भावः। अत्रोल्लेखनीयं तद्भाष्यप्रदीपे पूर्वप्रवृत्तिमाश्रित्य लादयो व्याख्याता, अर्थाद्यस्मिन् पूर्वं प्रवृत्तिः तत्रैव लादय इति। यथा ‘अजा ग्रामं नीयते’ इत्यत्र प्रदीप उक्तम् – ‘अजायाः प्राधान्यान्नेतुश्च तस्यामेव पूर्वं क्रियाप्रवर्तनादन्तरङ्गत्वाच्च तस्यामेव लादयः’ इति। एवं ‘मासमास्यते देवदत्त’ इति ‘गम्यते ग्रामं देवदत्त’ इत्यत्राप्युक्तं – ‘प्रयोज्ये देवदत्ते प्रयोजकव्यापारस्य तत्रैव पूर्वं सन्निपाताल्लादयो भवन्ति इति। तथा ग्रामं गम्यते देवदत्त इत्यत्रापि’ इति । अत्र नैषा शंका करणीया यत् यत्र प्रयोजकव्यापारप्रयोज्यफलाश्रयत्वेन देवदत्तादिषु प्राधान्यं तत्रैव पूर्व प्रवृतिरति तत्रैव लादय इति, अप्राधान्येऽपि पूर्वं प्रवृत्तिमाश्रित्योक्तमेव ‘गौः दुह्यते पयः’ इत्यत्र – ‘यतश्च पयोर्थी प्रथमं गवि प्रवर्तते ततो अन्तरङ्गत्वाद् दुह्यादिषु गुणकर्मणि लादयो भवन्ति’ इति। अत्र मूले वाक्यपदीयं वर्तते, कैयटेनोद्धृतं तत् –

गुणकर्मणि लादिविधिः पूर्वं गुणकर्मणा भवति योगः।
मुख्यं कर्म प्रेप्सुर्यस्माद्द्रव्येव यतते प्राक्।।
तस्माच्छुद्धस्य दुहेर्भवति गवा पूर्वं सम्बन्धः।

गोदुहादिना पयसस्तु प्राक् तस्माल्लादयस्तस्मिन्।।

परन्तु पूर्वं प्रवृत्तिमाश्रित्य लादिव्यवस्थायां बालकमोदनो भोज्यत इत्यत्रापि प्रयोजककर्तुर्बालके पूर्वप्रवृत्तित्वेन तत्रैव लकारापत्तिः स्यात्, तथाहि नागेशेन 'अकथितं च' इति भाष्योद्द्योत उक्तम् – 'अनया युक्त्या बुद्धिप्रत्यवसानार्थेष्वपि प्रधान एवापत्तिरित्यस्यार्थस्य वाचनिकत्वमेव युक्तम्' इति। अपि च वार्त्तिकत्रयमुदधृतं तत्र भाष्यकारेण, 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' (वा. ११०६) इति वार्त्तिकेन प्रधानकर्मणि लादयः स्युः, 'अप्रधाने दुहादीनाम्' (वा. ११०७) इति वार्त्तिकेन दुहादीनामप्रधाने लादयः इति, तेन 'प्रधानकर्मण्याख्येये लादीन्...' इत्यनेन न्यादीनां चतुर्णां प्रधाने भवतीति बोधः। 'ण्यन्ते कर्तुश्च कर्मणः' (वा. ११०८) इति वार्त्तिकेन ण्यन्तधातूनां प्रयोज्यकर्मणि लादिव्यवस्था इति। तत्र बालमनोरमादिषु (अकथितं च) दुहादिधातूनामेकव्यापारार्थत्वेन 'अकथितं च' इति सूत्रमिति प्रपञ्चितम्। नागेशेन तस्मिन् भाष्योद्द्योते दुहादीनामेकव्यापारपक्ष एवाश्रितः। तत्र व्यापार-द्वयार्थकत्वेनोद्देश्यानुद्देश्यत्वरूपफलाश्रये व्यापारद्वयजन्यो-द्देश्यरूपफलाश्रये पयसः प्राधान्यं गोः चाप्राधान्यं सदपि

तदाश्रये भाष्योदाहरणानां तात्पर्यानुपपत्तिर्भवेदि-त्युक्तमुद्द्योते नागेशेन। अनुपपत्तिकारणं हि प्रयोजककर्तृव्यापारजन्यफलाश्रयत्वेन प्राधान्याप्राधान्य-विचारितत्वात् दुहादीनां व्यापारद्वयार्थकत्वे प्रयोजक-कर्तृव्यापारजन्यफलाश्रये गोरेव प्राधान्यं भवेत् न तु पयसः, तेन अप्रधाने दुहादीनामिति (वा. ११०७) वार्त्तिकेनाप्रधाने गवि लादयः इति वक्तव्यं न सङ्गच्छते, एवमन्यत्रापि। तथाहि नागेशेनोक्तं – 'यदा त्वेकव्यापारार्थत्वं दुहादीनां तदानेन कर्मत्वे तादृशप्राधान्यस्य गव्यभावात्तत्र लाद्यप्राप्तौ गुणकर्मणि लादय इत्युक्तम्' (उद्द्योतः,१-४-५१) इति। अपि च प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति वार्त्तिक-स्थद्विकर्मविषये नागेशेनोक्तम् – 'अत्र व्यापारद्वयार्थकतया कर्तुरीप्सिततममित्यनेन येषु द्वयोः कर्मत्वं ते अत्र द्विकर्मका उच्यन्ते' इति, ततः परमेव तेनोक्तं – 'न्यादीनाञ्च तेनैव द्विकर्मतेति बोध्यम्' इति, अत्रेदमवधेयं न्यादिधातव एवोक्ता न तु दुहादय इत्यत एकव्यापारपक्ष एवाश्रितः। तथाहि भट्टोजिदीक्षितेन प्रौढमनोरमायाम् (अकथितं च) उक्तम् – 'तत्र ये व्यापारद्वयार्थत्वेन द्विकर्मकास्तेषां प्रधानकर्मणि

लादयः। प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् इत्युक्तेः' इति।

**तथ्यसूत्राणि** -

1. एवं च यदि प्रसज्यप्रतिषेधः स्यात्ततो भिहितशक्तिद्वारेण द्रव्यस्याभिहितत्वात्प्रतिषेधः स्यात्, पर्युदासे तु अनभिहितशक्तिद्वारे विधिरिति स्पष्ट एव फलभेदः - न्यासः, अनभिहिते।

2. प्रतिपदिकार्थलिङ्गपरिमाण... (२-३-४६)

3. प्रत्ययनियमपक्षे हि प्रातिपदिकार्थ एव प्रथमा नान्यत्रेत्यर्थपर्यवसनात्कर्मादौ प्रथमाया अप्रवृत्तेः। - (२-३-४६)

4. अनभिहिते (२-३-१)

5. स्वादुमि णमुल् (३-४-२६)

6. कर्मणि द्वितीया (२-३-२)

7. केवलशब्दव्यापारनिरूपणे तु किमिष्टकाः पक्त्वौदनो भुज्यते, उतौदमेवेति न ज्ञायते, ततः शब्दव्यापारापेक्षयाभिधानमेवेति द्वितीया न भविष्यति।

8. कर्मणि द्वितीया – प्रौढमनोरमा9. वस्तुतस्तु पक्त्वा भुज्यते इत्यादौ कर्मणः पचिभुजिभ्यां न युगपच्छाब्दोऽन्वयः किं त्वन्यतरेण शाब्दोऽपरेणार्थः। तत्र च प्रथमाद्वितीये व्यवस्थिते एव। कर्मणि द्वितीया – प्रौढमनोरमा

10. कर्मणि द्वितीया, (लघुशब्देन्दुशेखरः)

11. अकथितं च (उद्द्योतः)

12. तद्भेदश्चैकव्यापारार्थकदुहादिष्वनेन कर्मत्वे फलाश्रयत्वाभावात् - अकथितं च (उद्योतः)

13. गुणकर्मणि लादयो भवन्ति सह परेण योगेन गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकानामणिकर्ता स णौ - अकथितं च (भाष्यम्)

## ग्रन्थपञ्जी –


1. त्रिपाठी,जयशङ्करलाल. सुधाकर मालवीय, (द्वितीयभागः, तृतीयभागः) काशिका जयादित्यवामनयोः, वाराणसी, तारावुक एजेन्सि, (द्वितीयभागः) पुनःमु २००९, (तृतीयभागः) पुनःमु, २०१४

2. शर्मा सभापति, प्रौढमनोरमा भट्टोजिविरचिता, वाराणसी, वाणी विलास प्रकाशन, पुनःमु २०१२

3. शर्मा शिवदत्त, शास्त्री काशीनाथ, (द्वितीयभागः, तृतीयभागः) महाभाष्यं पतञ्जलेः, दिल्लि, चौखाम्बा संस्कृत प्रकाशन, पुनः मु १९८८

4. शास्त्री वैकुण्ठनाथ, लघुशब्देन्दुशेखरः नागेशकृतः, वाराणसी, चौखाम्बा सुरभारती प्रकाशन, पुनः.मु. २०१०

5. शर्मा गिरिधर, सिद्धान्तकौमुदी भट्टोजिप्रणीता, दिल्लि, मो.ला.वे.दा, पुनःमु २०१०